स ध्यानपारमितायां चरन् विविक्तं कामैर्व्विविक्तं पापकैरकुशलैर्धर्म्मैः सवितर्कंसविचारं विवेकजं प्रीतिसुखं प्रथमं ध्यानमुपसम्पद्यविहरति। सवितर्कसविचाराणां व्युपशमादध्यात्मसम्प्रसादाच्चेतस एकोतिभावादवितर्कमविचार समाधिजं प्रीतिसुखं द्वितीयं ध्यानमुपसम्पद्यविहरति। सप्रीतेर्व्विरागादुपेक्षको विहरति स्मृतिमान् संप्रजानन् सुखञ्च कायेन प्रतिसम्वेदयति। यत्तदार्य्या आचक्षते उपेक्षकः स्मृतिमान् सुखविहारीनिष्प्रीतिकं तृतीयं ध्यानमुपसम्पद्यविहरति। ससुखस्य प्रहाणात् दुःखस्य च प्रहाणात् पूर्व्वमेव सौमनस्य दौर्मनस्ययोरस्तगमाददुःखाऽसुखमुपेक्षास्मृतिपरिशुद्धं चतुर्थं ध्यानमुपसम्पद्यविहरति। मैत्रीसहगतेन चित्तेन विपुलेन महद्गतेनाद्वयेनाऽप्रमाणेनाऽवैरेणाऽव्यावध्येनाऽसपत्नेण परिपूर्णेन सुभावितेन धर्म्मधातुपरमे लोक आकाशधातुपर्य्यवसाने दशदिशः स्फुरित्वाऽधिमुच्यविहरति। स करुणासहगतेन चित्तेन विपुलेन महद्गतेनाद्वयेनाप्रमाणेनाऽवैरेणाव्यावध्येनासपत्नेण परिपूर्णेन सुभावितेन धर्म्मधातुपरमे लोक आकाशधातुपर्य्यन्तसाने दशदिशः स्फुरित्वाऽधिमुच्यविहरति। स मुदितासहगतेन चित्तेन विपुलेन महद्गतेनाऽद्वयेनाऽप्रमाणेनाऽवैरेणाऽव्यावध्येनासपत्नेण परिपूर्णेन सुभावितेन धर्म्मधातुपरमे लोके आकाशधातुपर्य्यवसाने दशदिशः स्फुरित्वाऽधिमुच्यविषरति। स उपेक्षासहगतेन चित्तेन निपुलेन महद्गतेनाऽद्वयेनाप्रमाणेना-

पुनरपरमायुष्मञ्छारद्वतीपुत्र बोधिसत्त्वो महासत्त्वोऽव्यवकीर्णैः सर्व्वाकारज्ञता प्रतिसंयुक्तैर्मनसिकारैरध्यात्मशून्यतां भावयति। भावनाविभावनार्थेन। तच्चाऽनुपलम्भयोगेन। अव्यवकीर्णैः सर्व्वाकारज्ञता प्रतिसंयुक्तैर्मनसिकारैर्बहिर्द्धाशून्यतां भावयति। भावनाविभावनार्थेन। तच्चाऽनुपलम्भयोगेन। अव्यवकीर्णैः सर्व्वाकारज्ञता प्रतिसंयुक्तैर्मनसिकारैरध्यात्मबहिर्द्धाशून्यता भावयति। भावनाविभावनार्थेन। तच्चाऽनुपलम्भयोगेन। अव्यवकीर्णैः सर्व्वाकारज्ञता प्रतिसंयुक्तैर्मनसिकारैः शून्यताशून्यतां भावयति। भावनाविभावनार्थेन। तच्चाऽनुपलम्भयोगेन। अव्यवकीर्णैः सर्व्वाकारज्ञता प्रतिसंयुक्तैर्मनसिकारैर्महाशून्यतां भावयति। भावनाविभावनार्थेन। तच्चाऽनुपलम्भयोगेन। अव्यवकीर्णैः सर्व्वाकारज्ञता प्रतिसंयुक्तैर्मनसिकारैः परमार्थशून्यतां भावयति। भावनाविभावनार्थेन। तच्चाऽनुपलम्भयोगेन। अव्यवकीर्णैः सर्व्वाकारज्ञता प्रतिसंयुक्तैर्मनसिकारैः संस्कृतशून्यतां भावयति। भावनाविभावनार्थेन। तच्चाऽनुपलम्भयोगेन। अव्यवकीर्णैः सर्व्वाकारज्ञता प्रतिसंयुक्तैर्मनसिकारैरसंस्कृतशून्यतां भावयति। भावनाविभावनार्थेन। तच्चाऽनुपलम्भयोगेन। अव्यवकीर्णैः सर्व्वाकारज्ञता प्रतिसंयुक्तैर्मनसिकारैरत्यन्तशून्यतां भावयति। भावनाविभावनार्थेन। तच्चाऽनुपलम्भयोगेन। अव्यवकीर्णैः सर्व्वाकारज्ञता प्रतिसंयुक्तैर्मनसिकारैरनवराग्रशून्यतां भावयति। भावनाविभावनार्थेन। तच्चाऽनुपलम्भयोगेन। अव्यवकीर्णैः सर्व्वाकारज्ञता प्रतिसंयुक्तैर्मनसिकारैरनवकारशून्यतां भावयति। भावनाविभावनार्थेन। तच्चाऽनुपलम्भयोगेन। अव्यवकीर्णैः सर्व्वा-

विभावनार्थेन । तच्चाऽनुपलम्भयोगेन । अव्यवकीर्णैः सर्व्वाकारज्ञता प्रतिसंयुक्तैर्मनसिकारैः पञ्चबलानि भावयति । भावनाविभावनार्थेन । तच्चाऽनुपलम्भयोगेन। अव्यवकीर्णैः सर्व्वाकारज्ञता प्रतिसंयुक्तैर्मनसिकारैः सप्तबोध्याङ्गानि भावयति। भावनाविभावनार्थेन। तच्चाऽनुपलम्भयोगेन। अव्यवकीर्णैः सर्व्वाकारज्ञता प्रतिसंयुक्तैर्मनसिकारैरार्य्याष्टाङ्गमार्गं भावयति। भावनाविभावनार्थेन। तच्चाऽनुपलम्भयोगेन। अव्यवकीर्णैः सर्व्वाकारज्ञता प्रतिसंयुक्तैर्मनसिकारैरार्य्यसत्यानि भावयति। भावनाविभावनार्थेन। तच्चाऽनुपलम्भयोगेन। अव्यवकीर्णैः सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारैश्चत्वारि ध्यानानि भावयति। तच्चाऽनुपलम्भयोगेन। अव्यवकीर्णैः सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारैश्चत्वार्य्यप्रमाणानि भावयति। भावनाविभावनार्थेन। तच्चाऽनुपलम्भयोगेन। अव्यवकीर्णैः सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारैश्चतस्र आरूप्यसमापत्तीर्भावयति। भावनाविभावनार्थेन। तच्चाऽनुपलम्भयोगेन। अव्यवकीर्णैः सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारैरष्टौ विमोक्षान् भावयति। भावनाविभावनार्थेन। तच्चाऽनुपलम्भयोगेन। अव्यवकीर्णैः सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारैर्नवानुपूर्व्वविहारसमापत्ति भावयति। भावनाविभावनार्थेन। तच्चाऽनुपलम्भयोगेन। अव्यवकीर्णैः सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारैः शून्यतानिमित्ताऽप्रणिहितविमोक्षमुखानि भावयति। भावनाविभावनार्थेन। तच्चाऽनुपलम्भयोगेन। अव्यवकीर्णैः सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारैरभिज्ञाभावयति। भावनाविभावनार्थेन। तच्चाऽनुपलम्भयोगेन। अव्यवकीर्णैः सर्व्वाकारज्ञताप्रतिसंयुक्तैर्मनसिकारै.

सम्पद्य विहरति। स सुखस्य च प्रहाणात् दुःखस्य च प्रहाणात् पूर्व्वमेव सौमनस्य दौर्मणस्ययोरस्तङ्गमाद् दुःखसुखमुपेक्षास्मृतिपरिशुद्धं चतुर्थं ध्यानमुपसम्पद्य विहरति। स सर्व्वशो रूपजं ज्ञानां समतिक्रमात् प्रतिघसंज्ञानामस्तङ्गमान्नानात्व संज्ञानाम् मनसिकारादनन्तमाकाशमित्याकाशानन्त्यायतनमुपसम्पद्य विहरति। स सर्व्वशत्वाकाशानन्त्यायतनसमतिक्रमादनन्तं विज्ञानमिति विज्ञानानन्त्यायतनमुपसम्पद्य विहरति। ससर्व्वशो विज्ञानानन्त्यायतनसमतिक्रमान्नास्ति किञ्चिदित्याकिञ्चन्यायतनमुपसम्पद्य विहरति। ससर्व्वशश्चाकिञ्चन्यायतनसमतिक्रमान्नैवसंज्ञायतनमुपसम्पद्य विहरति। अथ बोधिसत्त्वस्य महासत्त्वस्य समाधिः।

स खलु पुनर्बोधिसत्त्वो महासत्त्वः सर्व्वाकारज्ञता प्रतिसंयुक्तेन चित्तेन सर्व्वाकारज्ञतापूर्व्वङ्गमेन [illegible] ध्यानानि समापद्य [illegible]

ऽनुपलब्धितामुपादाय । नाममात्रमेतद्यदुतचक्षुश्चक्षुरणुपलब्धितामुपादाय। नाममात्रमेतद्यदुतश्रोत्रं श्रोत्राऽनुपलब्धितामुपादाय। नाममात्रमेतद्यदुतघ्राण घ्राणाऽनुपलब्धितामुपादाय । नाममात्रमेतद्यदुतजिह्वाजिह्वाऽनुपलब्धितामुपादाय। नाममात्रमेतद्यदुतकायः कायाऽनुपलब्धितामुपादाय। नाममात्रमेतद्यदुतमनः मनोऽनुपलब्धितामुपादाय। नाममात्रमेतद्यदुतरूपं रूपाऽनुपलब्धितामुपादाय। नाममत्रमेतद्यदुतशब्दः शब्दाऽनुपलब्धितामुपादाय। नाममत्रमेतद्यदुतगन्धो गन्धाऽनुपलब्धितामुपादाय। नाममात्रमेतद्यदुतरसो-रसाऽनुपलब्धितामुपादाय। नाममात्रमेतद्यदुतस्पर्शः स्पर्शाऽनुपलब्धितामुपादाय। नाममात्रमेतद्यदुतधर्म्माः धर्म्माऽनुपलब्धितामुपादाय ।

नाममात्रमेतद्यदुतचक्षुःर्व्विज्ञान चक्षुर्व्विज्ञानाऽनुपलब्धितामुपादाय। नाममात्रमेतद्यदुतश्रोत्रविज्ञनं श्रोत्रविज्ञानाऽनुपलब्धितामुपादाय। नाममात्रमेतद्यदुतघ्राणविज्ञान घ्राणविज्ञानाऽनुपलब्धितामुपादाय। नाममात्रमेतद्यदुतजिह्वाविज्ञानं जिह्वाविज्ञानाऽनुपलब्धितामुपादाय। नाममात्रमेतद्यदुतकायविज्ञान कायविज्ञानाऽनुपलब्धितामुपादाय। नाममात्रमेतद्यदुतमनोविज्ञान मनोविज्ञानाऽनुपलब्धितामुपादाय। नाममात्रमेतद्यदुतचक्षु संस्पर्शश्चक्षु.-संस्पर्शाऽनुपलब्धितामुपादाय। नाममात्रमेतद्यदुतश्रोत्रसंस्पर्शः श्रोत्रसंस्पर्शाऽनुपलब्धितामुपादाय। नाममात्रमेतद्यदुतघ्राणसंस्पर्शः घ्राणसंस्पर्शाऽनुपलब्धितामुपादाय। नाममात्रमेतद्यदुतजिह्वासंस्पर्शः जिह्वासंस्पर्शाऽनुपलब्धितामुपादाय। नाममात्रमेतद्यदुतकायसंस्पर्श.

ऋद्धिपादान् भावयति। सर्व्वाकारैः पञ्चेन्द्रियाणि भावयति। सर्व्वाकारैः पञ्चबलानि भावयति। सर्व्वाकारैः सप्तबोध्याङ्गानि भावयति। सर्व्वाकारैरार्य्याष्टाङ्गमार्गं भावयति। सर्व्वाकारैरार्य्यसत्यानि भावयति। सर्व्वाकारैर्ध्यानानिभावयति। सर्व्वाकारैरप्रमाणानि भावयति। सर्व्वाकारैरारूप्यसमापत्तीर्भावयति। सर्व्वाकारैर्व्विमोचान् भावयति। सर्व्वाकारैरनुपूर्व्वविहारसमापत्तीर्भावयति। सर्व्वाकारैः शून्यतानिमित्ताप्रणिहितविमोचमुखानि भावयति। सर्व्वाकारैरभिज्ञा भावयति। सर्व्वाकारैः समाधिं भावयति। सर्व्वाकारैर्धारणीमुखानि भावयति। सर्व्वाकारैस्तथागतबलानि भावयति। सर्व्वाकारैर्व्वैशारद्यानि भावयति। सर्व्वाकारै प्रतिसम्विदो भावयति। सर्व्वाकारैर्महामैत्रीं भावयति। सर्व्वाकारैर्महाकरुणां भावयति। सर्व्वाकारैरावेणिकबुद्धधर्म्मान् भावयति। सर्व्वाकारैः सर्व्वज्ञतां भावयति। सर्व्वाकारैर्मार्गाकारज्ञतां भावयति। सर्व्वाकारैः सर्व्वाकारज्ञतां भावयति। इदमायुष्मान्छारद्वतीपुत्र बोधिसत्त्वस्य महासत्त्वस्य महायानं।

पुनरपरमायुष्मञ्छारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वो मैत्रीं समाधिं समापद्यते। मया सर्व्वसत्त्वास्त्रातव्याः इत्यति नामयति करुणाञ्च समाधि सम्पद्यते। कृपाकरुण्यताञ्च सत्त्वेषु निर्णमयति। मुदिताञ्च समाधि समापद्यते। अहमेवं समाधायिष्यामीति सत्त्वेषु निर्णमयति। उपेचाञ्च समाधि समापद्यते। आस्रवचयणताञ्च सत्त्वेषु निर्णयतीयं बोधिसत्त्वस्य महासत्त्वस्य प्रमाणेषु

नाममात्रमेतद्यदुतोपादानमुपादानाऽनुपलब्धितामुपादाय । नाममात्रमेतद्यदुतभवोभवाऽनुपलब्धितामुपादाय । नाममात्रमेतद्यदुतजातिर्जात्यनुपलब्धितामुपादाय । नाममात्रमेतद्यदुतजरामरणं जरामरणाऽनुपलब्धितामुपादाय ।

नाममात्रमेतद्यदुतदानपारमितादानपारमिताऽनुपलब्धितामुपादाय । नाममात्रमेतद्यदुतशीलपारमिताशीलपारमिताऽनुपलब्धितामुपादाय । नाममात्रमेतद्यदुतक्षान्तिपारमिताक्षान्तिपारमिताऽनुपलब्धितामुपादाय । नाममात्रमेतद्यदुतवीर्य्यपारमितावीर्य्यपारमिताऽनुपलब्धितामुपादाय । नाममात्रमेतद्यदुतध्यानपारमिताध्यानपारमिताऽनुपलब्धितामुपादाय । नाममात्रमेतद्यदुतप्रज्ञापारमिताप्रज्ञापारमिताऽनुपलब्धितामुपादाय ।

नाममात्रमेतद्यदुताऽध्यात्मशून्यताऽध्यात्मशून्यताऽनुपलब्धितामुपादाय । नाममात्रमेतद्यदुतवहिर्द्धाशून्यतावहिर्द्धाशून्यताऽनुपलब्धितामुपादाय । नाममात्रमेतद्यदुताऽध्यात्मवहिर्द्धाशून्यताऽध्यात्मवहिर्द्धाशून्यताऽनुपलब्धितामुपादाय । नाममात्रमेतद्यदुतशून्यताशून्यताशून्यताशून्यताऽनुपलब्धितामुपादाय । नाममात्रमेतद्यदुतमहाशून्यतामहाशून्यताऽनुपलब्धितामुपादाय । नाममात्रमेतद्यदुतपरमार्थशून्यतापरमार्थशून्यताऽनुपलब्धितामुपादाय । नाममात्रमेतद्यदुतसंस्कृतशून्यतासंस्कृतशून्यताऽनुपलब्धितामुपादाय । नाममात्रमेतद्यदुताऽसंस्कृतशून्यताऽसंस्कृतशून्यताऽनुपलब्धितामुपादाय । नाममात्रमेतद्यदुताऽत्यन्तशून्यताऽत्यन्तशून्यताऽनुपलब्धितामुपादाय । नाममात्रमेतद्यदुताऽनवराग्रशून्यताऽनवराग्रशून्यताऽनुपलब्धितामु-

[illegible]

न चानुपश्यति [illegible] । ६६ बोधिसत्त्वस्य महासत्त्वस्य महायानम्

पुनरपरमायुष्मञ्छारद्वतीपुत्र बोधिसत्त्वस्य महासत्त्वस्य महायानं। यत् सर्वधर्मेषु न तिष्ठते चित्त समाहितमिति ध्यानमिदं बोधिसत्त्वस्य महासत्त्वस्य महायानं।

यत्त्वनित्यमिति ध्यान प्रवर्त्तते। नानित्यमिति ध्यान प्रवर्त्तते। न सुखमिति ध्यान प्रवर्त्तते। न दुःखमिति ध्यान प्रवर्त्तते। नात्मेति ध्यान प्रवर्त्तते। नाऽनात्मेति ध्यानं प्रवर्त्तते। न शुभमिति

पूर्व्वविहारसमापत्तयोऽनुपूर्व्वविहारसमापत्त्यनुपलब्धितामुपादाय । नाममात्रमेतद्यदुतशून्यतानिमित्ताप्रणिहितविमोचमुखानिशून्यतानिमित्ताप्रणिहितविमोचमुखाऽनुपलब्धितामुपादाय। नाममात्रमेतद्यदुताऽभिज्ञाभिज्ञाऽनुपलब्धितामुपादाय। नाममात्रमेतद्यदुतसमाधयः समाध्यनुपलब्धितामुपादाय। नाममात्रमेतद्यदुतधारणीमुखानिधारणीमुखानुपलब्धितामुपादाय। नाममात्रमेतद्यदुतदशतथागतबलानि तथागतबलाऽनुपलब्धितामुपादाय । नाममात्रमेतद्यदुतचत्वारिवैशारद्यानि वैशारद्यानुपलब्धितामुपादाय। नाममात्रमेतद्यदुतचतस्रः प्रतिसम्विदः प्रतिसम्विदनुपलब्धितामुपादायः। नाममात्रमेतद्यदुतमहामैत्रीमहामैत्र्यनुपलब्धितामुपादाय । नाममात्रमेतद्यदुतमहाकरुणामहाकरुणाऽनुपलब्धितामुपादाय । नाममात्रमेतद्यदुताष्टादशावेणिकाबुद्धधर्म्माः आवेणिकबुद्धधर्म्मानुपलब्धितामुपादाय । नाममात्रमेतद्यदुततथतातथतानुपलब्धितामुपादाय । नाममात्रमेतद्यदुताऽवितथताऽवितथतानुपलब्धितामुपादाय। नाममात्रमेतद्यदुतधर्म्मताधर्म्मताऽनुपलब्धितामुपादाय । नाममात्रमेतद्यदुतधर्म्मधातुधर्म्मधात्वनुपलब्धितामुपादाय। नाममात्रमेतद्यदुतधर्म्मस्थितिताधर्म्मस्थितिताऽनुपलब्धितामुपादाय । नाममात्रमेतद्यदुतधर्म्मनियामताधर्म्मनियामताऽनुपलब्धितामुपादाय। नाममात्रमेतद्यदुतभूतकोटिर्भूतकोट्यनुपलब्धितामुपादाय। नाममात्रमेतद्यदुतबोधिर्ब्बोध्यनुपलब्धितामुपादाय। नाममात्रमेतद्यदुतबुद्धो बुद्धानुपलब्धितामुपादाय। एवं खल्वायुष्मञ्छारद्वतीपुत्र बोधिसत्त्वो महासत्त्वो महायानसमारूढ इत्युच्यते ।

समारोहति। स नैव शीलमुपलभते न शीलपारमितां न बोधिसत्त्वं न तान् सत्त्वविकारानुपलभते। एवं खलु बोधिसत्त्वो महासत्त्वः शीलपारमितासमारूढ इत्युच्यते। अनुपलम्भयोगेन। इदमुच्यते शारद्वतीपुत्र बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् क्षान्तिपारमितां समारोहति। स नैव क्षान्तिमुपलभते न क्षान्तिपारमितां न बोधिसत्त्वं न तान् सत्त्वविकारानुपलभते। एवं खलु बोधिसत्त्वो महासत्त्वः क्षान्तिपारमितां समारूढ इत्युच्यते। अनुपलम्भयोगेन। इदमुच्यते शारद्वतीपुत्र बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् वीर्यपारमितां समारोहति। स नैव वीर्यमुपलभते न वीर्यपारमितां न बोधिसत्त्वं न तान् सत्त्वविकारानुपलभते। एवं खलु बोधिसत्त्वो महासत्त्वो वीर्यपारमितां समारूढ इत्युच्यते अनुपलम्भयोगेन। इदमुच्यते शारद्वतीपुत्र बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् ध्यानपारमितां समारोहति। स नैव ध्यानमुपलभते न ध्यानपारमितां न बोधिसत्त्वं न तान् [illegible]

प्रवर्त्तयति। पश्चिमायां दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु बुद्धाभगवन्तो वर्णंभाषन्ते यश उद्गीरयन्ति घोषमनुश्रावयन्ति। एषोऽमुष्मिन् लोकधातौ बोधिसत्त्वो महासत्त्वो महायानमनुत्तरयानं प्रवरयानमभिरुह्य सर्व्वाकारज्ञतामनुप्राप्तः सर्व्वाकारज्ञतामनुप्राप्यधर्म्मचक्रं प्रवर्त्तयति। उत्तरस्यां दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु बुद्धाभगवन्तो वर्णं भाषन्ते यश उद्गीरयन्ति घोषमनुश्रावयन्ति। एषोऽमुष्मिन् लोकधातौ बोधिसत्त्वो महासत्त्वो महायानमनुत्तरयान प्रवरयानमभिरुह्य सर्व्वाकारज्ञतामनुप्राप्तः सर्व्वाकारज्ञतामनुप्राप्यधर्म्मचक्रं प्रवर्त्तयति। पूर्व्वदक्षिणस्यान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु बुद्धाभगवन्तो वर्णं भाषन्ते यश उद्गीरयन्ति घोषमनुश्रावयन्ति। एषोऽमुष्मिन् लोकधातौ बोधिसत्त्वो महसत्त्वो महायानमनुत्तरयानं प्रवरयानमभिरुह्य सर्व्वाकारज्ञतामनुप्राप्तः सर्व्वाकारज्ञतामनुप्राप्यधर्म्मचक्र प्रवर्त्तयति। दक्षिणपश्चिमायां दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु बुद्धाभगवन्तो वर्णं भाषन्ते यश उद्गीरयन्ति घोषमनुश्रावयन्ति। एषोऽमुष्मिन् लोकधातौ बोधिसत्त्वो महासत्त्वो महायानमनुत्तरयानं प्रवरयानमभिरुह्य सर्व्वाकारज्ञतामनुप्राप्तः सर्व्वाकारज्ञतामनुप्राप्यधर्म्मचक्रं प्रवर्त्तयन्ति। पश्चिमोत्तरस्यां दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु बुद्धाभगवन्तो वर्णं भाषन्ते यश उद्गीरयन्ति घोषमनुश्रावयन्ति। एषोऽमुष्मिन् लोकधातौ बोधिसत्त्वो महासत्त्वो महायानमनुत्तरयान प्रवरयानमभिरुह्य सर्व्वाकारज्ञतामनुप्राप्तः सर्व्वाकारज्ञतामनुप्राप्यधर्म्मचक्र प्रवर्त्तयति। उत्तरपूर्व्वस्यां दिशि गङ्गानदी-

[illegible] आप्यति । आप्या-
[illegible] । [illegible] । [illegible] [illegible]
[illegible] आप्यति । [illegible]
[illegible] । [illegible] । [illegible] [illegible]
[illegible] आप्यति । [illegible]
[illegible] । [illegible] [illegible]
[illegible] आप्यति । [illegible]
[illegible] । [illegible] [illegible]
[illegible] आप्यति । [illegible] । [illegible]
[illegible] । [illegible] [illegible]
[illegible] । [illegible] । [illegible]
[illegible] [illegible]
[illegible] । [illegible]
[illegible]

[illegible]

सन्नद्ध। अध्यात्मशून्यतासन्नाहं सन्नद्ध वहिर्द्धाशून्यतासन्नाहं सन्नद्ध। अध्यात्मवहिर्द्धाशून्यतासन्नाहं सन्नद्ध शून्यताशून्यतासन्नाहं सन्नद्ध महाशून्यतासन्नाहं सन्नद्ध परमार्थशून्यतासन्नाहं सन्नद्ध संस्कृतशून्यतासन्नाहं सन्नद्ध असंस्कृतशून्यतासन्नाहं सन्नद्ध अत्यन्तशून्यतासन्नाहं सन्नद्ध अनवराग्रशून्यतासन्नाहं सन्नद्ध अनवकारशून्यतासन्नाहं सन्नद्ध प्रकृतिशून्यतासन्नाहं सन्नद्ध सर्व्वधर्म्मशून्यतासन्नाहं सन्नद्ध स्वलक्षणशून्यतासन्नाहं सन्नद्ध अनुपलम्भशून्यतासन्नाहं सन्नद्ध अभावशून्यतासन्नाहं सन्नद्ध स्वभावशून्यतासन्नाहं सन्नद्ध अभावस्वभावशून्यतासन्नाहं सन्नद्ध। स्मृत्युपस्थानसन्नाहं सन्नद्ध सम्यक्प्रहाणसन्नाहं सन्नद्ध ऋद्धिपादसन्नाहं सन्नद्ध इन्द्रियसन्नाहं सन्नद्ध बलसन्नाहं सन्नद्ध बोध्यङ्गसन्नाहं सन्नद्ध आर्य्याष्टाङ्गमार्गसन्नाहं सन्नद्ध आर्य्यसत्यसन्नाहं सन्नद्ध ध्यानसन्नाहं सन्नद्ध अप्रमाणसन्नाहं सन्नद्ध आरूप्यसमापत्तिसन्नाहं सन्नद्ध विमोक्षसन्नाहं सन्नद्ध अनुपूर्व्वविहारसमापत्तिसन्नाहं सन्नद्ध शून्यतानिमित्ताप्रणिहितविमोक्षमुखसन्नाहं सन्नद्ध समाधिसन्नाहं सन्नद्ध अभिज्ञासन्नाहं सन्नद्ध धारणीमुखसन्नाहं सन्नद्ध तथागतबलसन्नाहं सन्नद्ध वैशारद्यसन्नाहं सन्नद्ध प्रतिसम्वित्सन्नाहं सन्नद्ध महामैत्रीसन्नाहं सन्नद्ध महाकरुणासन्नाहं सन्नद्ध अष्टादशावेणिकबुद्धधर्म्मसन्नाहं सन्नद्ध सर्व्वाकारज्ञतासन्नाहं सन्नद्ध बुद्धविषयसन्नाहं सन्नद्ध। इयं त्रिसाहस्रं लोकधातूनाभयास्फुरिता। पूर्व्वस्यां दिशि गङ्गानदीवालुकोपमान् लोकधातूनाभयास्फुरति। दक्षिणस्यां दिशि गङ्गानदीवालुकोपमान् लोकधातूनाभयास्फुरति। पश्चिमायां दिशि गङ्गानदीवालुकोपमान

सन्नद्धः। अध्यात्मशून्यतासन्नाहं सन्नद्धः बहिर्द्धाशून्यतासन्नाहं सन्नद्धः। अध्यात्मबहिर्द्धाशून्यतासन्नाहं सन्नद्धः शून्यताशून्यतासन्नाहं सन्नद्धः महाशून्यतासन्नाहं सन्नद्धः परमार्थशून्यतासन्नाहं सन्नद्धः संस्कृतशून्यतासन्नाहं सन्नद्धः असंस्कृतशून्यतासन्नाहं सन्नद्धः अत्यन्तशून्यतासन्नाहं सन्नद्धः अनवराग्रशून्यतासन्नाहं सन्नद्धः अनवकारशून्यतासन्नाहं सन्नद्धः प्रकृतिशून्यतासन्नाहं सन्नद्धः सर्व्वधर्म्मशून्यतासन्नाहं सन्नद्धः स्वलक्षणशून्यतासन्नाहं सन्नद्धः अनुपलम्भशून्यतासन्नाहं सन्नद्धः अभावशून्यतासन्नाहं सन्नद्धः स्वभावशून्यतासन्नाहं सन्नद्धः अभावस्वभावशून्यतासन्नाहं सन्नद्धः। स्मृत्युपस्थानसन्नाहं सन्नद्धः सम्यक्प्रहाणसन्नाहं सन्नद्धः ऋद्धिपादसन्नाहं सन्नद्धः इन्द्रियसन्नाहं सन्नद्धः बलसन्नाहं सन्नद्धः बोध्यङ्गसन्नाहं सन्नद्धः आर्य्याष्टाङ्गमार्गसन्नाहं सन्नद्धः आर्य्यसत्यसन्नाहं सन्नद्धः ध्यानसन्नाहं सन्नद्धः अप्रमाणसन्नाहं सन्नद्धः आरूप्यसमापत्तिसन्नाहं सन्नद्धः विमोक्षसन्नाहं सन्नद्धः अनुपूर्व्वविहारसमापत्तिसन्नाहं सन्नद्धः शून्यतानिमित्ताप्रणिहितविमोक्षमुखसन्नाहं सन्नद्धः समाधिसन्नाहं सन्नद्धः अभिज्ञासन्नाहं सन्नद्धः धारणीमुखसन्नाहं सन्नद्धः तथागतबलसन्नाहं सन्नद्धः वैशारद्यसन्नाहं सन्नद्धः प्रतिसम्विल्सन्नाहं सन्नद्धः महामैत्रीसन्नाहं सन्नद्धः महाकरुणासन्नाहं सन्नद्धः अष्टादशावेणिकबुद्धधर्म्मसन्नाहं सन्नद्धः सर्व्वाकारज्ञतासन्नाहं सन्नद्धः बुद्धविषयसन्नाहं सन्नद्धः। इयं त्रिसाहस्रं लोकधातूनाभयास्फुरिला। पूर्व्वस्यां दिशि गङ्गानदीवालुकोपमान् लोकधातूनाभयास्फुरति। दक्षिणस्यां दिशि गङ्गानदीवालुकोपमान् लोकधातूनाभयास्फुरति। पश्चिमायां दिशि गङ्गानदीवालुकोपमान

कायसंस्पर्शोऽनुपलब्धितामुपादाय। नाममात्रमेतद्यदुतमनःसंस्पर्शो: मनःसंस्पर्शोऽनुपलब्धितामुपादाय। नाममात्रमेतद्यदुतचक्षुःसंस्पर्शजावेदना चक्षुःसंस्पर्शजावेदनाऽनुपलब्धितामुपादाय। नाममात्रमेतद्यदुतश्रोत्रसंस्पर्शजावेदनाश्रोत्रसंस्पर्शजावेदनाऽनुपलब्धितामुपादाय। नाममात्रमेतद्यदुतघ्राणसंस्पर्शजावेदनाघ्राणसंस्पर्शजावेदनाऽनुपलब्धितामुपादाय। नाममात्रमेतद्यदुतजिह्वासंस्पर्शजावेदना जिह्वासंस्पर्शजावेदनाऽनुपलब्धितामुपादाय। नाममात्रमेतद्यदुतकायसंस्पर्शजावेदनाकायसंस्पर्शजावेदनाऽनुपलब्धितामुपादाय। नाममात्रमेतद्यदुतमनःसंस्पर्शजावेदनामनःसंस्पर्शजावेदनाऽनुपलब्धितामुपादाय।

नाममात्रमेतद्यदुतपृथिवीधातुः पृथिवीधात्वनुपलब्धितामुपादाय। नाममात्रमेतद्यदुताऽब्धातुरब्धात्वनुपलब्धितामुपादाय। नाममात्रमेतद्यदुततेजोधातुतेजोधात्वनुपलब्धितामुपादाय। नाममात्रमेतद्यदुतवायुधातुर्व्वायुधात्वनुपलब्धितामुपादाय। नाममात्रमेतद्यदुताकाशधातुराकाशधात्वनुपलब्धितामुपादाय। नाममात्रमेतद्यदुतविज्ञानधातुर्व्विज्ञानधात्वनुपलब्धितामुपादाय। नाममात्रमेतद्यदुताविद्या अविद्याऽनुपलब्धितामुपादाय। नाममात्रमेतद्यदुतसंस्काराः संस्काराऽनुपलब्धितामुपादाय। नाममात्रमेतद्यदुतविज्ञानं विज्ञानाऽनुपलब्धितामुपादाय। नाममात्रमेतद्यदुतनामरूपं नामरूपाऽनुपलब्धितामुपादाय। नाममात्रमेतद्यदुतषड़ायतनं षड़ायतनाऽनुपलब्धितामुपादाय। नाममात्रमेतद्यदुतस्पर्शः स्पर्शोऽनुपलब्धितामुपादाय। नाममात्रमेतद्यदुतवेदनावेदनाऽनुपलब्धितामुपादाय। नाममात्रमेतद्यदुततृष्णातृष्णाऽनुपलब्धितामुपादाय।

.a Kusumāñjali Prakarana, Vol I, Fasc 2-6 ; Vol. II, Fasc 1-3		
10/ each	5	0
nāvati, Fasc 1-5 @ 2/-	10	0
ṣṭa Parvan, Fasc 3-5 @ /10/ each	1	14
ita Paingalam, Fasc 1-7 @ /10/ each	4	6
sī Mukhasutra	1	0
rirāj Rāsa, Part II, Fasc 1-5 @ /10/ each	3	2
tto (English) Part II, Fasc 1 @ 1/- each	1	0
ta Lakṣanam, Fasc 1 @ /1/8 each	1	8
ara Smṛti, Vol I, Fasc 1 8, Vol II, Fasc 1-6, Vol III, Fasc		
@ /10/ each	12	8
ara, Institutes of (English) @ 1/- each	1	0
samukha Sutram	1	0
ndhacintāmani English) Fasc 1-3 @ 1/4/ each	3	12
navam, Fasc 1 2	2	8
r-ana Samuccaya, Fasc 1-2 @ /10/ each	1	4
Vēda Samhitā, Vols I, Fasc 7 10, II, 1 6, III, 1-7; IV, 1 6,		
1-8 @ /10/ each	19	6
ra cca Kaha Fasc 1 2, @ /10/	1	4
ya Sūtra Vṛtti, Fasc 1-4 @ /10/ each	2	8
Ditto (English) Fasc 1 3 @ 1/- each	3	0
ara Vijaya Fasc 2 3 @ /10/ each	1	4
ha Kriyā Kaumudī, Fasc 1 6 @ /10/ each	3	12
lharā Stotra (Sanskrit and Tibetan)	2	0
ta Sutra Latyayan, Fasc 4 9 @ /10/ each	3	12
Ditto Asbalayana, Fasc 4-11 @ /10/ each	5	0
ita Samhitā, (Eng) Fasc 1 @ 1/- each	1	0
a Kaumudī, Fasc 1 4 @ /10/ each	2	8
ya Siddhanta, Fasc 1	1	4
treya Brahmana, Fasc, 11-25 @ /10/ each	9	6
to Pratisakhya, Fasc 1-3 @ /10/ each	1	14
tirīya Samhitā, Fasc 27-45 @ /10/ each	11	14
lya Brahmana, Fasc 10-19 @ /10/ each	6	4
a Vārtika (English) Fasc 1 6 @ /1/4	7	8
ra Cintāmani Vol I, Fasc 1 9, Vol II, Fasc 2 10, Vol III,		
c 1 2, Vol IV, Fasc 1, Vol V, Fasc 1 5, Part IV, Vol II,		
sc 1-12 @ /10/ each	23	12
ārthādhigama Sutram, Fasc 1-3 @ /10/	1	14
nda Mandanam, Fasc 1 3 @ /10/	1	14
Satsai, Fasc 1 5 @ /10/	3	2
mita-bhava prapañca-kathā, Fasc 1, 5-14 @ /10/ each	6	14
agadasão, (Text and English) Fasc 1-6 @ 1/-	6	0
la Carita, Fasc 1 @ /10/	0	10
Kriyā Kaumudi, Fasc 1-6 @ /10/	3	12
u Purāna, Vol I, Fasc 3 6, Vol II, Fasc 1 7, @ /10/ each	6	14
āna Pārijāta, Fasc 1 8, Vol II, Fasc 1 @ /10/	5	10
Ditto Vol II, Fasc 2 3, @ 1/4	2	8
daratnākara, Fasc 1-7 @ /10/ each	4	6
t Svayambhū Purāna, Fasc 1 6 @ /10/	3	12
a Aphorisms of Patanjali, Fasc 3 5 @ /10/ each	1	14
sastra, Fasc 1 2	2	8

Tibetan Series

dhastotrasangraha, Vol I	2	0
wer Ladakhi version of Kesarsaga, Fasc 1 4, @ 1/- each	4	0
abindu of Dharmakirti, Fasc 1	1	0
Sam S'hi Tin, Fasc 1 4 @ 1/- each	4	0
s brjod dpag hkhri S'iñ (Tib & Sans Avadāna Kalpalatā) Vol I,		
sc 1 7 Vol II, Fasc 1 5 @ 1/- each	12	0
-Phyin, Vol I, Fasc 1 5, Vol II, Fasc 1 3, Vol III, Fasc 1-6		
1/ each	14	0

Arabic and Persian Series

ngīrnāmah, with Index, (Text) Fasc 1 13 @ /10/ each	8	2
ūqaddasi (English) Vol I, Fasc 1-3 @ 1/-	3	0
-Akbarī, Fasc, 1 22 @ 1/8/ each	33	0
to (English) Vol I, Fasc 1 7, Vol II, Fasc 1 5, Vol. III,		
sc 1 5 @ 2/- each	34	0

other Fasciculi of these works are out of stock, and complete copies cannot
ed

पादाय । नाममात्रमेतद्यदुतानवकारशून्यताऽनवकारशून्यताऽनुपलब्धितामुपादाय । नाममात्रमेतद्यदुतप्रकृतिशून्यताप्रकृतिशून्यताऽनुपलब्धितामुपादाय । नाममात्रमेतद्यदुतसर्व्वधर्मशून्यतासर्व्वधर्मशून्यताऽनुपलब्धितामुपादाय । नाममात्रमेतद्यदुतस्वलक्षणशून्यतास्वलक्षणशून्यताऽनुपलब्धितामुपादाय। नाममात्रमेतद्यदुतानुपलम्भशून्यताऽनुपलम्भशून्यताऽनुपलब्धितामुपादाय । नाममात्रमेतद्यदुताभावशून्यताऽभावशून्यताऽनुपलब्धितामुपादाय। नाममात्रमेतद्यदुतस्वभावशून्यतास्वभावशून्यताऽनुपलब्धितामुपादाय । नाममात्रमेतद्यदुताऽभावस्वभावशून्यताऽभावस्वभावशून्यताऽनुपलब्धितामुपादाय।

नाममात्रमेतद्यदुतचत्वारि स्मृत्युपस्थानानि चत्वारि स्मृत्युपस्थानान्यनुपलब्धितामुपादाय । नाममात्रमेतद्यदुतचत्वारि सम्यक्प्रहाणानि चत्वारि सम्यक्प्रहाणान्यनुपलब्धितामुपादाय। नाममात्रमेतद्यदुतचत्वार ऋद्धिपादाश्चत्वार ऋद्धिपादाऽनुपलब्धितामुपादाय । नाममात्रमेतद्यदुतपञ्चेन्द्रियाणीन्द्रियाण्यनुपलब्धितामुपादाय । नाममात्रमेतद्यदुतपञ्च बलानि बलान्यनुपलब्धितामुपादाय। नाममात्रमेतद्यदुतसप्त बोध्यङ्गानि बोध्यङ्गान्यनुपलब्धितामुपादाय । नाममात्रमेतद्यदुतार्य्याष्टाङ्गमार्ग आर्य्याष्टाङ्गमार्गोऽनुपलब्धितामुपादाय । नाममात्रमेतद्यदुतार्य्यसत्यानि आर्य्यसत्यान्यनुपलब्धितामुपादाय । नाममात्रमेतद्यदुतध्यानानि ध्यानान्यनुपलब्धितामुपादाय। नाममात्रमेतद्यदुता[illegible] [illegible] [illegible]तामुपादाय। नाममात्रमेतद्यदुता[illegible] [illegible] नाममात्रमेतद्यदुता[illegible] [illegible]

[illegible] Fasc 1-7 @ /10/ each	4	[illegible]
[illegible] Vol I Fasc 1-5 Vol II Fasc 1-2, @ /10/ each	6	1
[illegible] Fasc 1 @ /10/ each	0	10
*[illegible] Vol I, Fasc 5-6; Vol II, Fasc 1-7 [illegible]	5	0
[illegible] Fasc 1 5 2'	10	0
*[illegible] Fasc 1 5 @ /10/ each	1	14
[illegible] Fasc 1-7 @ /10/ each	4	6
[illegible]	1	0
[illegible] Part II Fasc 1-5 @ /10/ each	3	2
Ditto (English) Part II, Fasc 1 @ 1/ each	1	0
[illegible] Fasc 1 @ /10/ each	1	8
[illegible], Vol I, Fasc 1 8, Vol II, Fasc 1 5; Vol III, Fasc 1 [illegible] each	1[illegible]	8
[illegible] (English) @ 1/ each	1	0
[illegible]	1	0
[illegible] (English) Fasc 1 3 @ 1/ each	1	12
[illegible] Fasc 1 2	2	8
[illegible] Fasc 1 2 @ /10/ each	1	4
*[illegible] Veda Samhita, Vols I, Fasc 7 10, II 1 6; III 1-7; IV, 1 6, V 1 8 @ /10/ each	19	6
[illegible] Fasc 1 2 @ /10/	1	4
[illegible] Vrtti Fasc 1-4 @ /10/ each	2	8
Ditto (English) Fasc 1 3 @ 1/ each	3	0
*[illegible] Fasc 2 3 @ /10/ each	1	4
[illegible] Kaumudi, Fasc 1 6 @ /10/ each	3	12
[illegible] (Sanskrit and Tibetan)	2	0
*[illegible] Sutra [illegible], Fasc 4 9 @ /10/ each	3	12
*Ditto Ashvalayana Fasc 8 11 @ /10/ each	5	0
[illegible] Samhita, (Eng) Fasc 1 @ 1/ each	1	0
Suddhi Kaumudi Fasc 1 4 @ /10/ each	2	8
[illegible] Fasc 1	1	1
*Taittireya Brahmana Fasc, 11-25 @ /10/ each	0	6
Ditto Pratisakhya Fasc 1 3 @ /10/ each	1	14
*Taittiriya Samhita, Fasc 27 45 @ /10/ each	11	14
*Tandya Brahmana Fasc 10-19 @ /10/ each	6	4
Tantra Vartika (English) Fasc 1 6 @ /1/4	7	8
*Tattva Cintamani Vol I, Fasc 1 9, Vol II, Fasc 2 10; Vol III, Fasc 1 2, Vol IV Fasc 1, Vol V, Fasc 1 5, Part IV, Vol II, Fasc 1 12 @ /10/ each	23	12
Tattvartha Dhigama Sutram Fasc 1 3 @ /10/	1	14
Trikanda Mandanam Fasc 1 3 @ /10/	1	14
Tul'si Satsai Fasc 1 5 @ /10/	3	2
*Upamiti bhava prapañca katha, Fasc 1, 5 14 @ /10/ each	6	14
Uvasagadasão (Text and English) Fasc 1 6 @ 1/- ...	6	0
Vallala Carita Fasc 1 @ /10/	0	10
Varsa Kriyā Kaumudi, Fasc 1 6 @ /10/	3	12
*Vayu Purana, Vol I, Fasc 3 6, Vol II, Fasc 1-7; @ /10/ each	6	14
Vidhana Parijāta, Fasc 1 8, Vol II Fasc 1 @ /10/	5	10
Ditto Vol II Fasc 2 3, @ 1/4	2	8
Vivādaratnākara, Fasc 1 7 @ /10/ each	4	6
Vrhat Svayambhū Purana Fasc 1 6 @ /10/	3	12
*Yoga Aphorisms of Patanjali, Fasc 3 5 @ /10/ each	1	14
Yogasastra, Fasc 1 2	2	8

Tibetan Series

Bauddhastotrasangraha, Vol I ...	2	0
A Lower Ladakhi version of Kesarsaga, Fasc 1 4, @ 1/- each	4	0
Nyayabindu of Dharmakirti, Fasc 1	1	0
Pag Sam She Tin, Fasc 1 4 @ 1/- each	4	0
Rtogs brjod dpag hkhri S'iñ (Tib & Sans Avadana Kalpalatā) Vol I, Fasc 1 7 Vol II Fasc 1 5 @ 1/- each	12	0
Sher-Phyin, Vol I, Fasc 1 5, Vol II, Fasc 1 3, Vol III, Fasc 1-6 @ 1/ each	14	0

Arabic and Persian Series.

'Alamgirnāmah, with Index, (Text) Fasc 1 13 @ /10/ each	8	2
Al Muqaddasi (English) Vol I, Fasc 1-3 @ 1/-	3	0
Āin i Akbari, Fasc, 1 22 @ 1/8/ each	33	[illegible]
Ditto (English) Vol I, Fasc 1 7, Vol II, Fasc 1 5, Vol III, [illegible] 5 @ 2/ each ...	34	[illegible]

* [illegible] fasciculi of these works are out of stock, and complete copies be [illegible]

पुनरपरमायुष्मञ्छारद्वतीपुत्र बोधिसत्त्वो महासत्त्वः प्रथमचित्तोत्पादमुपादाय बोधिसत्त्व सर्वाभिज्ञां परिपूर्य्य सत्त्वान् परिपाचयति। बुद्धक्षेत्रेण बुद्धक्षेत्रं संक्रामति। बुद्धानां भगवतां सत्कारेणतायै गुरुकरणतायै माननतायै पूजनतायै योऽयं ज्ञापयिकस्तेषां बुद्धानां भगवतां पूजासत्कारणविधिस्तेषां बुद्धानां भगवतामन्तिकाद्धर्मं शृणोति। यदुत एवमेव बोधिसत्त्वयान। स तद्बोधिसत्त्वयानमभिरुह्य बुद्धक्षेत्रेण बुद्धक्षेत्रं संक्रामन् बुद्धक्षेत्रञ्च परिशोधयति। सत्त्वांश्च परिपाचयति। न चास्य बुद्धक्षेत्रसंज्ञा प्रवर्त्तते। सोऽद्वयभूमौ स्थित्वा यथाभिप्रायमात्मभावेन शक्नोति सत्त्वानामर्थं कर्तुं तावदस्य [illegible] अचिन्त्यपरिग्रहः [illegible]। स न जातु तेन यानेन विरहितो भवति। यावत् सर्वाकारज्ञतामनुप्राप्नोति। स सर्वाकारज्ञतामनु- [illegible]

[illegible]

BIBLIOTHECA INDICA:

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

New Series, No. 1269

शतसाहस्रिका प्रज्ञापारमिता ।

ÇATASAHASRIKA PRAJÑA PARAMITA

A

THEOLOGICAL AND PHILOSOPHICAL DISCOURSE

OF

BUDDHA WITH HIS DISCIPLES

(IN A HUNDRED THOUSAND STANZAS)



EDITED BY

PRATAPACANDRA GHOSA

PART I. FAS. XV

CALCUTTA

PRINTED AT THE BAPTIST MISSION PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 1, PARK STREET

1911

सोऽस्मिन् त्रिसाहस्रमहासाहस्रे लोकधातौ यो नैरयिकोऽग्नि-स्कन्धस्तं सर्व्वं निर्व्वाप्य नमस्तस्मै तथागतायार्हते सम्यक् सम्बुद्धायेति शब्दमुदीरयति। घोषमनुश्रावयति। तदा नैरयिकाः सत्त्वास्तं बुद्धशब्दसुखसौमनस्यं प्रतिलभन्ते। ते तेन सुखसौमनस्येन ततो निरयेभ्यो व्युत्तिष्ठन्तो। ते च ततो निरयेभ्यो व्युत्थाय यत्र यत्र लोकधातुषु बुद्धाभगवन्तस्तिष्ठन्ति ध्रियन्ते यापयन्ति धर्म्मञ्च देशयन्ति। ते तत्र तत्रोपपद्यन्ते। सोऽस्मिंस्त्रिसाहस्रमहासाहस्रे लोकधातौ तिर्य्यग्योनिकानां सत्त्वानां तिर्य्यग्योनिदुःखं प्रशमय्य नमस्तस्मै तथागतायार्हते सम्यक् सम्बुद्धायेति शब्दमुदीरयति। घोषमनुश्रावयति। तदा ते तैर्य्यग्योनिकः सत्त्वास्तं बुद्धशब्दं श्रुत्वा सुखसौमनस्यं प्रतिलभन्ते। ते तेन सुखसौमनस्येन ततस्तिर्य्यग्योनिभ्यो व्युत्तिष्ठन्ते। ते ततस्तिर्य्यग्योनेव्युत्थाय यत्र यत्र बुद्धक्षेत्रे बुद्धाभगवन्तस्तिष्ठन्ति ध्रियन्ते यापयन्ति धर्म्मञ्च देशयन्ति। तत्र तत्रोपपद्यन्ते। ततोऽस्मिंस्त्रिसाहस्रमहासाहस्रे लोकधातौ यामलौकिकानां सत्त्वानां यमलोकदुःखं प्रशमय्य नमस्तस्मै तथागतायार्हते सम्यक् सम्बुद्धायेति। शब्दमुदीरयति। घोषमनुश्रावयति। ततो यामलौकिकाः सत्त्वास्तञ्च बुद्धशब्दं श्रुत्वा सुखसौमनस्यं प्रतिलभन्ते। ते तेन सुखसौमनस्येन ततो यमलोकाद्व्युत्तिष्ठन्ते। ततो यमलोकाद्व्युत्थाय यत्र यत्र बुद्धक्षेत्रेषु बुद्धाभगवन्तस्तिष्ठन्ति ध्रियन्ते यापयन्ति धर्म्मञ्च देशयन्ति। तत्र तत्रोपपद्यन्ते। स पूर्व्वस्यां दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु योनैरयिकोऽग्निस्कन्धस्तं सर्व्वं

प्रतिलभन्ते। तेन सुखसौमनस्येन ततो नरकेभ्यो व्युत्तिष्ठन्ते। ततो नरकेभ्यो व्युत्थाय यत्र यत्र बुद्धक्षेत्रेषु बुद्धाभगवन्तस्तिष्ठन्ति ध्रियन्ते यापयन्ति धर्मञ्च देशयन्ति। तत्र तत्रोपपद्यन्ते। सदक्षिणं पूर्व्वस्यान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु यो नैरयिकोऽग्निस्कन्धस्तं सर्व्वं निर्व्वाप्यं नमस्तस्मै तथागतायार्हते सम्यक् सम्बुद्धायेति शब्दमुदीरयति घोषमनुश्रावयति। तदा ते नैरयिकाः सत्त्वास्तं बुद्धशब्दं श्रुत्वा सुखसौमनस्यं प्रतिलभन्ते। तेन सुखसौमनस्येन ततो नरकेभ्यो व्युत्तिष्ठन्ते। ततो नरकेभ्यो व्युत्थाय यत्र यत्र बुद्धक्षेत्रेषु बुद्धाभगवन्तस्तिष्ठन्ति ध्रियन्ते यापयन्ति। धर्मञ्च देशयन्ति। तत्र तत्रोपपद्यन्ते। सदक्षिणपश्चिमायान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु यो नैरयिकोऽग्निस्कन्धस्तं सर्व्वं निर्व्वाप्य नमस्तस्मै तथागतायार्हते सम्यक् सम्बुद्धायेति शब्दमुदीरयति। घोषमनुश्रावयति। तदा ते नैरयिकाः सत्त्वास्तं बुद्धशब्द श्रुत्वा सुखसौमनस्यं प्रतिलभन्ते। तेन च सुखसौमनस्येन ततो नरकेभ्यो व्युत्तिष्ठन्ते। ततो नरकेभ्यो व्युत्थाय यत्र यत्र बुद्धक्षेत्रेषु बुद्धाभगवन्तस्तिष्ठन्ति ध्रियन्ते यापयन्ति। धर्मञ्च देशयन्ति। तत्र तत्रोपपद्यन्ते। सपश्चिमोत्तरस्यान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु यो नैरयिकोऽग्निस्कन्धस्त सर्व्वं निर्व्वाप्य नमस्तस्मै तथागतायार्हते सम्यक् सम्बुद्धायेति शब्दमुदीरयति। घोषमनुश्रावयति। तदा ते नैरयिकाः सत्त्वास्तं बुद्धशब्दं श्रुत्वा सुखसौमनस्यं प्रतिलभन्ते तेन च सुखसौमनस्येन ततो नरकेभ्यो व्युत्तिष्ठन्ते। ततो नरकेभ्यो व्युत्थाय यत्र यत्र बुद्धाभगवन्तस्तिष्ठन्ति ध्रियन्ते यापयन्ति। धर्मञ्च

लोकधातूनाभयास्फुरति। उत्तरस्यां दिशि गङ्गानदीवालुकोपमान् लोकधातूनाभयास्फुरति। पूर्व्वदक्षिणस्यां दिशि गङ्गानदीवालुकोपमान् लोकधातूनाभयास्फुरति। दक्षिणपश्चिमायां दिशि गङ्गानदीवालुकोपमान् लोकधातूनाभयास्फुरति। पश्चिमोत्तरस्यां दिशि गङ्गानदीवालुकोपमान् लोकधातूनाभयास्फुरति। उत्तरपूर्व्वस्यां दिशि गङ्गानदीवालुकोपमान् लोकधातूनाभयास्फुरति। अधस्ताद्दिशि गङ्गानदीवालुकोपमान् लोकधातूनाभयास्फुरति। उपरिष्टाद्दिशि गङ्गानदीवालुकोपमान् लोकधातूनाभयास्फुरति। इमं त्रिसाहस्रमहासाहस्रलोकधातुं षड्विकारं प्रकम्प्य पूर्व्वस्यां दिशि गङ्गानदीवालुकोपमान् लोकधातून् षड्विकारान् प्रकम्पयति। दक्षिणस्यां दिशि गङ्गानदीवालुकोपमान् लोकधातून् षड्विकारान् प्रकम्पयति। पश्चिमायां दिशि गङ्गानदीवालुकोपमान् लोकधातून् षड्विकारान् प्रकम्पयति। उत्तरस्यां दिशि गङ्गानदीवालुकोपमान् लोकधतून् षड्विकारान् प्रकम्पयति। पूर्व्वदक्षिणस्यां दिशि गङ्गानदीवालुकोपमान् लोकधातून् षड्विकारान् प्रकम्पयति। दक्षिणपश्चिमायां दिशि गङ्गानदीवालुकोपमान् लोकधातून् षड्विकारान् प्रकम्पयति। पश्चिमोत्तरस्यां दिशि गङ्गानदीवालुकोपमान् लोकधातून् षड्विकारान् प्रकम्पयति। उत्तरपूर्व्वस्यां दिशि गङ्गानदीवालुकोपमान् लोकधातून् षड्विकारान् प्रकम्पयति। अधस्ताद्दिशि गङ्गानदीवालुकोपमान् लोकधातून् षड्विकारान् प्रकम्पयति। उपरिष्टाद्दिशि गङ्गानदीवालुकोपमान् लोकधातून् षड्विकारान् प्रकम्पयति।

तिर्य्यग्योनियमलोकोपपन्नानां सत्त्वानां तिर्य्यग्योनि यमलोकदुःखं प्रशमय्य नमस्तस्मै तथागतायार्हते सम्यक् सम्बुद्धायेति शब्दमुदीरयति। घोषमनुश्रावयति। तदा ते तिर्य्यग्योनि यमलोकोपपन्नाः सत्त्वास्तं बुद्धशब्दं श्रुत्वा सुखसौमनस्य प्रतिलभन्ते। तेन च सुखसौमनस्येन तेभ्यस्तिर्य्यग्योनि यमलोकेभ्यो व्युत्तिष्ठन्ते। ते तेभ्यस्तिर्य्यग्योनि यमलोकेभ्यो व्युत्थाय यत्र यत्र बुद्धक्षेत्रेषु बुद्धाभगवन्तस्तिष्ठन्ति ध्रियन्ते यापयन्ति धर्म्मञ्च देशयन्ति। तत्र तत्रोपपद्यन्ते। स दक्षिणस्यान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु तिर्य्यग्योनि यमलोकोपपन्नानां सत्त्वानां तिर्य्यग्योनियमलोकदुःखं प्रशमय्य नमस्तस्मै तथागतायार्हते सम्यक् सम्बुद्धायेति शब्दमुदीरयति। घोषमनुश्रावयति। तदा ते तिर्य्यग्योनि यमलोकोपपन्नाः सत्त्वास्तं बुद्धशब्दं श्रुत्वा सुखसौमनस्यं प्रतिलभन्ते। तेन सुखसौमनस्येन तेभ्यस्तिर्य्यग्योनि यमलोकेभ्यो व्युत्तिष्ठन्ते। तेभ्यस्तिर्य्यग्योनि यमलोकेभ्यो व्युत्थाय यत्र यत्र बुद्धक्षेत्रे बुद्धाभगवन्ततिष्ठन्ति ध्रियन्ते यापयन्ति धर्म्मञ्च देशयन्ति। तत्र तत्रोपपद्यन्ते। स पश्चिमायान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु तिर्य्यग्योनियमलोकोपपन्नानां सत्त्वाना तिर्य्यग्योनियमलोकदुःखं प्रशमय्य नमस्तस्मै तथागतायार्हते सम्यक् सम्बुद्धायेति शब्दमुदीरयति। घोषमनुश्रावयति। तदा ते तिर्य्यग्योनियमलोकोपपन्नाः सत्त्वास्तं बुद्धशब्दं श्रुत्वा सुखसौमनस्यं प्रतिलभन्ते। तेन च सुखसौमनस्येन तेभ्यस्तिर्य्यग्योनियमलोकेभ्यो व्युत्तिष्ठन्ते। ते तेभ्यस्तिर्य्यग्योनियमलोकेभ्यो। व्युत्थाय यत्र यत्र बुद्धक्षेत्रेषु बुद्धाभगवन्तस्तिष्ठन्ति ध्रियन्ते याप-

व्युत्तिष्ठन्ते ते तेभ्यस्तिर्य्यग्योनियमलोकेभ्यो व्युत्थाय यत्र यत्र बुद्धा-भगवन्तस्तिष्ठन्ति म्रियन्ते यापयन्ति धर्म्मञ्च देशयन्ति। तत्र तत्रोपपद्यन्ते। पश्चिमोत्तरस्यान्दिशि गङ्गानदीवालुकोपमेषु लोक-धातुषु तिर्य्यग्योनियमलोकोपपन्नानां सत्त्वानां तिर्य्यग्योनियम-लोकदुःख प्रशमय्य नमस्तस्मै तथागतायार्हते सम्यक् सम्बुद्धायेति शब्दमुदीरयति। घोषमनुश्रावयति। तदा ते तिर्य्यग्योनियमलो-कोपपन्नाः सत्त्वास्तं बुद्धशब्दं श्रुत्वा सुखसौमनस्य प्रतिलभन्ते। तेन सुखसौमनस्येन तेभ्यस्तिर्य्यग्योनियमलोकेभ्यो व्युत्तिष्ठन्ते। तेभ्य-स्तिर्य्यग्योनियमलोकेभ्यो व्युत्थाय यत्र यत्र बुद्धक्षेत्रेषु बुद्धाभगवन्त-स्तिष्ठन्ति म्रियन्ते यापयन्ति धर्म्मञ्च देशयन्ति। तत्र तत्रोप-पद्यन्ते। स उत्तरपूर्व्वस्यान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु तिर्य्यग्योनियमलोकोपपन्नानां सत्त्वानां तिर्य्यग्योनियमलोकदुःखं प्रशमय्य नमस्तस्मै तथागतायार्हते सम्यक् सम्बुद्धायेति शब्दमुदी-रयति। घोषमनुश्रावयति। तदा ते तिर्य्यग्योनियमलोकोपपन्नाः सत्त्वास्तं बुद्धशब्दं श्रुत्वा सुखसौमनस्य प्रतिलभन्ते। तेन सुखसौ-मनस्येन तेभ्यस्तिर्य्यग्योनियमलोकेभ्यो व्युत्तिष्ठन्ते। ते तेभ्यस्तिर्य्य-ग्योनियमलोकेभ्यो व्युत्थाय यत्र यत्र बुद्धक्षेत्रेषु बुद्धाभगवन्तस्तिष्ठन्ति म्रियन्ते यापयन्ति धर्म्मञ्च देशयन्ति। तत्र तत्रोपपद्यन्ते। सोऽधस्ताद्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु तिर्य्यग्योनिय-मलोकोपपन्नानां सत्त्वाना तिर्य्यग्योनियमलोकदुःख प्रशमय्य नमस्तस्मै तथागतायार्हते सम्यक् सम्बुद्धायेति शब्दमुदीरयति। घोषमनुश्रावयति। तदा ते तिर्य्यग्योनियमलोकोपपन्ना सत्त्वास्तं

भवति । तत्कस्य हेतोः । धर्म्मतैषा सुभूते धर्म्मानामाया धर्म्मतामुपादाय । एवं खलु सुभूते बोधिसत्त्वो महासत्त्वो महासन्नाह सन्नद्ध इत्युच्यते ।

पुनरपरं सुभूते बोधिसत्त्वो महासत्त्वो दानपारमितायां स्थित्वा महासत्त्वाह सहस्त्रिसाहस्त्र महासाहस्त्र लोकधातुं वैदूर्य्यमयमभिनिर्म्मिमीते वैदूर्य्यमयमभिनिर्म्माय चक्रवर्त्तिव्युहमभिनिर्म्मीते । चक्रवर्त्तिव्यूहमभिनिर्माय अन्नमन्नार्थिकेभ्यो ददाति । पानं पानार्थिकेभ्यो ददाति । यान यानार्थिकेभ्यो ददाति । वस्त्र वस्त्रार्थिकेभ्यो ददाति । पुष्पं पुष्पार्थिकेभ्यो ददाति । माल्यं माल्यार्थिकेभ्यो ददाति । गन्धं गन्धार्थिकेभ्यो ददाति । विलेपन विलेपनार्थिकेभ्यो ददाति । शयनमासन शयनासनार्थिकेभ्यो ददाति । उपाश्रयमुपाश्रयार्थिकेभ्यो ददाति । प्राजीविकं प्राजीविकार्थिकेभ्यो ददाति । उपकरनमुपकरनार्थिकेभ्यो ददाति । ग्लानप्रत्ययभैषज्यपरिष्कार ग्लानप्रत्ययभैषज्यपरिष्कारार्थिकेभ्यो ददाति । मणिमुक्तावैदूर्य्यशङ्खशिलाप्रवालरजतजातरूपार्थिकेभ्यो मणिमुक्तावैदूर्य्यशङ्खशिलाप्रवालरजतजातरूपाणि ददाति । यावदन्यतरान्यतरान् मानुष्यकान् परिष्कारान् ददाति । सोऽन्नमन्नार्थिकेभ्यो दत्वा पान पानार्थिकेभ्यो दत्वा यान यानार्थिकेभ्यो दत्वा वस्त्र वस्त्रार्थिकेभ्यः पुष्प पुष्पार्थिकेभ्य । माल्य माल्यार्थिकेभ्यः गन्ध गन्धार्थिकेभ्यः विलेपन विलेपनार्थिकेभ्यः शयनमासन शयनासनार्थिकेभ्यः उपाश्रयमुपाश्रयार्थिकेभ्य प्राजीविक प्राजीविकार्थिकेभ्यः उपकरनमुपकरनार्थिकेभ्य ग्लानप्रत्ययभैषज्यपरिष्कार

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL,

No. 1, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

The Society's Agents—

MR. BERNARD QUARITCH, 11, *Grafton Street, New Bond Street, Lond[illegible]*

AND MR OTTO HARRASSOWITZ, BOOKSELLER, *Leipzig, Germany*

---

*Complete copies of those works marked with an asterisk * cannot be suppl[illegible]— of the Fasciculi being out of stock*

BIBLIOTHECA INDICA

Sanskrit Series

Advaitachintā Kaustubha, Fasc 1-3 @ /10/ each .. Rs 1

Aitareya Brāhmaṇa, Vol I, Fasc 1-5, Vol. II, Fasc 1-5, Vol. III, Fasc 1-5, Vol IV, Fasc. 1-8 @ /10/ each 14

Aitareyalocana 2

*Anu Bhāshya, Fasc 2-5 @ /10/ each 2

Ashtasāhasrikā Prajñāpāramitā, Fasc 1-6 @ /10/ each 3

Ātmatattvaviveka, Fasc I 0

Aç[illegible]vidyaka, Fasc 1-5 @ /10/ each 3

Avadāna Kalpalatā, (Sans and Tibetan) Vol I, Fasc. 1-8 Vol. II, Fasc 1-8 @ 1/ each 16

Bālam Bhaṭṭī, Vol I, Fasc 1-2, Vol II, Fasc 1, @ /10/ each ... 1

B[illegible] Sūtra, Fasc 1-[illegible], Vol II, Fasc 1-3 @ /10/ each 3

Bhāṭṭa Dīpikā, Vol I, Fasc 1-6, Vol II, Fasc 1, @ /10/ each 4

B[illegible]stotrasangrahah . ... [illegible]

B[illegible]devatā, Fasc 1-4 @ /10/ each .. ... [illegible]

B[illegible]dharma Purāṇa, Fasc 1-6 @ /10/ each 3

B[illegible] of Çāntideva, Fasc 1-5 @ /10/ each .. 3

[illegible] Charita, Fasc 1-[illegible] 1

[illegible] Fasc 1-2 @ /10/ each 1

[illegible] Books and MSS, Fasc 1-4 @ 2/ each ... 8

[illegible] Brāhmaṇa, Vol I, Fasc 1-7, Vol II, Fasc 1-5 Vol III, Fasc 1-7, Vol V, Fasc 1-4 @ /10/ each ... 14

[illegible] Vol VI Fasc 1-3 @ 1 4/ each .. [illegible]

[illegible] Vol VII, Fasc 1-5 @ /10/ ... [illegible]

[illegible] Part I, Fasc 1-14 @ /10/ each [illegible]

*[illegible] Vol II Fasc 1-2, Vol III, Part I, [illegible] 1-4, Part II, Fasc 1-10, Vol IV, Fasc 1-6 @ /10/ each .. 30

[illegible] Vol II, Fasc 7-[illegible], @ 1 4/ each .. [illegible]

[illegible] Vol II, [illegible] /10/ ... [illegible]

[illegible] 1-7 [illegible] 1/4 each . [illegible]

*[illegible] Vol I, Fasc 1-7, Vol II, Fasc 1-[illegible] III [illegible] 1-[illegible] Vol [illegible] @ /10/ each ... 10

[illegible]

पानार्थिकेभ्यो ददता यानं यानार्थिकेभ्यो ददता वस्त्रं वस्त्रार्थिकेभ्यो ददता पुष्पं पुष्पार्थिकेभ्यो ददता माल्यं माल्यार्थिकेभ्यो ददता गन्धं गन्धार्थिकेभ्यो ददता विलेपनं विलेपनार्थिकेभ्यो ददता शयनासनं शयनासनार्थिकेभ्यो ददता उपाश्रयमुपाश्रयार्थिकेभ्यो ददता प्राजीविकं प्राजीविकार्थिकेभ्यो ददता उपकरणमुपकरणार्थिकेभ्यो ददता ग्लानप्रत्ययभैषज्यपरिष्कारान् ग्लानप्रत्ययभैषज्यपरिष्कारार्थिकेभ्यो ददता मणिमुक्तावैदूर्य्यशङ्खशिलाप्रवालरजतजातरूपाणि मणिमुक्तावैदूर्य्यशङ्खशिलाप्रवालरजतजातरूपार्थिकेभ्यो ददता यावदन्यतरान्यतरान् मानुष्यकान् परिष्कारान् ददता न कस्मैचित्सत्वाय किञ्चिद्दत्तं भवति। तत्कस्य हेतोः धर्म्मतैषा सुभूते धर्म्माणां मायाधर्म्मतामुपादाय। एवं खलु सुभूते बोधिसत्वो महासत्वो महासन्नाऽसन्नद्ध इत्युच्यते।

पुनरपरं सुभूते बोधिसत्वो महासत्वः शीलपारमितायां स्थित्वा सञ्चिन्त्योपपत्तिपरिग्रहेण चक्रवर्त्तिकुले प्रत्याजायते। स तत्र चक्रवर्त्तिसय्यैस्थित्वा सत्वान् दशकुशलेषु कर्म्मपथेषु प्रतिष्ठापयति। स चतुर्षुध्यानेष्वप्रमाणेषु चतसृष्वारूप्यसमापत्तिषु पञ्चस्वभिज्ञासु चतुर्षुस्मृत्युपस्थानेषु चतुर्षु सम्यक् प्रहाणेषु चतुर्षुवृद्धिपादेषु पञ्चस्विन्द्रियेषु पञ्चसुवलेषु सप्तसुबोध्यङ्गेषु। आर्य्याष्टाङ्गमार्गे शून्यतानिमित्ताप्रणिहितविमोक्षसुखेषु नवस्वनुपूर्व्वविहारसमापत्तिषु चतुर्ष्वार्य्यसत्त्वेषु सर्व्वसमाधिषु सर्व्वधारणीमुखेषु दशसु तथागतवलेषु चतुर्षुवैशारद्येषु चतसृषु प्रतिसम्बित्सु महामैत्र्यां महाकरुणायां अष्टादशास्वावेणिकबुद्धधर्म्मेषु प्रतिष्ठापयति। ते

निर्व्वाप्य नमस्तस्मै तथागतायार्हते सम्यक् सम्बुद्धायेति शब्दमुदीरयति घोषमनुश्रावयति। तदा ते नैरयिकाः सत्त्वास्तं बुद्धशब्दं श्रुत्वा सुखसौमनस्यं प्रतिलभन्ते। ते तेन सुखसौमनस्येन ततो नरकेभ्यो व्युत्तिष्ठन्ते। ततो नरकेभ्यो व्युत्थाय यत्र यत्र बुद्धक्षेत्रेषु बुद्धाभगवन्तस्तिष्ठन्ति ध्रियन्ते यापयन्ति धर्म्मञ्च देशयन्ति तत्र तत्रोपपद्यन्ते। स दक्षिणस्यान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु नैरयिकोऽग्निस्कन्धस्तं सर्व्वं निर्व्वाप्य नमस्तस्मै तथागतायार्हते सम्यक् सम्बुद्धायेति शब्दमुदीरयति। घोषमनुश्रावयति। तदा ते नैरयिकः सत्त्वास्तं बुद्धशब्दं श्रुत्वा सुखसौमनस्यं प्रतिलभन्ते। तेन सुखसौमनस्येन ततो नरकेभ्यो व्युत्तिष्ठन्ते। ते ततो नरकेभ्यो व्युत्थाय यत्र यत्र बुद्धक्षेत्रेषु बुद्धाभगवन्तस्तिष्ठन्ति ध्रियन्ते यापयन्ति। धर्म्मांश्च देशयन्ति। तत्र तत्रोपपद्यन्ते। सपश्चिमायां दिशिगङ्गानदीवालुकोपमेषु लोकधातुषु यो नैरयिकोऽग्निस्कन्धस्तं सर्व्वं निर्व्वाप्य नमस्तस्मै तथागतायार्हते सम्यक् सम्बुद्धायेति शब्दमुदीरयति। घोषमनुश्रावयति। तदा ते नैरयिकाः सत्त्वास्तं बुद्धशब्दं श्रुत्वा सुखसौमनस्यं प्रतिलभन्ते। तेन सुखसौमनस्येन ततो नरकेभ्यो व्युत्तिष्ठन्ते। ततो नरकेभ्यो व्युत्थाय यत्र यत्र बुद्धक्षेत्रेषु बुद्धाभगवन्तस्तिष्ठन्ति ध्रियन्ते यापयन्ति धर्म्मांश्च देशयन्ति। तत्र तत्रोपपद्यन्ते। स उत्तरस्यान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु यो नैरयिकोऽग्निस्कन्धस्तं सर्व्वं निर्व्वाप्य नमस्तस्मै तथागतायार्हते सम्यक् सम्बुद्धायेति शब्दमुदीरयति घोषमनुश्रावयति। तदा ते नैरयिकाः सत्त्वास्तं बुद्धशब्दं श्रुत्वा सुखसौमनस्यं

एाप्य चतुर्षु ध्यानेषु चतुर्ष्वप्रमाणेषु चतसृष्वारूप्यसमापत्तिषु पञ्चस्वभिज्ञासु चतुर्षु स्मृत्युपस्थानेषु चतुर्षु सम्यक्प्रहाणेषु चतुर्ष्वृद्धिपादेषु पञ्चस्विन्द्रियेषु पञ्चसु बलेषु सप्तसुबोध्यङ्गेषु आर्य्याष्टाङ्गमार्गे शून्यतानिमित्ताऽप्रणिहितविमोक्षमुखेषु अष्टासु विमोक्षेषु नवस्वनुपूर्व्वविहारसमापत्तिषु चतुर्ष्वार्य्यसत्येषु सर्व्वसमाधिषु सर्व्वधारणीमुखेषु दशसु तथागतबलेषु चतुर्षु वैशारद्येषु चतसृषु प्रतिसम्विसु महामैत्र्यां महाकरुणायां अष्टादशावेणिकबुद्धधर्मेषु न कश्चित् सत्त्वः प्रतिष्ठापितो भवति। तत्कस्य हेतोः। धर्मातपासुभूते धर्म्माणां मायाधर्मतामुपादाय। एवं खलु सुभूते बोधिसत्त्वो महासत्त्वो महासन्नाहसन्नद्ध इत्युच्यते।

पुनरपरं सुभूते बोधिसत्त्वो महासत्त्वः क्षान्तिपारमितायां स्थित्वा सर्व्वसत्त्वान् क्षान्तिपारमितायां नियोजयति प्रतिष्ठापयति। कथञ्च सुभूते बोधिसत्त्वो महासत्त्वः क्षान्तिपारमितायां स्थित्वा सर्व्वसत्त्वान् क्षान्तिपारमितायां नियोजयति प्रतिष्ठापयति। इह सुभूते बोधिसत्त्वो महासत्त्वः प्रथमचित्तोत्पादमुपादायैव एवं सन्नह्यति। स चेत् सर्व्वसत्त्वा मे लोष्टदण्डशस्त्रप्रहारान् दद्युः नैव मयैकमपि क्षोभसहगतं चित्तं नोत्पादयितव्यं। सर्व्वसत्त्वांश्चैव रूपायां क्षान्तौ प्रतिष्ठापयति।

तद्यथापि नाम सुभूते दक्षो मायाकारो मायाकारान्तेवासी वा चतुर्महापथे महतो जनकायस्य पुरतो महान्तं जनकायमभिनिर्माय क्षान्तिपारमितायां नियोजयेत् प्रतिष्ठापयेत् तत् किं मन्यसे सुभूतेऽपि नु तेन मायाकारेण मायाकारान्तेवासिना वा



सत्त्वान् कायिकचैतसिकवीर्य्ये प्रतिष्ठाप्य न कश्चित् सत्त्वः कायिकचैतसिकवीर्य्ये प्रतिष्ठापितो भवति । तत्कस्य हेतोः धर्म्मतैषा सुभूते धर्म्माणां मायाधर्म्मतामुपादाय । एवं खलु बोधिसत्त्वो महासत्त्वो महासन्नाह सन्नद्ध इत्युच्यते ।

पुनरपरं सुभूते बोधिसत्त्वो महासत्त्वो ध्यानपारमितायां स्थित्वा सर्व्वसत्त्वान् ध्यानपारमितायां समादापयति निवेशयति प्रतिष्ठापयति । कथञ्च सुभूते बोधिसत्त्वो महासत्त्वो ध्यानपारमितायां स्थित्वा सर्व्वसत्त्वान् ध्यानपारमितायां समादापयति निवेशयति प्रतिष्ठापयति । इह सुभूते बोधिसत्त्वो महासत्त्वः सर्व्वधर्म्मसमतायां स्थित्वा यच्च कस्यचिद्धर्म्मस्य विक्षेपं वा समनुपश्यति ध्यानपारमितायां स्थितो भवति । स तत्रैव सत्त्वान् ध्यानपारमितायां समादापयति । निवेशयति । प्रतिष्ठापयति । ते च समादापिता न जातु विरहिता भवन्ति ध्यानपारमितायाः यावदनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यन्ते । तद्यथापि नाम सुभूते दक्षो मायाकारो मायाकारान्तेवासी वा चतुर्महापथे महतो जनकायस्य पुरतो महान्तं जनकायमभिनिर्म्माय ध्यानपारमितायां प्रतिष्ठापयति । तत् किं मन्यसे सुभूतेऽपि नु तेन मायाकारेण वा मायाकारान्तेवासिना वा कश्चित्सत्त्वो ध्यानपारमितायां प्रतिष्ठापितो भवेत् । आह । नो हीदं भगवन् । भगवानाह । एवमेव सुभूते बोधिसत्त्वेन महासत्त्वेन [illegible] प्रतिष्ठाप्य न कश्चित्सत्त्वो ध्यानपारमितायां [illegible] तत्कस्य हेतोः । धर्म्मतैषा [illegible]

मितायां समादापयति निवेशयति प्रतिष्ठापयति। यथैवात्मना ध्यानपारमितायां तिष्ठति। तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् ध्यानपारमितायां समादापयति निवेशयति प्रतिष्ठापयति। यथैवात्मना प्रज्ञापारमितायां तिष्ठति। तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् प्रज्ञापारमितायां समादापयति निवेशयति प्रतिष्ठापयति। धर्म्मं देशयति यदुत या एव षट्पारमिताः। ते सत्त्वास्तं धर्म्मं श्रुत्वा न जातुविरहिता भवन्ति षड्भिः पारमिताभिर्यावदनुत्तरां सम्यक् सम्बोधिमभिसम्बुध्यन्ति।

उत्तरस्यान्दिशि गङ्गानदीवालुकोपमान् लोकधातून् गत्वा यथैवात्मना दानपारमितायां तिष्ठति। तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् दानपारमितायां समादापयति। यथैवात्मना शीलपारमितायां तिष्ठति। तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् शीलपारमिताया समादापयति निवेशयति प्रतिष्ठापयति। यथैवात्मना क्षान्तिपारमितायां तिष्ठति। तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् शीलपारमितायां समादापयति निवेशयति प्रतिष्ठापयति। यथैवात्मना वीर्य्यपारमितायां तिष्ठति। तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् वीर्य्यपारमितायां समादापयति निवेशयति प्रतिष्ठापयति। यथैवात्मना ध्यानपारमितायां तिष्ठति तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् ध्यानपारमितायां समादापयति। यथैवात्मना प्रज्ञापारमितायां तिष्ठति। तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् प्रज्ञापारमितायां समादापयति। निवेशयति प्रतिष्ठापयति। धर्म्मञ्च देशयति

[illegible]

तवोत्पद्यते।

तद्यथापि नाम कुलपुत्र [illegible] चतुर्महाद्वीपके [illegible] पुरतो [illegible] लोकाद्यभिनिर्माय तेषां [illegible] दुर्लभशब्दमुद्घोषयेदेकशब्दमुद्घोषयेद्वा तैरभिनिर्मितकैर्बुद्धशब्देन धर्मशब्देन संघशब्देन ततो नरकेभ्यस्तिर्यग्योनियमलोकेभ्यश्च्युति- [illegible] मुहूर्तेऽपि पुतेन मायाकारेण मायाकारान्ते-वासिना वा कश्चित्सत्त्वो नरकेभ्यस्तिर्यग्योनियमलोकादुद्धृतो भवेत्। आह महोदारं भगवन्। भगवानाह। एवमेव कुलपुत्र बोधि-सत्त्वेन महासत्त्वेन दशसु दिक्षु अप्रमेयासंख्येयेषु लोकधातुषु सत्त्वा-स्तिर्यग्योनिभ्यो दुर्गतिभ्यः परिमोचयेरन् नरकादिभ्यश्च परिमोचितो

धातुषु ये सत्त्वास्तान् सर्व्वान् दानपारमितायां समादापयति निवेशयति प्रतिष्ठापयति। यथैवात्मना शीलपारमितायां तिष्ठति। तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् शीलपारमितायां समादापयति निवेशयति प्रतिष्ठापयति। यथैवात्मना क्षान्तिपारमितायां तिष्ठति। तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् क्षान्तिपारमितायां समादापयति निवेशयति प्रतिष्ठापयति। यथैवात्मना वीर्य्यपारमितायां तिष्ठति। तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् वीर्य्यपारमितायां समादापयति निवेशयति प्रतिष्ठापयति। यथैवात्मना ध्यानपारमितायां तिष्ठति। तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् ध्यानपारमितायां समादापयति निवेशयति प्रतिष्ठापयति। यथैवात्मना प्रज्ञापारमितायां तिष्ठति। तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् प्रज्ञापारमितायां समादापयति निवेशयति प्रतिष्ठापयति। धर्मञ्च देशयति। यदुतेमा एव षट्पारमिताः। ते सत्त्वास्तं धर्म्मं श्रुत्वा न जातुविरहिता भवन्ति षड्भिः पारमिताभिर्यावदनुत्तरां सम्यक् सम्बोधिमभिसम्बुध्यन्ते।

पश्चिमोत्तरस्यान्दिशि गङ्गानदीवालुकोपमान् लोकधातून् गत्वा यथैवात्मना दानपारमितायां तिष्ठति। तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् दानपारमितायां समादापयति निवेशयति प्रतिष्ठापयति। यथैवात्मना शीलपारमितायां तिष्ठति। तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् शीलपारमितायां समादापयति निवेशयति प्रतिष्ठापयति। यथैवात्मना क्षान्तिपारमितायां तिष्ठति।

ग्लानप्रत्ययभैषज्यपरिष्कारार्थिकेभ्यः मणिमुक्तावैदूर्यशङ्खशिला-प्रवालरजतजातरूपाणि मुक्तावैदूर्यशङ्खशिलाप्रवालरजतजातरू-पार्थिकेभ्यः दत्त्वा यावदन्यतराऽन्यतरान् मानुष्यकान् परिष्कारान् दत्त्वातेभ्यः सत्त्वेभ्योधर्म्मं देशयति। यदुतेमामेव षट् पारमिताप्रति-संयुक्त धर्म्मदेशना। ते च खलु पुनः सत्त्वास्तां धर्म्मदेशनां श्रुत्वा न जातुषड्भिः पारमिताभिर्व्विरहितो भवति। यावदनुत्तरां सम्यक् सम्बोधिमभिसम्बुध्यन्ते।

तद्यथापि नाम सुभूते दक्षोमायाकारोमायाकारान्तेवासीवा चतुर्महापथे महतोजननिकायस्याग्रेमहान्त जननिकायमभिनिर्मा-यान्नमन्नार्थिकेभ्यो दद्यात्पान पानार्थिकेभ्यो दद्यात् वस्त्र वस्त्रार्थि-केभ्यो दद्यात् पुष्प पुष्पार्थिकेभ्यो दद्यात् माल्यं माल्यार्थिकेभ्यो दद्यात् गन्ध गन्धार्थिकेभ्यो दद्यात् विलेपन विलेपनार्थिकेभ्यो दद्यात् शयनमासन शयनासनार्थिकेभ्यो दद्यात् उपाश्रयमुपा-श्रयार्थिकेभ्यो दद्यात् आजीविक आजीविकार्थिकेभ्यो दद्यात् उप-करणमुपकरणार्थिकेभ्यो दद्यात् ग्लानप्रत्ययभैषज्यपरिष्कारान् ग्लानप्रत्ययभैषज्यपरिष्कारार्थिकेभ्यो दद्यात् मणिमुक्तावैदूर्य्यशङ्ख-शिलाप्रवाडरजतजातरूपाणि मणिमुक्तावैदूर्य्यशङ्खशिलाप्रवालरजत-जातरूपार्थिकेभ्यो दद्यात् यावदन्यतरान्यतरान् मानुष्यकान् परि-ष्कारान् दद्यात्। तत् किं मन्यसे सुभूतेऽपि नु तेन मायाकारेण मायाकारान्तेवासिनावाकस्यैचित्सत्त्वाय किञ्चिद्दत्त भवेत्। आह नो हीदं भगवन्। भगवानाह। एवमेव सुभूते वोधिसत्त्वेन महा-सत्त्वेन यावच्चक्रवर्त्तिव्यूहमभिनिर्म्मायान्नमन्नार्थिकेभ्यो ददता पान

ध्यानपारमितायां समादापयति निवेशयति प्रतिष्ठापयति । यथैवात्मना प्रज्ञापारमितायां तिष्ठति । तथैव तत्र लोकधातुषु ये सत्त्वान् सर्व्वान् प्रज्ञापारमितायां समादापयति । निवेशयति प्रतिष्ठापयति। धर्म्मञ्च देशयति यदुत या एव षट्पारमिताः ते सत्त्वास्तान् धर्म्मं श्रुत्वा न जातुविरहिता भवन्ति षड्भिः पारमिताभिर्यावदनुत्तरां सम्यक् सम्बोधिमभिसम्बुध्यन्ते ।

अधस्ताद्दिशि गङ्गानदीवालुकोपमान् लोकधातून् गत्वा यथैवात्मना दानपारमितायां तिष्ठति । तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् दानपारमितायां समादापयति निवेशयति प्रतिष्ठापयति । यथैवात्मना शीलपारमितायां तिष्ठति । तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् शीलपारमितायां समादापयति निवेशयति प्रतिष्ठापयति। यथैवात्मना क्षान्तिपारमितायां तिष्ठति । तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् क्षान्तिपारमितायां समादापयति निवेशयति प्रतिष्ठापयति। यथैवात्मना वीर्य्यपारमितायां तिष्ठति । तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् वीर्य्यपारमितायां समादापयति निवेशयति प्रतिष्ठापयति। यथैवात्मना ध्यानपारमिताया तिष्ठति। तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् ध्यानपारमितायां समादापयति निवेशयति प्रतिष्ठापयति । यथैवात्मना प्रज्ञापारमितायां तिष्ठति । तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् प्रज्ञापारमितायां समादापयति निवेशयति प्रतिष्ठापयति । धर्म्मञ्च देशयति यदुत या एव षट्पारमिताः । ते सत्त्वास्तान् धर्म्मं श्रुत्वा न जातुविरहिता भवन्ति

सत्त्वा न जातु विरहितो भवति तथा धर्म्मदेशनया यावदनुत्तरां सम्यक् सम्बोधिमभिसम्बुध्यन्ते।

तद्यथापिनाम सुभूते दक्षोमायाकारोमायाकारान्तेवासीवा-चतुःपथे महतो जननिकायस्य पुरतोमहान्तं जननिकायमभिनिर्म्माय सत्त्वान् दशकुशलेषु कर्म्मपथेषु प्रतिष्ठापयेत्। चतुर्षुध्यानेषु चतुर्ष्वप्रमाणेषु चतसृष्वारूप्यसमापत्तिषु। पञ्चस्वभिज्ञासु चतुर्षु स्मृत्युपस्थानेषु चतर्षु सम्यक् प्रहाणेषु चतुर्ष्वृद्धिपादेषु पञ्चेन्द्रियेषु पञ्चसु वलेषु सप्तसु वोध्यङ्गेषु आर्य्याष्टाङ्गमार्गे शून्यतानिमित्ताप्रणिहितविमोक्षमुखेषु नवस्वनुपूर्व्वविहारसमापत्तिषु चतुर्ष्वार्य्यसत्येषु सर्व्वसमाधिषु सर्व्वधारणीमुखेषु दशसु तथागतवलेषु चतुर्षु वैशारद्येषु चतसृषु प्रतिसम्वित्सु महामैत्र्यां महाकरुणायां अष्टादशस्वावेणिकबुद्धधर्म्मेषु प्रतिष्ठापयेत्। तत् किं मन्यसे सुभूतेऽपि गतेन मायाकारेण मायाकारान्तेवासिनाकश्चित्सत्त्वोदशकुशलेषु कर्म-पथेषु प्रतिष्ठापितोभवेत्। चतुर्षुध्यानेषु चतुर्ष्वप्रमाणेषु चतसृष्वारूप्यसमापत्तिषु पञ्चस्वभिज्ञासु चतुर्षुस्मृत्युपस्थानेषु चतुर्षु सम्यक् प्रहाणेषु चतुर्ष्वृद्धिपादेषु पञ्चस्विन्द्रियेषु पञ्चसुवलेषु सप्तवोध्यङ्गेषु अर्य्याष्टाङ्गमार्गे शून्यतानिमित्ताप्रणिहितविमोक्षमुखेषु। नवस्वनु-पूर्व्वविहारसमापत्तिषु चतुर्ष्वार्य्यसत्येषु सर्व्वसमाधिषु सर्व्वधारणीमुखेषु दशतथागतवलेषु चतुर्षु वैशारद्येषु चतसृषु प्रतिसम्वित्सु महामैत्र्या महाकरुणाया अष्टादशावेणिकबुद्धधर्मेषु प्रतिष्ठापितो भवति। आह। नोहीद भगवन्। एवमेव सुभूते बोधिसत्वेन महासत्त्वेनाप्रमेयाप्यसंख्येयानपि सत्त्वान् दशकुशलेषु कर्म्मपथेषु प्रति-

ध्यानपारमितायां स्थित्वा। अबद्धाऽमुक्तायां प्रज्ञापारमितायां स्थित्वा। अबद्धाऽमुक्तायामध्यात्मशून्यतायां स्थित्वा। अबद्धाऽमुक्तायां बहिर्द्धाशून्यतायां। स्थित्वा अबद्धाऽमुक्तायामध्यात्मबहिर्द्धाशून्यतायां स्थित्वा। अबद्धाऽमुक्तायां शून्यताशून्यतायां स्थित्वा। अबद्धाऽमुक्तायां महाशून्यतायां स्थित्वा। अबद्धाऽमुक्तायां परमार्थशून्यतायां स्थित्वा। अबद्धाऽमुक्तायां संस्कृतशून्यतायां स्थित्वा। अबद्धाऽमुक्तायामसंस्कृतशून्यतायां स्थित्वा। अबद्धाऽमुक्तायामत्यन्तशून्यतायां स्थित्वा। अबद्धाऽमुक्तायामनवराग्रशून्यतायां स्थित्वा। अबद्धाऽमुक्तायामनवकारशून्यतायां स्थित्वा। अबद्धाऽमुक्तायां प्रकृतिशून्यतायां स्थित्वा। अबद्धाऽमुक्तायां सर्व्वधर्म्मशून्यतायां स्थित्वा। अबद्धाऽमुक्तायां स्वलक्षणशून्यतायां स्थित्वा। अबद्धाऽमुक्तायामनुपलम्भशून्यतायां स्थित्वा। अबद्धाऽमुक्तायामभावशून्यतायां स्थित्वा। अबद्धाऽमुक्तायां स्वभावशून्यतायां स्थित्वा। अबद्धाऽमुक्तायामभावस्वभावशून्यतायां स्थित्वा। अबद्धाऽमुक्तेषु चतुर्षु स्मृत्युपस्थानेषु स्थित्वा। अबद्धाऽमुक्तेषु चतुर्षु सम्यक्प्रहाणेषु स्थित्वा। अबद्धाऽमुक्तेषु चतुर्षु ऋद्धिपादेषु स्थित्वा। अबद्धाऽमुक्तेषु पञ्चस्विन्द्रियेषु स्थित्वा। अबद्धाऽमुक्तेषु पञ्चसु बलेषु स्थित्वा। अबद्धाऽमुक्तेषु सप्तसु बोध्यङ्गेषु स्थित्वा। अबद्धाऽमुक्ते आर्य्याष्टाङ्गमार्गे स्थित्वा। अबद्धाऽमुक्तेष्वार्य्यसत्येषु स्थित्वा। अबद्धाऽमुक्तेषु चतुर्षु ध्यानेषु स्थित्वा। अबद्धाऽमुक्तेषु चतुर्ष्वप्रमाणेषु स्थित्वा। अबद्धाऽमुक्तासु चतुर्ष्वारूप्यसमापत्तिषु स्थित्वा। अबद्धाऽमुक्तेषु अष्टासु विमोक्षेषु स्थित्वा। अबद्धाऽमुक्तासु नवस्वनुपूर्व्वविहारसमापत्तिषु स्थित्वा। अबद्धाऽमु[illegible] [illegible]तानिमित्ताप्रणिहितेषु विमोक्षमुखेषु [illegible]। अबद्धाऽ[illegible]

संस्कृतशून्यताऽबद्धाऽमुक्ता। विविक्तत्वादसंस्कृतशून्यताऽबद्धाऽमुक्ता। अनुत्पन्नत्वादसंस्कृतशून्यताऽबद्धाऽमुक्ता। असत्त्वादत्यन्तशून्यताऽबद्धाऽमुक्ता। विविक्तत्वादत्यन्तशून्यताऽबद्धाऽमुक्ता। अनुत्पन्नत्वादत्यन्तशून्यताऽबद्धाऽमुक्ता। असत्त्वादनवराग्रशून्यताऽबद्धाऽमुक्ता। विविक्तत्वादनवराग्रशून्यताऽबद्धाऽमुक्ता। अनुत्पन्नत्वादनवराग्रशून्यताऽबद्धाऽमुक्ता। असत्त्वादनवकारशून्यताऽबद्धाऽमुक्ता। विविक्तत्वादनवकारशून्यताऽबद्धाऽमुक्ता। अनुत्पन्नत्वादनवकारशून्यताऽबद्धाऽमुक्ता। असत्त्वात्प्रकृतिशून्यताऽबद्धाऽमुक्ता। विविक्तत्वात्प्रकृतिशून्यताऽबद्धाऽमुक्ता। अनुत्पन्नत्वात्प्रकृतिशून्यताऽबद्धाऽमुक्ता। असत्त्वात् सर्व्वधर्मशून्यताऽबद्धाऽमुक्ता। विविक्तत्वात् सर्व्वधर्मशून्यताऽबद्धाऽमुक्ता। अनुत्पन्नत्वात् सर्व्वधर्मशून्यताऽबद्धाऽमुक्ता। असत्त्वात् स्वलक्षणशून्यताऽबद्धाऽमुक्ता। विविक्तत्वात् स्वलक्षणशून्यताऽबद्धाऽमुक्ता। अनुत्पन्नत्वात् स्वलक्षणशून्यताऽबद्धाऽमुक्ता। असत्त्वादनुपलम्भशून्यताऽबद्धाऽमुक्ता। विविक्तत्वादनुपलम्भशून्यताऽबद्धाऽमुक्ता। अनुत्पन्नत्वादनुपलम्भशून्यताऽबद्धाऽमुक्ता। असत्त्वादभावशून्यताऽबद्धाऽमुक्ता। विविक्तत्वादभावशून्यताऽबद्धाऽमुक्ता। अनुत्पन्नत्वादभावशून्यताऽबद्धाऽमुक्ता। असत्त्वात् स्वभावशून्यताऽबद्धाऽमुक्ता। विविक्तत्वात् स्वभावशून्यताऽबद्धाऽमुक्ता। अनुत्पन्नत्वात् स्वभावशून्यताऽबद्धाऽमुक्ता। असत्त्वादभावस्वभावशून्यताऽबद्धाऽमुक्ता। विविक्तत्वादभावस्वभावशून्यताऽबद्धाऽमुक्ता। अनुत्पन्नत्वादभावस्वभावशून्यताऽबद्धाऽमुक्ता।

स्मृत्युपस्थानान्यायुष्मन् पूर्णाऽबद्धान्यमुक्तानि। सम्यक्प्रधानान्य-

कारज्ञतामभिसम्भोत्स्यते। अवद्धामुक्तोऽवद्धामुक्तं धर्म्मचक्रं प्रवर्त्तयिष्यति। अवद्धामुक्तोऽवद्धामुक्तान् सत्त्वां स्त्रिषु यानेषु नियोजयिष्यति। एवं खल्वायुष्मन् पूर्ण वोधिसत्त्वो महासत्त्वोऽवद्धामुक्तोऽवद्धामुक्ताभिः षड्भिः पारमिताभिः सर्व्वधर्म्मा ननु भोत्स्यते। असत्तामुपादाय विविक्ततामुपादाय। अनुत्पादतामुपादाय।

एवं खल्वायुष्मन् पूर्ण वोधिसत्त्वो महासत्त्वोऽवद्धामुक्तो महायान सन्नाह सन्नद्ध इति वेदितव्यः।

अथायुष्मन् सुभूतिर्भगवन्तमेतदवोचत्। कतमद्भगवन् वोधिसत्त्वस्य महासत्त्वस्य महायानं। कियन्तो भगवन् वोधिसत्त्वो महासत्त्वो महायानसम्प्रस्थिता वेदितव्याः। कुतस्तद्यानं निर्यास्यति। क्वातद्यानं स्थास्यति। को वा तेन यानेन निर्यास्यति। एवमुक्ते भगवानायुष्मन्तं सुभूतिमेतदवोचत्। यत्सुभूते एवं वदसि। कतमद्बोधिसत्त्वस्य महासत्त्वस्य महायानं। षट्पारमिता सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं। कतमे षट्। दानपारमिता, शीलपारमिता, क्षान्तिपारमिता, वीर्य्यपारमिता, ध्यानपारमिता, प्रज्ञापारमिता।

इह सुभूते बोधिसत्त्वो महासत्त्वः सर्व्वाकारज्ञता प्रतिसंयुक्तैर्मनसिकारैर्दानमर्थिभ्यो ददाति यदुताऽध्यात्मिकवाह्यानि वस्तुनि तच सर्व्वसत्त्वैः सार्द्धं साधारणं कृत्वा अनुत्तरायां सम्यक् सम्बोधौ परिणामयत्यनुपलम्भयोगेन। इयं वोधिसत्त्वस्य महासत्त्वस्य दानपारमिता। आह। कतमा भगवन् वोधिसत्त्वस्य महासत्त्वस्य शीलपारमिता। भगवानाह। इह सुभूते वोधिसत्त्वो महासत्त्व

युष्मन् पूर्णाऽबद्धान्यमुक्तानि। अभिज्ञा अप्यायुष्मन् पूर्णाऽबद्धा अमुक्ताः। सर्व्वसमाधयोऽप्यायुष्मन् पूर्णाऽबद्धा अमुक्ताः। सर्व्वधारणीमुखान्यप्यायुष्मन् पूर्णाऽबद्धान्यमुक्तानि।

तत्कस्य हेतोः। असत्त्वादायुष्मन् पूर्णार्य्यसत्यान्यबद्धान्यमुक्तानि। विविक्तत्वादार्य्यसत्यान्यबद्धान्यमुक्तानि। अनुत्पन्नत्वादार्य्यसत्यान्यबद्धान्यमुक्तानि। असत्त्वादायुष्मन् पूर्णध्यानान्यबद्धान्यमुक्तानि। विविक्तत्वात् ध्यानान्यबद्धान्यमुक्तानि। अनुत्पन्नत्वात् ध्यानान्यबद्धान्यमुक्तानि। असत्त्वादायुष्मन् पूर्णाऽप्रमाणान्यबद्धान्यमुक्तानि। विविक्तत्वादप्रमाणान्यबद्धान्यमुक्तानि। अनुत्पन्नत्वादप्रमाणान्यबद्धान्यमुक्तानि। असत्त्वादायुष्मन् पूर्णारूप्यसमापत्तयोऽबद्धा अमुक्ताः। विविक्तत्वादारूप्यसमापत्तयोऽबद्धा अमुक्ताः। अनुत्पन्नत्वादारूप्यसमापत्तयोऽबद्धा अमुक्ताः। असत्त्वादायुष्मन् पूर्णविमोचा अबद्धा अमुक्ताः। विविक्तत्वाद्विमोचा अबद्धा अमुक्ताः। अनुत्पन्नत्वाद्विमोचा अबद्धा अमुक्ताः। असत्त्वादायुष्मन् पूर्णनवानुपूर्व्वविहारसमापत्तयोऽबद्धा अमुक्ताः। विविक्तत्वान्नवानुपूर्व्वविहारसमापत्तयोऽबद्धा अमुक्ताः। अनुत्पन्नत्वान्नवानुपूर्व्वविहारसमापत्तयोऽबद्धा अमुक्ताः। असत्त्वादायुष्मन् पूर्णशून्यतानिमित्ताप्रणिहितविमोचमुखान्यबद्धान्यमुक्तानि। विविक्तत्वाच्छून्यतानिमित्ताप्रणिहितविमोचमुखान्यबद्धान्यमुक्तानि। अनुत्पन्नत्वाच्छून्यतानिमित्ताप्रणिहितविमोचमुखान्यबद्धान्यमुक्तानि। असत्त्वादायुष्मन् पूर्णाऽभिज्ञा अबद्धा अमुक्ताः। विविक्तत्वादभिज्ञा अबद्धा अमुक्ताः। अनुत्पन्नत्वादभिज्ञा अबद्धा अमुक्ताः। असत्त्वादायुष्मन् पूर्णसमाधयोऽबद्धा अमुक्ताः। विविक्तत्वात्

क्षणतायां सत्त्वान् समादापयति निवेशयति प्रतिष्ठापयति अनुपलम्भयोगेन। इयं बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमिता। इदं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं।

पुनरपरं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं। यदुताऽध्यात्मशून्यता, वहिर्द्धाशून्यता, अध्यात्मवहिर्द्धाशून्यता, शून्यताशून्यता महाशून्यता, परमार्थशून्यता, संस्कृतशून्यता, असंस्कृतशून्यता। अत्यन्तशून्यता, अनवराग्रशून्यता, अनवकारशून्यता, प्रकृतिशून्यता, सर्व्वधर्म्मशून्यता, स्वलक्षणशून्यता, अनुपलम्भशून्यता, अभावशून्यता, स्वभावशून्यता, अभावस्वभावशून्यता।

तत्र कतमाऽध्यात्मशून्यता, आध्यात्मिकाधर्म्मा उच्यन्ते। चक्षुः श्रोत्र घ्राण जिह्वाकायोमनः। तत्र चक्षुश्चक्षुषाशून्यमकूटस्थाऽविनाशितामुपादाय। तत्कस्य हेतोः प्रकृतिरस्यैषा। श्रोत्रं श्रोत्रेण शून्यमकूटस्थाऽविनाशितामुपादाय। तत्कस्य हेतोः प्रकृतिरस्यैषा। घ्राण घ्राणेन शून्यमकूटस्थाविनाशितामुपादाय। तत्कस्य हेतोः प्रकृतिरस्यैषा। जिह्वा जिह्वया शून्याऽकूटस्थाऽविनाशितामुपादाय। तत्कस्य हेतोः प्रकृतिरस्यैषा। कायः कायेन शून्योऽकूटस्थाऽविनाशितामुपादाय। तत्कस्य हेतोः प्रकृतिरस्यैषा। मनोमनसा शून्यमकूटस्थाविनाशितामुपादाय। तत्कस्य हेतोः प्रकृतिरस्यैषा। इयमुच्यतेऽध्यात्मशून्यता।

तत्र कतमा वहिर्द्धाशून्यता, वाह्याधर्म्मा उच्यन्ते रूपशब्दगन्धरसस्पर्शधर्म्मा। तत्र रूप रूपेण शून्यमकूटस्थाऽविनाशितामुपादाय। तत्कस्य हेतोः प्रकृतिरस्यैषा। शब्द शब्देन शून्योऽकूटस्थाऽविना-

असत्तामुपादाय सर्व्वज्ञताऽवद्धाऽमुक्ता। विविक्ततामुपादाय सर्व्वज्ञताऽवद्धाऽमुक्ता। अनुत्पन्नतामुपादाय सर्व्वज्ञताऽवद्धाऽमुक्ता। असत्तामुपादाय मार्गाकारज्ञताऽवद्धाऽमुक्ता। विविक्ततामुपादाय मार्गाकारज्ञताऽवद्धाऽमुक्ता। अनुत्पन्नतामुपादाय मार्गाकारज्ञताऽवद्धाऽमुक्ता। असत्तामुपादाय सर्व्वाकारज्ञताऽवद्धाऽमुक्ता। विविक्ततामुपादाय सर्व्वाकारज्ञताऽवद्धाऽमुक्ता। अनुत्पन्नतामुपादाय सर्व्वाकारज्ञताऽवद्धाऽमुक्ता। वोधिसत्त्वोऽप्यायुष्मन् पूर्णाऽवद्धोऽमुक्तः। वुद्धोऽप्यवद्धोऽमुक्तः। असत्तामुपादाय वोधिसत्त्वोऽवद्धोऽमुक्तः। विविक्ततामुपादाय वोधिसत्त्वोऽवद्धोऽमुक्तः। अनुत्पन्नतामुपादाय वोधिसत्त्वोऽवद्धोऽमुक्तः। असत्तामुपादाय वुद्धोऽवद्धोऽमुक्तः। विविक्ततामुपादाय वुद्धोऽवद्धोऽमुक्तः। अनुत्पन्नतामुपादाय वुद्धोऽवद्धोऽमुक्तः। तथताप्यायुष्मन् पूर्णाऽवद्धाऽमुक्ता। अवितथताप्यवद्धाऽमुक्ता। अनन्यतथताप्यवद्धाऽमुक्ता। धर्म्मताप्यवद्धाऽमुक्ता। धर्म्मधातुरप्यवद्धोऽमुक्तः। धर्म्मनियामताप्यवद्धाऽमुक्तः। भूतकोटिरप्यवद्धाऽमुक्तः। असत्तामुपादाय तथताऽवद्धाऽमुक्ता। विविक्ततामुपादाय तथताऽवद्धाऽमुक्ता। अनुत्पन्नतामुपादाय तथताऽवद्धाऽमुक्ता। असत्तामुपादाय अवितथताऽवद्धाऽमुक्ता। विविक्ततामुपादायाऽवितथताऽवद्धाऽमुक्ता। अनुत्पन्नतामुपादायाऽवितथताऽवद्धाऽमुक्ता। असत्तामुपादायाऽनन्यतथताऽवद्धाऽमुक्ता। विविक्ततामुपादायाऽनन्यतथताऽवद्धाऽमुक्ता। अनुत्पन्नतामुपादायाऽनन्यतथताऽवद्धाऽमुक्ता। असत्तामुपादाय धर्म्मताऽवद्धाऽमुक्ता। विविक्ततामुपादाय धर्म्मताऽवद्धाऽमुक्ता। अनुत्पन्नतामुपादाय धर्म्मताऽवद्धाऽमुक्ता।

इयमुच्यते परमार्थशून्यता । तत्र कतमा संस्कृतशून्यता । संस्कृत-मुच्यते । कामधातुः रूपधातुः आरूप्यधातुः तत्र कामधातुः कामधातुना शून्यः । रूपधातूरूपधातुना शून्यः । आरूप्यधातु-रारूप्यधातुना शून्यः अकूटस्थाऽविनाशितामुपादाय। तत्कस्य हेतोः प्रकृतिरेषामिय । इयमुच्यते संस्कृतशून्यता । तत्र कतमाऽसंस्कृत-शून्यता । असंस्कृतमुच्यते यस्य नोत्पादो न निरोधो न स्थिते-रन्यथात्वमिदमुच्यते । संस्कृत । तत्राऽसंस्कृतमसंस्कृतेन शून्यमकूट-स्थाऽविनाशितामुपादाय । तत्कस्य हेतोः प्रकृतिरस्यैषा । इयमु-च्यतेऽसंस्कृतशून्यता । तत्र कतमाऽत्यन्तशून्यता यस्यान्तोनोपलभ्यते तदत्यन्तं । अत्यन्तमत्यन्तेन शून्यमकूटस्थाविनाशितामुपादाय । तत्कस्य हेतोः प्रकृतिरस्यैषा इयमुच्यतेऽत्यन्तशून्यता । तत्र कतमा-ऽनवराग्रशून्यता । यस्याऽवरं नोपलभ्यते । नाऽग्रं तस्यागतिर्नोप-लभ्यते नोगतिः । अनवराग्रमनवराग्रेण शून्यमकूटस्थाविनाशि-तामुपादाय । तत्कस्य हेतोः प्रकृतिरस्यैषा । इयमुच्यते ऽनवरा-ग्रशून्यता । तत्र कतमाऽनवकारशून्यता । यत्र न कस्यचिद्धर्मस्य च्छोरणमस्ति, अनवकारोऽनवकारेण शून्योऽकूटस्थाऽविनाशिता-मुपादाय। तत्कस्य हेतोः प्रकृतिरस्यैषा। इयमुच्यतेऽनवकारशून्यता। तत्र कतमाप्रकृतिशून्यता, या सर्व्वधर्म्माणां प्रकृतिः संस्कृतानां वाऽ-संस्कृतानां वा, सा न श्रावकैः कृता न प्रत्येकबुद्धैः न बोधिसत्त्वै महासत्त्वैः न तथागतैरर्हद्भिः सम्यक् सम्बुद्धैः कृता प्रकृतिः प्रकृ-त्याशून्याऽकूटस्थाऽविनाशितामुपादाय । तत्कस्य हेतोः प्रकृतिरस्या इयं । इयमुच्यते प्रकृतिशून्यता । तत्र कतमासर्व्वधर्म्मशून्यता ।

ऽमुक्ता। अनुपलम्भशून्यताऽबद्धाऽमुक्ता। अभावशून्यताऽबद्धाऽमुक्ता। स्वभावशून्यताऽबद्धाऽमुक्ता। अभावस्वभावशून्यताऽबद्धाऽमुक्ता।

स्मृत्युपस्थानान्यबद्धान्यमुक्तानि। सम्यक्प्रहाणान्यबद्धान्यमुक्तानि। ऋद्धिपादा अबद्धा अमुक्ताः। इन्द्रियाण्यबद्धान्यमुक्तानि। बलान्यबद्धान्यमुक्तानि। बोध्यङ्गान्यबद्धान्यमुक्तानि। आर्य्याष्टाङ्गमार्गोऽबद्धोऽमुक्तः। आर्य्यसत्यान्यबद्धान्यमुक्तानि। ध्यानान्यबद्धान्यमुक्तानि। अप्रमाणान्यबद्धान्यमुक्तानि। आरूप्यसमापत्तयोऽबद्धा अमुक्ताः। विमोक्षा अबद्धा अमुक्ताः। अनुपूर्व्वविहारसमापत्तयोऽबद्धा अमुक्ताः। शून्यतानिमित्ताऽप्रणिहितविमोक्षमुखान्यबद्धान्यमुक्तानि। अभिज्ञा अबद्धाऽमुक्ता। समाधयोऽबद्धा अमुक्ताः। धारणीमुखान्यबद्धान्यमुक्तानि। तथागतबलान्यबद्धान्यमुक्तानि। वैशारद्यान्यबद्धान्यमुक्तानि। प्रतिसम्विदोऽबद्धा अमुक्ताः। महामैत्र्यबद्धाऽमुक्ता। महाकरुणाऽबद्धाऽमुक्ता। आवेणिकबुद्धधर्म्मा अबद्धा अमुक्ताः। बोधिरबद्धाऽमुक्ता। सर्व्वज्ञताऽबद्धाऽमुक्ता। मार्गाकारज्ञताऽबद्धाऽमुक्ता। सर्व्वाकारज्ञताऽबद्धाऽमुक्ता। बोधिसत्त्वोऽबद्धोऽमुक्तः। बुद्धोऽबद्धोऽमुक्तः। तथताऽबद्धाऽमुक्ता। अवितथताऽबद्धाऽमुक्ता। अनन्यतथताऽबद्धाऽमुक्ता। धर्म्मताऽबद्धाऽमुक्ता। धर्म्मधातुरबद्धोऽमुक्तः। धर्म्मस्थितिताऽबद्धाऽमुक्ता। धर्म्मनियामताऽबद्धाऽमुक्ता। भूतकोटिरबद्धोऽमुक्तः। असंस्कृतताऽबद्धाऽमुक्ता।

सोऽबद्धाऽमुक्तायां दानपारमितायां स्थित्वा। अबद्धाऽमुक्तायां शीलपारमितायां स्थित्वा। अबद्धाऽमुक्तायां क्षान्तिपारमितायां स्थित्वा। अबद्धाऽमुक्ताया वीर्य्यपारमितायां स्थित्वा। अबद्धाऽमुक्तायां

च्छेदलक्षणाः प्रतिसंविदः । हितोपसंहारलक्षणा महामैत्री । त्राणलक्षणा महाकरुणा । प्रामोद्यलक्षणा महामुदिता । असंकीर्ण-लक्षणा महोपेक्षा । असंहार्यलक्षणा अष्टादशावेणिका बुद्धधर्माः । प्रत्यक्षलक्षणा सर्वाकारज्ञताज्ञानं । यच्च संस्कृतानां धर्माणां लक्षणं यच्चासंस्कृतानां धर्माणां लक्षणं । स्वलक्षणलक्षणेन शून्य एते धर्माः शून्याः कूटस्थाविनाशितामुपादाय । तत्कस्य हेतोः प्रकृतिरेषामियं । इयमुच्यते स्वलक्षणशून्यता । तत्र कतमा अनुपलम्भशून्यता । यत्रातीतं नोपलभ्यते । अनागतं नोपलभ्यते । प्रत्युत्पन्नस्य स्थितिर्नोपलभ्यते । अनुपलम्भोऽनुपलम्भेन शून्यो कूटस्थाविनाशितामुपादाय । तत्कस्य हेतोः प्रकृतिरस्यैषा । इयमुच्यतेऽनुपलम्भशून्यता । तत्र कतमा *अभावस्वभावशून्यता । नास्ति सांयोगिकः स्वभावः प्रतीत्यसमुत्पन्नत्वात् सर्वधर्माणां । संयोगः संयोगेन शून्यो कूटस्थाविनाशितामुपादाय । तत्कस्य हेतोः प्रकृतिरस्यैषा । इयमुच्यतेऽभावस्वभावशून्यता । पुनरपरं सुभूते भावो भावेन शून्यः । अभावोऽभावेन शून्यः । स्वभावः स्वभावेन शून्यः । परभावः परभावेन शून्यः । तत्र कतमो भावः । भाव उच्यते पञ्चस्कन्धाः । पञ्चस्कन्धाः पञ्चस्कन्धैः शून्याः । एवं भावो भावेन शून्यः । कतमोऽभावोऽभावेन शून्यः । अभाव उच्यतेऽसंस्कृतं । तदसंस्कृतमसंस्कृतेन शून्यं । अभावोऽभावेन शून्यः । स्वभावः स्वभावेन शून्यः । परभावः परभावेन शून्यः । स्वभाव उच्यते प्रकृतिरविपरीता । तत्र या शून्यता

* [illegible]

ऽमुक्ता । अनुपलम्भशून्यताऽबद्धाऽमुक्ता । अभावशून्यताऽबद्धाऽमुक्ता । स्वभावशून्यताऽबद्धाऽमुक्ता । अभावस्वभावशून्यताऽबद्धाऽमुक्ता ।

स्मृत्युपस्थानान्यबद्धान्यमुक्तानि । सम्यक्प्रहाणान्यबद्धान्यमुक्तानि । ऋद्धिपादा अबद्धा अमुक्ताः । इन्द्रियाण्यबद्धान्यमुक्तानि । बलान्यबद्धान्यमुक्तानि । बोध्यङ्गान्यबद्धान्यमुक्तानि । आर्याष्टाङ्गमार्गोऽबद्धोऽमुक्तः । आर्यसत्यान्यबद्धान्यमुक्तानि । ध्यानान्यबद्धान्यमुक्तानि । अप्रमाणान्यबद्धान्यमुक्तानि । आरूप्यसमापत्तयोऽबद्धा अमुक्ताः । विमोक्षा अबद्धा अमुक्ताः । अनुपूर्वविहारसमापत्तयोऽबद्धा अमुक्ताः । शून्यतानिमित्ताप्रणिहितविमोक्षमुखान्यबद्धान्यमुक्तानि । अभिज्ञा अबद्धाऽमुक्ता । समाधयोऽबद्धा अमुक्ताः । धारणीमुखान्यबद्धान्यमुक्तानि । तथागतबलान्यबद्धान्यमुक्तानि । वैशारद्यान्यबद्धान्यमुक्तानि । प्रतिसंविदोऽबद्धा अमुक्ताः । महामैत्र्यबद्धाऽमुक्ता । महाकरुणाऽबद्धाऽमुक्ता । आवेणिकबुद्धधर्मा अबद्धा अमुक्ताः । बोधिरबद्धाऽमुक्ता । सर्वज्ञताऽबद्धाऽमुक्ता । मार्गाकारज्ञताऽबद्धाऽमुक्ता । सर्वाकारज्ञताऽबद्धाऽमुक्ता । बोधिसत्त्वोऽबद्धोऽमुक्तः । बुद्धोऽबद्धोऽमुक्तः । तथताऽबद्धाऽमुक्ता । अवितथताऽबद्धाऽमुक्ता । अनन्यतथताऽबद्धाऽमुक्ता । धर्मताऽबद्धाऽमुक्ता । धर्मधातुरबद्धोऽमुक्तः । धर्मस्थितिताऽबद्धाऽमुक्ता । धर्मनियामताऽबद्धाऽमुक्ता । भूतकोटिरबद्धोऽमुक्तः । असंस्कृतताऽबद्धाऽमुक्ता ।

सोऽबद्धाऽमुक्तायां दानपारमितायां स्थित्वा । अबद्धाऽमुक्तायां शीलपारमितायां स्थित्वा । अबद्धाऽमुक्तायां क्षान्तिपारमितायां स्थित्वा । अबद्धाऽमुक्तायां वीर्यपारमितायां स्थित्वा । अबद्धाऽमुक्तायां

छेद्यलक्षणाः प्रतिसम्विदः । हितोपसंहारलक्षणा महामैत्री । त्राणलक्षणा महाकरुणा । प्रामोद्यलक्षणा महामुदिता । असंकीर्ण-लक्षणा महोपेक्षा । असंहार्य्यलक्षणा अष्टादशावेणिका बुद्धधर्म्माः । प्रत्यक्षलक्षणा सर्व्वाकारज्ञताज्ञानं । यच्च संस्कृतानां धर्म्माणां लक्षणं यच्चाऽसंस्कृतानां धर्म्माणां लक्षणं । स्वेनस्वेनलक्षणेन सर्व्व एते धर्म्माः शून्याः अकूटस्थाऽविनाशितामुपादाय । तत्कस्य हेतोः प्रकृतिरेषामियं । इयमुच्यते स्वलक्षणशून्यता । तत्र कतमा अनुपलम्भशून्यता । यत्राऽतीतं नोपलभ्यते । अनागतं नोपलभ्यते । प्रत्युत्पन्नस्य स्थितिर्नोपलभ्यते । अनुपलम्भोऽनुपलम्भेन शून्योऽकूटस्थाविनाशितामुपादाय । तत्कस्य हेतोः प्रकृतिरस्यैषा । इयमुच्यतेऽनुपलम्भशून्यता । तत्र कतमा । *भावस्वभावशून्यता । नास्ति सांयोगिकः स्वभावः प्रतीत्यसमुत्पन्नत्वात् सर्व्वधर्म्माणां । संयोगः संयोगेन शून्योऽकूटस्थाविनाशितामुपादाय । तत्कस्य हेतोः प्रकृतिरस्यैषा । इयमुच्यतेऽभावस्वभावशून्यता । पुनरपरं सुभूते भावो भावेन शून्यः । अभावोऽभावेन शून्यः । स्वभावः स्वभावेन शून्यः । परभावः परभावेन शून्यः । तत्र कतमो भावः । भाव उच्यते पञ्चस्कन्धाः । पञ्चस्कन्धाः पञ्चस्कन्धैः शून्याः । एवं भावो भावेन शून्यः । कतमश्चाभावोऽभावेन शून्यः । अभाव उच्यतेऽसंस्कृतं । तच्चाऽसंस्कृतमसंस्कृतेन शून्यं । अभावोऽभावेन शून्यः । स्वभावः स्वभावेन शून्यः । परभावः परभावेन शून्यः । स्वभाव उच्यते प्रकृतिरविपरीता । तत्र या शून्यता

* [illegible]

ज्ञासु स्थिता। अबद्धामुक्तेषु समाधिषु स्थिता। अबद्धामुक्तेषु धारणीमुखेषु स्थिता। अबद्धामुक्तेषु दशसु तथागतबलेषु स्थिता। अबद्धामुक्तेषु चतुर्षु वैशारद्येषु स्थिता। अबद्धामुक्तासु चतसृषु प्रतिसम्वित्सु स्थिता। अबद्धामुक्तायां महामैत्र्यां स्थिता। अबद्धामुक्तायां महाकरुणायां स्थिता। अबद्धामुक्तेष्वावेणिकबुद्धधर्म्मेषु स्थिता। अबद्धामुक्तायां बोधौ स्थिता। अबद्धामुक्तायां सर्व्वज्ञतायां स्थिता। अबद्धामुक्तायां मार्गाकारज्ञतायां स्थिता। अबद्धामुक्तायां सर्व्वाकारज्ञतायां स्थिता। अबद्धामुक्तायां तथतायां स्थिता। अबद्धामुक्तायामवितथतायां स्थिता। अबद्धामुक्तायामनन्यतथतायां स्थिता। अबद्धामुक्तायां धर्म्मतायां स्थिता। अबद्धामुक्ते धर्म्मधातौ स्थिता। अबद्धामुक्तायां धर्म्मस्थितितायां स्थिता। अबद्धामुक्तायां धर्म्मनियामतायां स्थिता। अबद्धामुक्तायां भूतकोटौ स्थिता। अबद्धामुक्तेऽसंस्कृते स्थिता। अबद्धामुक्तोऽबद्धामुक्तान् सत्त्वान् परिमोचयिष्यति।

अबद्धामुक्तोऽबद्धामुक्तं बुद्धक्षेत्रं परिशोधयिष्यति। अबद्धामुक्तोऽबद्धामुक्तान् बुद्धान् भगवतः पर्य्युपासिष्यत। अबद्धामुक्तोऽबद्धामुक्तान् धर्म्मान् श्रोष्यति। अबद्धामुक्तोऽबद्धामुक्तैर्बुद्धैर्भगवद्भिर्नजातुविरहितो भविष्यति। अबद्धामुक्तोऽबद्धामुक्ताभिरभिज्ञाभिर्न जातुविरहितो भविष्यति। अबद्धामुक्तोऽबद्धामुक्तैः पञ्चभिश्चक्षुर्भिर्न जातुविरहितो भवति। अबद्धामुक्तोऽबद्धामुक्ताभिर्धारणीभिर्न जातुविरहितो भविष्यति। अबद्धामुक्तोऽबद्धामुक्तैः समाधिभिर्न जातुविरहितो भविष्यति। अबद्धामुक्तोऽबद्धामुक्तां मार्गाकारज्ञतामुत्पादयिष्यति। अबद्धामुक्तोऽबद्धामुक्तां सर्व्वज्ञतां सर्व्वा-

सर्व्वाकारज्ञता प्रतिसंयुक्तैश्चित्तोत्पादैरात्मना च दशकुशलान् कर्म्मपथान् समादाय वर्त्तते। परांश्च दशकुशलेषु कर्म्मपथेषु समादापयति निवेशयति प्रतिष्ठापयति अनुपलम्भयोगेन। इयं बोधिसत्त्वस्य महासत्त्वस्य परामृष्टा शीलपारमिता। आह। कतमा भगवन् बोधिसत्त्वस्य महासत्त्वस्य चान्तिपारमिता। भगवानाह। इह सुभूते बोधिसत्त्वो महासत्त्वः सर्व्वाकारज्ञता प्रतिसंयुक्तै र्मनसिकारैरात्मनाचचान्तिसम्पन्नो भवति। परांश्च चान्तौ समादापयन्त्यनुपलम्भयोगेन। इयं बोधिसत्त्वस्य महासत्त्वस्य चान्तिपारमिता। आह। कतमा भगवन् बोधिसत्त्वस्य महासत्त्वस्य वीर्य्यपारमिता। भगवानाह। इह सुभूते बोधिसत्त्वो महासत्त्वः सर्व्वाकारज्ञताप्रतिसंयुक्तै र्मनसिकारैरात्मना च पञ्चसु पारमितास्वनिक्षिप्तधुरो भवति। परांश्च पञ्चसु पारमितासु नियोजयत्यनुपलम्भयोगेन। इय बोधिसत्त्वस्य महासत्त्वस्य वीर्य्यपारमिता। आह। कतमा भगवन् बोधिसत्त्वस्य महासत्त्वस्य ध्यानपारमिता। भगवानाह। इह सुभूते बोधिसत्त्वो महासत्त्वः सर्व्वाकारज्ञता प्रतिसयुक्तै र्मनसिकारैरुपाय कौशलेन ध्यानानि समापद्यते। परांश्च ध्यानेषु समादापयत्यनुपलम्भयोगेन। इय बोधिसत्त्वस्य महासत्त्वस्य ध्यानपारमिता। आह। कतमा भगवन् बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमिता। भगवानाह। इह सुभूते बोधिसत्त्वस्य महासत्त्वस्य सर्व्वाकारज्ञता प्रतिसयुक्तैश्चित्तोत्पादैरात्मना च सर्व्वधर्म्मेष्वाऽभिनिविशते। सर्व्वधर्म्माणाञ्च प्रकृतिं प्रत्यवेक्षते अनुपलम्भयोगेन। सर्व्वधर्म्मानभिनिवेश सर्व्वधर्म्मप्रकृतिप्रत्या-

अनिकेतस्थितोनाम समाधिः। निस्थितोनाम समाधिः। विमल-प्रदीपोनाम समाधिः। अनन्तप्रभोनाम समाधिः। प्रभाकरोनाम समाधिः। समन्तावभासोनाम समाधिः। शुद्धसारोनाम समाधिः। विमलप्रभोनाम समाधिः। रतिङ्करोनाम समाधिः। विद्युत्प्रदीपो-नाम समाधिः। अक्षयोनाम समाधिः। अजेयोनाम समाधिः। तेजोवतीनाम समाधिः। क्षयापगतोनाम समाधिः। अनिञ्जोनाम समाधिः। अविवर्त्तोनाम समाधिः। सूर्य्यप्रदीपोनाम समाधिः। चन्द्रविमलोनाम समाधिः। प्रज्ञाप्रदीपोनाम समाधिः। शुद्ध-प्रतिभासोनाम समाधिः। आलोककरोनाम समाधिः। कारा-कारोनाम समाधिः। ज्ञानकेतुर्नाम समाधिः। वज्रोपमोनाम समाधिः। चित्तस्थितिर्नाम समाधिः। समन्तालोकोनाम समाधिः। सुप्रतिष्ठितोनाम समाधिः। रत्नकोटिर्नाम समाधिः। वरधर्म्म-मुद्रानाम समाधिः। सर्व्वधर्म्मसमतानाम समाधिः। रतिजहोनाम समाधिः। धर्म्मोद्गतोनाम समाधिः। विकिरणोनाम समाधिः। सर्वधर्म्मपदप्रभेदोनाम समाधि। समाक्षरावकारोनाम समाधिः। अक्षरापगतोनाम समाधिः। आरम्बणच्छेदनोनाम समाधिः। अविकारोनाम समाधिः। प्रभाकरोनाम समाधिः। नामनियत-प्रवेशोनामसमाधिः। अनिकेतचारीनाम समाधिः। तिमिरापगतो-नाम समाधिः। चारित्रवतीनाम समाधिः। अवलानाम समाधिः। विषयतीर्णोनाम समाधिः। सर्वगुणसञ्चयोनाम समाधिः। स्थित-निश्चित्तोनाम समाधिः। शुभपुष्पितशुद्धिर्नाम समाधिः। बोध्यङ्ग-वतीनाम समाधिः। अनन्तप्रतिभावोनाम समाधिः। असमसमो-

अथ अष्टमः परिवर्त्तः।

तत्र कतमः शूरङ्गमोनाम समाधिः। यः समाधिः सर्व्वसमाधीनां गोचरमनुभवत्ययमुच्यते शूरङ्गमोनाम समाधिः। तत्र कतमा रत्नमुद्रानाम समाधिः। येन समाधिना सर्व्वसमाधयो मुद्रिता भवन्ति। अयमुच्यते रत्नमुद्रानाम समाधिः। तत्र कतमः सिंहविक्रीडितोनाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वसमाधिभिर्व्विक्रीडयत्ययमुच्यते सिंहविक्रीडितोनाम समाधिः।

तत्र कतमः सुचन्द्रोनाम समाधि। यत्र समाधौ स्थित्वा सर्व्वसमाधीनवभासयति। अयमुच्यते सुचन्द्रनाम समाधिः। तत्र कतमश्चन्द्रध्वजकेतुर्नाम समाधिः। यः समाधिः सर्व्वसमाधीनां ध्वजं धारयति। अयमुच्यते चन्द्रध्वजकेतुर्नाम समाधिः। तत्र कतमः सर्व्वधर्म्मोद्गतोनाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वसमाधिभिरभ्युद्गच्छति। अयमुच्यते सर्वधर्म्मोद्गतोनाम समाधि। तत्र कतमो विलोकितमूर्द्धोनाम समाधि। यत्र समाधौ स्थित्वा सर्व्वसमाधीनां मूर्द्धानं विलोकयति। अयमुच्यते विलोकितमूर्द्धोनाम समाधिः। तत्र कतमो धर्म्मधातुनियतोनाम समाधि। यत्र समाधौ स्थित्वा धर्म्मधातौ नियाय गच्छति। अयमुच्यते धर्म्मधातुनियतोनाम समाधि। तत्र कतमोनियत ध्वजकेतुर्नाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वसमाधीना नियत ध्वज धारयति। अयमुच्यते नियतध्वजकेतुर्नाम समाधि। तत्र कतमो

समाधिः। यत्र समाधौ स्थित्वा तस्य समाधयो न मुञ्चन्ति। अयमुच्यते ऽसंप्रमोषोनाम समाधिः। तत्र कतमः सर्वधर्म्मसमवशरण सागरमुद्रा नामसमाधिः। यत्र समाधौ स्थितस्य सर्वे समाधयः संग्रहं समवशरणं गच्छन्ति। अयमुच्यते सर्वधर्म्मसमवशरण सागरमुद्रा नामसमाधिः। तत्र कतम आकाशस्फुरणोनाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधीनामाकाशस्फुरणतया स्फुरति। अयमुच्यते आकाशस्फुरणोनाम समाधिः। तत्र कतमो वज्रमण्डलोनाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधीनां मण्डलानि धारयति। अयमुच्यते वज्रमण्डलोनाम समाधिः। तत्र कतमोरणजहोनाम समाधिः। यत्र समाधौ स्थित्वा सर्वक्लेशमलान् शोषयति। अयमुच्यते रणजहोनाम समाधिः। तत्र कतमो-वैरोचनोनाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधीन-वभासयति तपति विरोचते। अयमुच्यते वैरोचनोनाम समाधिः। तत्र कतमो ऽनेपोनाम समाधिः। यत्र समाधौ स्थित्वा न कश्चिद्धर्म्ममेषते। अयमुच्यते ऽनेपोनाम समाधिः। तत्र कतमो-ऽनिकेतस्थितोनाम समाधिः। यत्र समाधौ स्थित्वा न कश्चिद्धर्म्मं निकेतस्थितं समनुपश्यति। अयमुच्यते ऽनिकेतस्थितोनाम समाधि। तत्र कतमोनिश्चित्तोनाम समाधि। यत्र समाधौ स्थितस्य न चित्तं न चैतसिकाधर्म्माप्रवर्त्तन्ते। अयमुच्यते निश्चित्तोनाम समाधिः। तत्र कतमो विमलप्रदीपोनाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधीना विमलप्रदीप करोति। अयमुच्यते विमल-प्रदीपोनाम समाधि। तत्र कतमोऽनन्तप्रभोनाम समाधि।

सर्व्वधर्म्मा उच्यन्ते। रूपं वेदनासंज्ञासंस्कारा विज्ञानं चक्षुःश्रोत्र घ्राण जिह्वा कायमनः। रूप शब्दोगन्धोरसः स्पर्शोधर्म्माः। चक्षुर्विज्ञान श्रोत्रविज्ञानं घ्राणविज्ञान जिह्वाविज्ञान कायविज्ञान मनोविज्ञान। चक्षुःसंस्पर्शः श्रोत्रसंस्पर्शः घ्राणसंस्पर्शः जिह्वासंस्पर्शः कायसंस्पर्शः मनःसंस्पर्शः। चक्षुःसंस्पर्शजावेदना, श्रोत्रसंस्पर्शजावेदना, घ्राणसंस्पर्शजावेदना, जिह्वासंस्पर्शजावेदना, कायसंस्पर्शजावेदना, मनःसंस्पर्शजावेदना। रूपिणोधर्म्माः। अरूपिणोधर्म्माः। संस्कृताधर्म्मा, असंस्कृताधर्म्माः। इमे उच्यन्ते सर्व्वधर्म्माः। सर्व्वधर्म्माः सर्व्वधर्म्मैः शून्याः अकूटस्थाऽविनाशितामुपादाय। तत्कस्य हेतोः प्रकृतिरेषामियं। इयमुच्यते सर्व्वधर्म्मशून्यता। तत्र कतमा स्वलक्षणशून्यता। रूपलक्षण रूपमनुपलम्भनामलक्षणा वेदना। उद्ग्रहणलक्षणा संज्ञा। अभिज्ञासंस्कारलक्षणाः संस्काराः। विज्ञानलक्षण विज्ञान। दुःखलक्षणाः स्कन्धाः। आशीविषलक्षणाधातवः। आयद्वारलक्षणान्यायतनानि। सामग्रीलक्षणः। प्रतीत्यसमुत्पादः। परित्यागलक्षण दानपारमिताः। अनुदाहलक्षणा शीलपारमिता। अकोपनालक्षण क्षान्तिपारमिताः। अनवमद्यलक्षणा वीर्य्यपारमिता। संग्रहलक्षण ध्यानपारमिता। असङ्गलक्षणा प्रज्ञापारमिता। अकोपनालक्षणानि चत्वारि ध्यानानि, चत्वार्य्यप्रमाणानि चतस्र आरूप्यसमापत्तयः। नैर्य्यानिकलक्षणाः सप्तत्रिंशद्बोधिपक्षाधर्म्माः। विविक्तलक्षण शून्यताविमोक्षमुख। शान्तलक्षणमानिमित्तविमोक्षमुख। दुःखामोहलक्षणमप्रणिहितविमोक्षमुखं। विमोक्षनालक्षणा विमोक्षाः। सुनिश्चितलक्षणानि वलानि। सुप्रतिष्ठितलक्षणानि वैशारद्यानि। अना-

समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधीनञ्जति न मन्यते न स्यन्दते न प्रपञ्चयति ते नोच्यते ऽनिञ्जोनाम समाधिः। तत्र कतमो ऽविवर्त्तोनाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधीनां विवर्त्तनं न समनुपश्यति। अयमुच्यते ऽविवर्त्तोनाम समाधिः। तत्र कतमः सूर्य्यप्रदीपोनाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधीनां सुखमवभासयति। अयमुच्यते सूर्य्यप्रदीपोनाम समाधिः। तत्र कतमश्चन्द्रविमलोनाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधीनामनन्धाकार करोति। अयमुच्यते चन्द्रविमलोनाम समाधिः। तत्र कतमः शुद्धप्रतिभासोनाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधीनां चतस्रः प्रतिसम्विदः प्रतिलभते ऽयमुच्यते शुद्धप्रतिभासोनाम समाधिः। तत्र कतम आलोककरोनाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वसमाधिसुखानामालोकं करोति। अयमुच्यते आलोककरोनाम समाधिः। तत्र कतम' काराकारोनाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वसमाधीनां कारगतां क्रियां करोति। अयमुच्यते काराकारोनाम समाधिः। तत्र कतमो ज्ञानकेतुर्नाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वसमाधीना ज्ञानकेतु समनुपश्यति। अयमुच्यते ज्ञानकेतुर्नाम समाधिः। तत्र कतमो वज्रोपमोनाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वसमाधीना निर्व्वेधिक करोति। यत् समाधिमपि न समनुपश्यति। अयमुच्यते वज्रोपमोनाम समाधिः। तत्र कतमश्चित्तस्थितिर्नाम समाधिः। यत्र समाधौ स्थित्वा ऽस्य चित्त न विचलति। न विवर्त्तते न परिस्यन्दति न

मानज्ञानेन ज्ञाता न दर्शनेन। इयमुच्यते स्वभावशून्यता। तत्र कतमापरभावः शून्यता। या उत्पादाद्वा तथागतानामनुत्पादाद्वा तथागतानां स्थितेरेष धर्म्मस्थितिता, धर्म्मता धर्म्मधातु धर्म्मनियामता। तथता अवितथता, अनन्य तथता, भूतकोटिः। इति हि येषा धर्म्माणां परेण शून्यता। इयमुच्यते परभावशून्यता। इदं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं।

पुनरपरं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायान। यदुत-शूरङ्गमोनाम समाधिः। रत्नमुद्रानाम समाधिः। सिंहविक्रीडितोनाम समाधिः। सुचन्द्रोनाम समाधिः। चन्द्रध्वजकेतुर्नाम समाधिः। सर्व्वधर्म्मोद्गतोनाम समाधिः। अधिवचनसप्रवेशोनाम समाधिः। विलोकितमूर्द्धोनाम समाधिः। धर्म्मधातुनियतोनाम समाधिः। नियतध्वजकेतुर्नाम समाधिः। वज्रोनाम समाधिः। सर्व्वधर्म्मप्रवेशमुद्रानाम समाधिः। समाधिराजसुप्रतिष्ठितोनाम समाधिः। रश्मिप्रमुक्तोनाम समाधिः। बलव्यूहोनाम समाधिः। समुद्गतोनाम समाधिः। निरुक्तानियतप्रवेशोनाम समाधिः। अधिवचनसप्रवेशोनाम समाधिः। दिग्विलोकितोनाम समाधिः। आधारमुद्रानाम समाधिः। असम्प्रमोषोनाम समाधिः। सर्व्वधर्म्मसमवसरणसागरमुद्रानाम समाधिः। आकाशस्फुरणोनाम समाधिः। वज्रमण्डलोनाम समाधिः। ध्वजाग्रकेयूरोनाम समाधिः। इन्द्रकेतुर्नाम समाधिः। श्रोतोऽनुगतोनाम समाधिः। सिंहविजृम्भितोनाम समाधि। व्यस्तोनामसमाधिः। रणञ्जयो-नाम समाधि। वैरोचनोनाम समाधि। अनयोनाम समाधि।

प्रभेदोनाम समाधिः। तत्र कतमः समाचराकारोनाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वसमाधीनां समाचरता प्रतिलभते। अयमुच्यते समाचराकारोनाम समाधिः। तत्र कतमो ऽक्षरापगतोनाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधीनामेकाक्षरमपि नोपलभते। अयमुच्यते ऽक्षरापगतो नाम समाधिः। तत्र कतम आरम्बणच्छेदनो नाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वसमाधीनामारम्बणच्छेदो भवति। अयमुच्यते आरम्बणच्छेदनो नाम समाधिः। तत्र कतमः अविकारो नाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वधर्माणां विकारान् नोपलभते। अयमुच्यते अविकारो नाम समाधिः। तत्र कतमो ऽप्रकारो नाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वधर्माणां प्रकारमपि नोपलभते। अयमुच्यते ऽप्रकारो नाम समाधिः। तत्र कतम अनिकेतचारी नाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वसमाधीनां निकेतं नोपलभते। अयमुच्यते अनिकेतचारी नाम समाधिः। तत्र कतमस्तिमिरापगतो नाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वधर्माणां तिमिरं विगोपयति। अयमुच्यते तिमिरापगतो नाम समाधिः। तत्र कतमश्चारित्रवतो नाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वसमाधीनां चारित्रं समनुपश्यति। अयमुच्यते चारित्रवतो नाम समाधिः। तत्र कतमः अचलो नाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वसमाधीनचलान् समनुपश्यति। अयमुच्यते अचलो नाम समाधिः। तत्र कतमो विषयतीर्णो नाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वसमाधीनां विषयं समतिक्रामति। अयमुच्य-

मानज्ञानेन कृता न दर्शनेन। इयमुच्यते स्वभावशून्यता। तत्र कतमा परभावः शून्यता। या उत्पादाद्वा तथागतानामनुत्पादाद्वा तथागतानां स्थितैवैष धर्माणां धर्मस्थितिता, धर्मता धर्मधातु धर्मनियामतता। तथता अवितथता, अनन्य तथता, भूतकोटिः। इति हि येषः धर्माणां परेण शून्यता। इयमुच्यते परभावशून्यता। इदं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं।

पुनरपरं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं। शूरङ्गमो नाम समाधिः। रत्नमुद्रो नाम समाधिः। सिंहविक्रीडितो नाम समाधिः। सुचन्द्रो नाम समाधिः। चन्द्रध्वजकेतुर्नाम समाधिः। सर्वधर्मोद्गतो नाम समाधिः। अधिवचनसम्प्रवेशो नाम समाधिः। विलोकितमूर्द्धो नाम समाधिः। धर्मधातुनियतो नाम समाधिः। नियतध्वजकेतुर्नाम समाधिः। वज्रो नाम समाधिः। सर्वधर्मप्रवेशमुद्रो नाम समाधिः। समाधिराजसुप्रतिष्ठितो नाम समाधिः। रश्मिप्रमुक्तो नाम समाधिः। बलव्यूहो नाम समाधिः। समुद्गतो नाम समाधिः। निरुक्तिनियतप्रवेशो नाम समाधिः। अधिवचनप्रवेशो नाम समाधिः। दिग्विलोकितो नाम समाधिः। धारणीमुद्रो नाम समाधिः। असंप्रमोषो नाम समाधिः। सर्वधर्मसमवसरणसागरमुद्रो नाम समाधिः। आकाशस्फरणो नाम समाधिः। वज्रमण्डलो नाम समाधिः। ध्वजाग्रकेयूरो नाम समाधिः। [illegible] नाम समाधिः। [illegible] नाम समाधिः। [illegible] नाम समाधिः। [illegible] नाम समाधिः। [illegible] नाम समाधिः। [illegible] नाम समाधिः।

नाम समाधिः । तत्र कतमो निरधिष्ठानो नाम समाधिः । यत्र समाधौ स्थित्वा सर्व्वधर्म्माणां स्थानं न समनुपश्यति । अयमुच्यते निरधिष्ठानो नाम समाधिः । तत्र कतम एकव्यूहो नाम समाधिः । यत्र समाधौ स्थित्वा न कस्यचिद्धर्म्मस्य द्वयतां समनुपश्यति । अयमुच्यते एकव्यूहोनाम समाधिः । तत्र कतम आकाराभि-निर्हारो नाम समाधिः । यत्र समाधौ स्थित्वा सर्व्वधर्म्मा [illegible] सर्व्वसमाधीनाञ्चाकाराऽभिनिर्हारं समनुपश्यति । अयमुच्यते आका-राभिनिर्हारो नाम समाधिः । तत्र कतम एकाकारो नाम समाधिः । यत्र समाधौ स्थित्वा सर्व्वसमाधीनामाकारं न समनु-पश्यति । अयमुच्यते एकाकारो नाम समाधिः । तत्र [illegible] आकारानवकारो नाम समाधिः । यत्र समाधौ स्थित्वा [illegible] समाधीनामद्वयतां समनुपश्यति । अयमुच्यते आकारान[illegible] नाम समाधिः । तत्र कतमः सर्व्वभवतमोविधमनो [illegible] नाम [illegible] । यत्र समाधौ स्थित्वा सर्व्वसमाधीनां सर्व्वभव[illegible] [illegible] [illegible] प्रज्ञाऽनुगमयन्ति [illegible] [illegible] । अयमुच्यते [illegible] सर्व्वभवतमोविगतो नाम समाधिः । तत्र कतमः [illegible] नाम समाधिः । यत्र समाधौ स्थित्वा [illegible] [illegible] [illegible] । अयमुच्यते [illegible] नाम [illegible] कतमो गाम्भीर्य[illegible] नाम समाधिः । यत्र [illegible] सर्व्वसमाधीनां गाम्भीर्य[illegible] [illegible] गाम्भीर्य[illegible] नाम समाधिः । [illegible] नाम समाधिः । [illegible]

नाम समाधिः। सर्वधर्म्मातिक्रमणोनाम समाधिः। परिच्छेदकरो-
नाम समाधिः। विमतिविकिरणोनाम समाधिः। निरधिष्ठानो-
नाम समाधिः। एकव्यूहोनाम समाधिः। आकाराभिनिर्हारो-
नाम समाधिः। एकाकारोनाम समाधिः। सर्वसुखदुःखनिरभि-
नन्दीनाम समाधिः। सर्व्वाकारवरोपेतोनाम समाधिः। आकारा-
नवकारोनाम समाधिः। नैर्वेधिकसर्वभवतलापगतोनाम समाधिः।
सङ्केतरुतप्रवेशोनाम समाधिः। गौघोषाक्षरविमुक्तोनाम समाधिः।
ज्वलनोल्कानाम समाधिः। लक्षणपरिशोधनोनाम समाधिः।
अनभिलक्षितोनाम समाधिः। सर्व्वाकारवरोपेतोनाम समाधिः।
सर्वसुखदुःखनिरभिनन्दीनाम समाधिः। अक्षयकरण्डोनाम
समाधिः। धारणीमतिनाम समाधिः। सम्यक्त्वमिथ्यात्वसंप्रशमोनाम
समाधिः। सर्वरोधनिरोधसंप्रशमनोनाम समाधिः। अनुयोधा-
प्रतिरोधोनाम समाधिः। विमलप्रभोनाम समाधिः। सारवतोनाम
समाधिः। परिपूर्णचन्द्रविमलोनाम समाधिः। विद्युत्प्रभोनाम
समाधिः। महाव्यूहोनाम समाधिः। सर्वलोकप्रभाकरोनाम
समाधिः। समाधिसमतानाम समाधिः। अरजोविरजोनयुक्तोनाम
समाधिः। अरणसरणसमवसरणोनाम समाधिः। अरणसरणसं-
[illegible]सरणोनामसमाधिः। अनिलयनिकेतनिरतोनाम समाधिः।
तथतास्थितनिश्चलोनाम समाधिः। कायकलिसंप्रमथनोनाम
समाधिः। वाक्कलिविध्वंसनगगनकल्पोनाम समाधिः। आकाशा-
सङ्गविमुक्तिनिरुपलेपोनाम समाधिः॥ [illegible]॥

[illegible] समाधिपरिवर्त्तः।

माधीनाञ्चानुरोधाप्रतिरोध न समनुपश्यति। अयमुच्यते ऽनुरोधाप्रतिरोधो नाम समाधिः। तत्र कतमो विमलप्रभो नाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधीनां प्रभामण्डलं लोपलभते। अयमुच्यते विमलप्रभो नाम समाधिः। तत्र कतमः सारवती नाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधीना सारं समनुपश्यति। अयमुच्यते सारवती नाम समाधि। तत्र कतमः परिपूर्णचन्द्राभविमलो नाम समाधिः। यत्र समाधौ स्थितस्य सर्वसमाधयः परिपूर्णा भवन्ति। तद्यथापि नाम पौर्णमास्यां चन्द्रमण्डल। अयमुच्यते परिपूर्णचन्द्राभविमलो नाम समाधिः। तत्र कतमो महाव्यूहो नाम समाधि। यत्र समाधौ स्थित्वा सर्वसमाधि महाव्यूहसमन्वागतो भवति। अयमुच्यते महाव्यूहो नाम समाधिः। तत्र कतमः सर्व्वाकारप्रभाकरो नाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधीन् सर्वधर्म्मांश्चावभासयति। अयमुच्यते सर्व्वाकारप्रभाकरो नाम समाधिः। तत्र कतमः समाधिसमता नाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधीनामनुविक्षेपमेकाग्रतामुपलभते। अयमुच्यते समाधिसमतानाम समाधिः। तत्र कतमो ऽरणसरणसमवसरणो नाम समाधिः। यत्र समाधौ स्थितस्य सर्वसमाधयो नरणन्ति। अयमुच्यते ऽरणसरणसमवसरणो नाम समाधिः। तत्र कतमो ऽरणसरण सर्वसमवसरणो नाम समाधिः। यत्र समाधौ स्थित्वा अरणसरण सर्वसमवसरणतामनुप्राप्नोति। अयमुच्यते अरणसरण सर्वसमवसरणो नाम समाधिः। तत्र कतमो ऽनिलयज्ञानकेतनिरतो नाम समाधि

वज्रोनाम समाधिः। यत्र समाधौ स्थित्वा न भिद्यते। अयमुच्यते वज्रोनाम समाधिः। तत्र कतमः सर्व्वधर्म्मप्रवेशमुद्रानाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वधर्म्माणां मुद्रां प्रविशत्ययमुच्यते सर्व्वधर्म्मप्रवेशमुद्रानाम समाधिः। तत्र कतमः समाधिराजस्तु प्रतिष्ठितोनाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वसमाधिषु राजस्तु प्रतिष्ठानेन प्रतितिष्ठति। अयमुच्यते समाधिराजस्तु प्रतिष्ठितोनाम समाधिः। तत्र कतमोरश्मिप्रमुक्तोनाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वसमाधीनां रश्मीनवसृजति। अयमुच्यते रश्मिप्रमुक्तोनाम समाधिः। तत्र कतमोवलव्युह्योनाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वसमाधीनां वलव्युहतां कारयति। अयमुच्यते वलव्यूह्योनाम समाधिः। तत्र कतमः समुद्गतोनाम समाधिः। यत्र समाधौ स्थितस्य सर्व्वे समाधयः समुद्गच्छन्ति। अयमुच्यते समुद्गतोनाम समाधिः। तत्र कतमोनिरुक्ति नियतप्रवेशोनाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधीनां निरुक्तिनिर्द्देशान् प्रवेशयति। अयमुच्यते निरुक्तिनियतप्रवेशोनाम समाधिः। तत्र कतमोवचनसंप्रवेशोनाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधीनामधिवचनानि प्रवेशयति। अयमुच्यते ऽधिवचनसप्रवेशोनाम समाधि। तत्र कतमोदिग्विलोकितोनाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधीन दिशो विलोकयति अयमुच्यते दिग्विलोकितोनाम समाधिः। तत्र कतम आधारमुद्रानाम समाधि। यत्र समाधौ स्थित्वा सर्वसमाधीनां मुद्राधारयति। अयमुच्यते आधारमुद्रानाम समाधि। तत्र कतमोऽसमोधोनाम

अथ नवमः परिवर्त्तः।



पुनरपरं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं। चत्वारि-स्मृत्युपस्थानानि। कतमानि चत्वारि। कायस्मृत्युपस्थानं। वेदना-स्मृत्युपस्थान। चित्तस्मृत्युपस्थान। धर्मस्मृत्युपस्थानं। तत्र कतम कायस्मृत्युपस्थानं। इह सुभूते बोधिसत्त्वो महासत्त्वो ऽध्यात्मकाये-कायाऽनुदर्शी विहरति। न च काय सहगतान् वितर्कान् वितर्कयत्यातापी सम्प्रजानन् स्मृतिमान् विनीय लोकेऽभि-ध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन। बहिर्द्धाकाये कायानुदर्शी-विहरति। न च कायसहगतान् वितर्कान् वितर्कयत्यातापी-संप्रजानन् स्मृतिमान् विनीयलोकेऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भ-योगेन। अध्यात्मबहिर्द्धाकायेकायाऽनुदर्शी विहरति। न च कायसहगतान् वितर्कान् वितर्कयत्यातापी सम्प्रजानन् स्मृतिमान् विनीयलोकेऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन।

अध्यात्मवेदनासुवेदनाऽनुदर्शी विहरति। न च वेदनासहग-तान् वितर्कान् वितर्कयत्यातापी सम्प्रजानन् स्मृतिमान् विनीयलो-केऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन। बहिर्द्धावेदनासुवेदना-नुदर्शी विहरति। न च वेदना सहगतान् वितर्कान् वितर्कयत्या-तापी सम्प्रजानन् स्मृतिमान् विनीयलोकेऽभिध्यादौर्मनस्ये तच्चाऽनु-पलम्भयोगेन। अध्यात्मबहिर्द्धावेदनासु वेदनाऽनुदर्शी विहरति। न च वेदना सहगतान् वितर्कान् वितर्कयत्यातापी सम्प्रजानन्

यत्र समाधौ स्थित्वा सर्वसमाधीनां प्रभां करोति । अयमुच्यते
प्रभोनाम समाधिः । तत्र कतमः प्रभाकरोनाम समाधिः ।
समाधेः सहप्रतिलम्भात् सर्वसमाधीनां प्रभां करोति । अयमुच्यते
प्रभाकरोनाम समाधिः । तत्र कतमः समन्तावभासोनाम समाधिः ।
यस्य समाधेः सहप्रतिलम्भात् सर्वसमाधिमुखान्यवभासयति ।
अयमुच्यते समन्तावभासोनाम समाधिः । तत्र कतमः शुद्धसारो-
नाम समाधिः । यत्र समाधौ स्थित्वा समाधीनां शुद्धसमता-
मनुप्राप्नोति । अयमुच्यते शुद्धसारोनाम समाधिः । तत्र कतमो
विमलप्रभोनाम समाधिः । यत्र समाधौ स्थित्वा सर्वसमाधीना
मलमपकर्षति । सर्वसमाधींश्च प्रतिभासयति । अयमुच्यते विमल-
प्रभोनाम समाधिः । तत्र कतमोरतिकरोनाम समाधिः । यत्र
समाधौ स्थित्वा सर्वसमाधीना रतिमनुभवति । अयमुच्यते
रतिकरोनाम समाधिः । तत्र कतमो विद्युत् प्रदीपोनाम समाधिः ।
यत्र समाधौ स्थित्वा सर्वसमाधीनां प्रदीप करोति । अयमुच्यते
विद्युत्प्रदीपोनाम समाधिः । तत्र कतमो ऽक्षयोनाम समाधिः ।
यत्र समाधौ स्थित्वा सर्वसमाधीनां नैव क्षयं नाक्षयं समनुपश्यति ।
अयमुच्यते ऽक्षयोनाम समाधिः । तत्र कतम स्तेजोवतीनाम
समाधिः । यत्र समाधौ स्थित्वा सर्वसमाधीं स्तेजसाश्रिया च
ज्वलयति । अयमुच्यते तेजोवतीनाम समाधिः । तत्र कतमः
क्षयापगतोनाम समाधिः । यत्र समाधौ स्थित्वा सर्वसमाधी न
क्षयाननुपश्यति । तथा च पश्यति यथाण्वपि न समनुपश्यति ।
अयमुच्यते क्षयापगतोनाम समाधिः । तत्र कतमो ऽनिञ्जोनाम

लोकित विलोके सम्प्रजानचारो च भवति। सम्मिञ्जिते प्रसारिते सम्प्रजानचारी भवति। संघाटीयात्रचीवरधारणे संप्रजानचारी भवति। अशितपीतखादितास्वादितान् संप्रजानचारी भवति। शयितनिद्राक्लमप्रतिविनोदिते संप्रजानचारी भवति। आगत-गत सम्प्रजानचारी भवति। स्थिते निषद्यायां संप्रजानचारी भवति। स्वप्नजागरिते सम्प्रजानचारी भवति। भाषिते तूष्णीम्भावे सम्प्र-जानचारी भवति। प्रतिसंलयने संप्रजानचारी भवति। एव खलु सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन्नध्यात्मकाये कायानुदर्शी विहरत्यातापी सम्प्रजानन् स्मृतिमान् विनीयलोके ऽभिध्यादौर्मनस्ये तथाऽनुपलम्भयोगेन। पुनरपरं सुभूते बोधि-सत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् स्मृत आश्वसन् स्मृत आश्वसिमीति प्रजानाति। स्मृत प्रश्वसन् स्मृतः प्रश्वसिमीति प्रजानाति। दीर्घमाश्वसन् दीर्घमाश्वसिमीति प्रजानाति। दीर्घं प्रश्वसन् दीर्घं प्रश्वसिमीति प्रजानाति। ह्रस्वमाश्वसन् ह्रस्वमाश्वसिमीति प्रजानाति। ह्रस्वं प्रश्वसन् ह्रस्व प्रश्वसिमीति प्रजानाति। तद्यथापि नाम सुभूते दक्षोभ्रमचक्रवर्त्ती भ्रमचक्र-वर्त्तन्तेवासी वा दीर्घमाविध्यामीति प्रजानाति। ह्रस्व मविध्या-मीति प्रजानाति। एवमेव सुभूते बोधिसत्त्वो महासत्त्व' प्रज्ञा-पारमितायां चरन् स्मृत आश्वसन् स्मृत आश्वसिमीति प्रजानाति। स्मृतः प्रश्वसन् स्मृत' प्रश्वसिमीति प्रजानाति। दीर्घमाश्वसन् दीर्घमाश्वसिमीति प्रजानाति। दीर्घं प्रश्वसन् दीर्घं प्रश्वसिमीति प्रजानाति। ह्रस्वमाश्वसन् ह्रस्वमाश्वसिमीति प्रजानातीति।

विघातमापद्यते। न वा ऽस्यैवं भवति चित्तमिदमिति। अय-मुच्यते चित्तस्थितिर्नाम समाधिः। तत्र कतमः समन्तालोकोनाम समाधिः। यत्र समाधौ स्थित्वा समन्तादालोकं समनुपश्यति। अयमुच्यते समन्तालोकोनाम समाधिः। तत्र कतमः सुप्रतिष्ठि-तोनाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वसमाधिषु सुप्रतिष्ठितो भवति। अयमुच्यते सुप्रतिष्ठितो नाम समाधिः। तत्र कतमो रत्नकोटिर्नाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वसमाधयः समन्ता-द्रत्नकोटिरिव संदृश्यते। अयमुच्यते रत्नकोटिर्नाम समाधिः। तत्र कतमो वरधर्म्ममुद्रानाम समाधिः। यत्र समाधौ स्थित्वा सर्व्व-समाधयोमुद्रिता भवन्ति। अमुद्राकोटिमुद्रिततामुपादाय। अय-मुच्यते वरधर्म्ममुद्रानाम समाधिः। तत्र कतमा सर्व्वधर्म्मसमतानाम समाधिः। यत्र समाधौ स्थित्वा न कञ्चिद्धर्म्मं समतानिर्मुक्तं समनुपश्यति। अयमुच्यते सर्व्वधर्म्म समतानाम समाधिः। तत्र कतमो रतिञ्जहोनाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वसमा-धीनां सर्व्वधर्म्मानाञ्च रतिञ्जहाति। अयमुच्यते रतिञ्जहोनाम समाधिः। तत्र कतमो धर्म्मोद्गतोनाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वधर्म्माणां तमोविधर्म्मात् सर्व्वसमाधिभिश्चोद्गच्छति। अयमुच्यते धर्म्मोद्गतोनाम समधिः। तत्र कतमो विकिरणोनाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वसमाधिभिः सर्व्वधर्म्मान् विकि-रयति। अयमुच्यते विकिरणोनाम समाधिः। तत्र कतमः सर्व्वधर्म्मपदप्रभेदोनाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वसमा-धीनां सर्व्वधर्म्मानाञ्च पदानि प्रभिनत्ति। अयमुच्यते सर्व्वधर्म्मपद-

मीकामला मस्तकं मस्तक गञ्जामचि पृयकं। तद्यथापि नाम सुभूते कार्षकस्य मूतोलिः पूर्णा नानाधान्यजातानां तिलानां सर्षपाणां मुद्गानां माषाणां मसूराणां यवानां गोधूमानां शालीनां मीहीणां, तामेनां चक्षुष्मान् पुरुषामुक्ता प्रत्यवेचमाणः एवं जानीयादिमेतिलाः इमे सर्षपाः इमे मुद्गाः इमे माषाः इमे मसूराः इमे यवाः इमे गोधूमाः इमे शालयः इमे मीहयः। एवमेव सुभूते वोधिसत्त्वो महासत्त्वः इममेव कायमूर्द्धं पादतला-दधः केशमस्तकानखलोमत्वक्पर्य्यन्तं पूर्णं नानाविधस्याऽशुचे। सन्त्यस्मिन् काये केशा लोमानि नखादन्तास्त्वक्चर्ममांसस्नायु रुधिरमस्थिमज्जावृक्क हृदयं यकृत् क्लोमकं मीहा फुष्फुष माच मान्त्रगुना उदीरयकं मूत्र पुरीषमश्रुस्वेदोमदः खेटः सिंहाणकं पूयं पित्त श्लेष्मा वसालसीकामज्जामस्तक मस्तक गङ्गमचि गूयकं कर्ण गूयकं। एवं खलु सुभूते वोधिसत्त्वो महासत्त्वः प्रज्ञापारमि-तायां चरन्नध्यात्मकाये कायानुदर्शी विहरत्यातापी सम्प्रजानन् स्मृतिमान् विनीयलोकेऽभिध्यादौर्मनस्ये। तच्चाऽनुपलम्भयोगेन। पुनरपर सुभूते वोधिसत्त्वो महासत्त्वः प्रज्ञापामितायां चरन् यदाश्मशानगत. पश्यति। नानारूपाणि शिवपथिकायामपविद्धानि शवशयन उद्धीतान्येकाहमृतानि वा द्व्यहमृतानि वा त्र्यहमृतानि वा चतुरहमृतानि वा पञ्चाहमृतानि वा व्याध्मातकानि वा विनीलकानि वा विपूतिकानि वा विखादितकानि वा विलोहि-तकानि वा विचिप्तकानि वा। स इम मेव कायन्तत्रोपसंहर-त्ययमपि काय एवं धर्म्मा एव स्वभाव एतां धर्मतामध्यति वृत्तः।

विपयतीर्णो नाम समाधिः। तत्र कतमः सर्व्वगुणसञ्चयगतो नाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वधर्म्माणां सर्व्वसमाधीनाञ्च गुणसञ्चयमनुप्राप्नोति। अयमुच्यते सर्व्वगुणसञ्चयगतो नाम समाधिः। तत्र कतमः स्थितनिश्चित्तो नाम समाधिः। यत्र समाधौ स्थितस्य सर्व्वसमाधिषु चित्तं न प्रवर्त्तते। अयमुच्यते स्थितनिश्चित्तो नाम समाधिः। तत्र कतमः शुभपुष्पितशुद्धिर्नाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वसमाधीनां शुभपुष्पितशुद्धिं प्रतिलभते ऽयमुच्यते शुभपुष्पितशुद्धिर्नाम समाधिः। तत्र कतमो बोध्यङ्गवतो नाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वसमाधीनां सप्तबोध्यङ्गानि प्रतिलभते। अयमुच्यते बोध्यङ्गवतो नाम समाधिः। तत्र कतमो ऽनन्तप्रतिभानो नाम समाधिः। यत्र समाधौ स्थित्वा समाधिष्वनन्तं प्रतिलभते। अयमुच्यते ऽनन्तप्रतिभानो नाम समाधिः। तत्र कतमो ऽसमसमो नाम [illegible]

स्वभाव एतां धर्मतामध्यति वृत्तः। एवं खलु सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् बहिर्द्धाकाये कायाऽनुदर्शी विहरत्यातापी संप्रजानन् स्मृतिमान् विनीयलोके ऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन ।

पुनरपुरं सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् यथा शिवपथिकायामस्थिसङ्कलानपगतमांस रुधिरस्नायु बन्धनान् शङ्खनिभान् पश्यति । स इममेव कायं तत्रोपसंहरत्ययमपि कायं एवं धर्मा एवं स्वभाव एतां धर्मतामध्यतिवृत्तः। एवं खलु सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् बहिर्द्धाकाये कायानुदर्शी विहरत्यातापी सम्प्रजानन् स्मृतिमान् विनीयलोके अभिध्यादौर्मनस्ये। तच्चाऽनुपलम्भयोगेन । पुनरपर सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् यदा पश्यति । शिवपथिकायामस्थि सकलाबन्धन विप्रमुक्ता यथाशङ्खाः पृथिव्यां विक्षिप्ताः। स इममेव काय तत्रोपसंहरत्ययमपि काय एवं धर्मा एवं स्वभाव एतां धर्मतामध्यतिवृत्तः। एवं खलु सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् बहिर्द्धाकाये काया ऽनुदर्शी विहरत्यातापी सम्प्रजानन् स्मृतिमान् विनीयलोकेऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन ।

पुनरपरं सुभूते बोधिसत्त्वो महासत्त्व प्रज्ञापारमितायां चरन् यदा पश्यति शिवपथिकायामस्थीनि पृथिव्या दिग्विदिक्षो विक्षिप्तान्येव पादास्थीन्यन्येन जङ्घास्थीन्यन्येन ऊर्व्वस्थीन्यन्येन श्रोणीकटाहमन्येन पृष्ठवंशान्यन्येन पार्श्वकास्थीन्यन्येन बाह्वस्थीन्यन्येन ग्रीवा-

यति। अयमुच्यते अचलोल्का नाम समाधिः। तत्र कतमो लक्षण-
परिशोधनो नाम समाधिः। यत्र समाधौ स्थितस्य सर्वसमाधीनां
लक्षणानि परिशुध्यन्ते। अयमुच्यते लक्षणपरिशोधनो नाम
समाधिः। तत्र कतमोऽनभिलक्षितो नाम समाधिः। यत्र
समाधौ स्थिता सर्वसमाधीनभिलक्षितान् समनुपश्यति। अय-
मुच्यते अनभिलक्षितो नाम समाधिः। तत्र कतमः सर्वाकाराभि-
पेतो नाम समाधिः। यत्र समाधौ स्थितस्य सर्वसमाधयः सर्वा-
काराभिपेता भवन्ति। अयमुच्यते सर्वाकाराभिपेतो नाम समाधिः।
तत्र कतमः सर्वसुखदुःखनिरभिनन्दी नाम समाधिः। यत्र
समाधौ स्थिता सर्वसमाधीनां सुखदुःखानि नानुपश्यन्ति।
अयमुच्यते सर्वसुखदुःखनिरभिनन्दी नाम समाधिः। तत्र कतमो
[illegible]

अध्यात्मबहिर्द्धाकाये कायाऽनुदर्शी विहरत्यातापी संप्रजानन् स्मृतिमान् विनीयलोके ऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन।

अध्यात्मवेदनासुवेदनाऽनुदर्शी विहरत्यातापी संप्रजानन् स्मृतिमान् विनीयलोके ऽभिध्यादौर्मनस्ये तच्चानुपलम्भयोगेन। बहिर्द्धावेदना सुवेदना ऽनुदर्शी विहरत्यातापी संप्रजानन् स्मृतिमान् विनीयलोके ऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन। अध्यात्मबहिर्द्धावेदना सुवेदना ऽनुदर्शी विहरत्यातापी संप्रजानन् स्मृतिमान् विनीयलोके ऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन। अध्यात्मचित्ते चित्ताऽनुदर्शी विहरत्यातापी सम्प्रजानन् स्मृतिमान् विनीयलोके ऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन। बहिर्द्धाचित्ते चित्तानुदर्शी विहरत्यातापी सम्प्रजानन् स्मृतिमान् विनीयलोके ऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन। अध्यात्मबहिर्द्धा चित्ते चित्ताऽनुदर्शी विहरत्यातापी सम्प्रजानन् स्मृतिमान् विनीयलोके ऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन। अध्यात्मधर्म्मेषु धर्म्माऽनुदर्शी विहरत्यातापी सम्प्रजानन् स्मृतिमान् विनीयलोकेऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन। बहिर्द्धाधर्म्मेषु धर्म्मानुदर्शी विहरत्यातापी संप्रजानन् स्मृतिमान् विनीयलोके ऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन। अध्यात्मबहिर्द्धाधर्म्मेषु धर्म्माऽनुदर्शी विहरत्यातापी सम्प्रजानन् स्मृतिमान् विनीयलोके ऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन। इदमपि सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायान।

पुनरपरं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायान। यदुत चत्वारि सम्यक् प्रहाणानि। कतमानि। इह सुभूते बोधिसत्त्वो

यत्र समाधौ स्थित्वा सर्वसमाधीनामालयं नोपैति। अयमुच्यते अनिलम्भनिकेतनिरतो नाम समाधिः। तत्र कतमः तथतास्थितनिश्चित्तो नाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधितथताया न विवर्द्धते। अयमुच्यते तथतास्थितनिश्चित्तो नाम समाधिः। तत्र कतमः कायकलिसंप्रमथनो नाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधिकायं नोपलभते। अयमुच्यते कायकलिसंप्रमथनो नाम समाधिः। तत्र कतमो वाक्कलिविध्वंसनगगणकल्पो नाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधीनां वाक्कर्म्मनोपलभते। अयमुच्यते वाक्कलिविध्वंसनगगणकल्पो नाम समाधिः। तत्र कतम आकाशा ऽसङ्गविमुक्तिनिरुपलेपो नाम समाधिः। यत्र समाधौ स्थित्वा सर्वधर्म्माणा माकाशाऽसङ्गनिरूपलेपतामनुप्राप्नोति। अयमुच्यते आकाशा ऽसङ्गविमुक्तिनिरुपलेपो नाम समाधिः। इदं सुभूते बोधसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो महायानं॥

शतसाहस्र्याः प्रज्ञापारमिताया अष्टमः परिवर्त्तः॥ ०॥

पुनरपरं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं । यदुत पञ्चेन्द्रियाणि । कतमानि पञ्च । श्रद्धेन्द्रिय वीर्य्येन्द्रियं स्मृतीन्द्रियं समाधीन्द्रियं प्रज्ञेन्द्रियमिदमपि सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायान । तच्चाऽनुपलम्भयोगेन ।

पुनरपर सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायान । यदुत पञ्चबलानि । कतमानि पञ्च । श्रद्धाबल वीर्य्यबल स्मृतिबलं समाधिबल प्रज्ञाबलमिदमपि सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं तच्चाऽनुपलम्भयोगेन । पुनरपर सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायान। यदुत सप्तबोध्यङ्गानि । कतमानि सप्तस्मृति-सम्बोध्यङ्गं धर्म्मप्रविचयसम्बोध्यङ्ग वीर्य्यसम्बोध्यङ्गं प्रीतिसम्बोध्यङ्ग प्रश्रब्धिसम्बोध्यङ्ग समाधिसम्बोध्यङ्ग उपेक्षासम्बोध्यङ्गं । तत्र कतमत् स्मृतिसम्बोध्यङ्ग । इह सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापार-मितायां चरन् स्मृतिसम्बोध्यङ्गं भावयति विवेकनिःश्रित विराग-निःश्रितं निरोधनिःश्रितं व्यवसर्गपरिणतं । तच्चाऽनुपलम्भयोगेन । कतद्धर्म्मप्रविचय सम्बोध्यङ्ग । इह सुभूते बोधिसत्त्वो महासत्त्व. प्रज्ञापारमितायां चरन् धर्म्मप्रविचयसम्बोध्यङ्ग भावयति । विवेक-नि श्रित विरागनिःश्रित निरोधनिःश्रित व्यवसर्गपरिणतं । तच्चा-ऽनुपलम्भयोगेन । कतमद्वीर्य्यसम्बोध्यङ्गं । इह सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् वीर्य्यसम्बोध्यङ्ग भावयति विवेकनि.श्रित विरागनि श्रित निरोधनि श्रित व्यवसर्गपरिणत तच्चाऽनुपलम्भयोगेन । तत्र कतमत्प्रीतिसम्बोध्यङ्ग । इह सुभू बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां प्रीतिसम्बोध्यङ्गं भावयति

स्मृतिमान् विनीयलोके ऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन। अध्यात्मचित्ते चित्ताऽनुदर्शी विहरति। न च चित्तसहगतान् वितर्कान् वितर्कयत्यातापी सम्प्रजानान् स्मृतिमान् विनीयलोके ऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन। बहिर्द्धा चित्ते चित्ताऽनुदर्शी विहरति। न च चित्तसहगतान् वितर्कान् वितर्कयत्यातापी संप्रजानन् स्मृतिमान् विनीयलोके ऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन। अध्यात्मबहिर्द्धा चित्ते चित्ताऽनुदर्शी विहरति। न च चित्तसहगतान् वितर्कान् वितर्कयत्यातापी सम्प्रजानन् स्मृतिमान् विनीयलोके ऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन।

अध्यात्मधर्मेषु धर्मानुदर्शी विहरति। न च धर्मसहगतान् वितर्कान् वितर्कयत्यातापो सम्प्रजानन् स्मृतिमान् विनीयलोकेऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन।

कथं सुभूते वोधिसत्त्वो महासत्त्वो ऽध्यात्मकाये कायानुदर्शी विहरति। इह सुभूते वोधिसत्त्वो महासत्त्वश्चरञ्चरामीति प्रजानाति स्थितः स्थितोऽस्मीति प्रजानाति। निषन्नो निषन्नोऽस्मीति प्रजानाति। शयानः शयितोऽस्मीति प्रजानाति। यथा यथा खलु पुनरस्य कायः स्थितो भवति प्रणीत वा ऽप्रणीत वा तथा-गतश्च न प्रजानाति। एव खलु सुभूते वोधिसत्त्वो महासत्त्वो ऽध्यात्मकाये कायानुदर्शी विहरत्यातापी सम्प्रजानन् स्मृतिमान् विनीयलोके ऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन। पुनरपर सुभूते वोधिसत्त्वो महासत्त्वो ऽध्यात्मकाये कायाऽनुदर्शी विहरति। सोऽभिक्राम न वा प्रतिक्राम न वा संप्रजानचारी भवत्या

सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् सम्यग्वाचं भावयति विवेकनिःश्रितं विरागनिःश्रितं निरोधनिःश्रितं व्यवसर्गपरिणतं। तच्चाऽनुपलम्भयोगेन। कतमः सम्यक् कर्म्मान्तः। इह सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् सम्यक् कर्म्मान्तं भावयति। विवेकनिःश्रितं विरागनिःश्रितं निरोधनिःश्रितं व्यवसर्गपरिणतं। तच्चाऽनुपलम्भयोगेन। कतमः सम्यगाजीवः इह सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् सम्यगाजीवं भावयति। विवेकनिःश्रितं विरागनिःश्रितं निरोधनिःश्रितं व्यवसर्गपरिणतं। तच्चानुपलम्भयोगेन। कतमः सम्यग् व्यायामः। इह सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् सम्यग् व्यायामं भावयति। विवेकनिःश्रितं विरागनिःश्रितं निरोधनिःश्रितं व्यवसर्गपरिणतं। तच्चाऽनुपलम्भयोगेन। कतमा सम्यक् स्मृतिः। इह सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् सम्यक् स्मृतिं भावयति। विवेकनिःश्रितं विरागनिःश्रितं निरोधनिःश्रितं व्यवसर्गपरिणतं। तच्चाऽनुपलम्भयोगेन। कतमः सम्यक् समाधिः। इह सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् सम्यक् समाधिं भावयति। विवेकनिःश्रितं विरागनिःश्रितं निरोधनिःश्रितं व्यवसर्गपरिणतं। तच्चाऽनुपलम्भयोगेन। इदं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं।

पुनरपरं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं। यदुत त्रयः समाधयः। कतमे समाधयस्त्रयः। शून्यता समाधिरानिमित्त समाधिरप्रणिहितसमाधिः। तत्र कतमः शून्यता समाधिः

कृत्स्न प्रश्रमन् कृत्स प्रश्रब्धिमीति प्रजानाति। एवं खलु सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन्नध्यात्मकायेऽनुपश्यी विहरत्यातापी संप्रजानन् स्मृतिमान् विनीयलोके ऽभिध्यादौर्मनस्ये तच्चानुपलम्भयोगेन।

पुनरपरं सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन्निममेव। कायमस्मात् यथास्थितं प्रत्यवेक्षते। अस्त्यस्मिन् काये [illegible] तद्यथापि नाम [illegible]

[illegible]

[illegible]	1	–
[illegible] Vol III, [illegible]		
[illegible]	1	6
[illegible]	1	1
[illegible]	1	1
[illegible]	3	2
[illegible]		12
[illegible] @ /10/ each	1	4
[illegible]	1	14
[illegible] @ /10/ each	4	6
[illegible] each	1	[illegible]
[illegible]	0	11
[illegible] @ /10/ each	3	14
[illegible]	2	1
[illegible] each	1	1
[illegible] each	2	[illegible]
[illegible]	1	1
[illegible]	1	4
[illegible]	1	1
* [illegible] @ /10/ each	9	6
* [illegible] @ /10/ each	11	14
* [illegible] @ /6/ each	0	4
[illegible] Fasc 1-14	10	0
[illegible] Vol I, [illegible] Vol II, Fasc [illegible]; Vol III, [illegible] Vol IV [illegible]; Vol V, Fasc 1-5; Part II, Vol II, [illegible] each	4	6
[illegible] Fasc 1 @ /10/ each	0	10
[illegible] Fasc 1-3 @ /10/ [illegible]	1	14
[illegible] from Fasc 1-3 @ /10/	1	14
[illegible] @ /10/ each	0	10
[illegible] Fasc 1-3 @ /10/	1	14
[illegible] Fasc 1-5 @ /10/	3	2
* [illegible] Fasc 1-3, 5-11 @ /10/ each	6	14
[illegible] Text and English) Fasc 1-6 @ 1/-	6	0
[illegible] @ /10/	0	10
[illegible] Fasc 1-6 @ /10/	3	12
* [illegible] Vol I, Fasc 1-6; Vol II Fasc 1-7, @ /10/ each	8	14
[illegible] Fasc 1-5, Vol II Fasc 1-4 @ /10/	5	10
Ditto Vol II Fasc 1-4 @ 1/4	3	12
[illegible] Fasc 1-7 @ /10/ each	6	8
[illegible] Fasc 1-6 @ /10/	3	12
[illegible] Fasc 1-3	1	12

Tibetan Series.

[illegible]sangraha, Vol I	2	0
A Lower Ladakhi version of Kesarsaga, Fasc 1-4, @ 1/- each ...	4	0
Nyayabindu of Dharmakirti, Fasc 1 ...	1	0
Pag-sam Thi Shin, Fasc 1-4 @ 1/- each	4	0
Rtogs brjod dpag hkhri Shin (Tib & Sans Avadana Kalpalata) Vol I, Fasc 1-8, Vol II Fasc 1-5 @ 1/- each	16	
Sher-Phyin Vol I, Fasc 1-5; Vol II Fasc 1-3, Vol. III, Fasc 1-6 @ 1/- each	14	0

Arabic and Persian Series.

Al Muqaddasi (English) Vol I, Fasc 1-4 @ 1/-	4	0
Ain-i-Akbari, Fasc, 1-22 @ 1/8/ each ...	33	0
Ditto (English) Vol I, Fasc 1-7, Vol II, Fasc. 1-5, Vol. III, Fasc 1-5, Index to Vol II, @ 2/- each ...	36	0
Akbarnamah, with Index, Fasc 1-37 @ 1/8/ each	55	8
Akbarnamah, English Vol I, Fasc 1-8, Vol II, Fasc. 1-7; Vol. III, Fasc 1, @ 1/4/ each	20	0
Arabic Bibliography, by Dr A Sprenger @ /10/	0	10
Conquest of Syria, Fasc 1-9 @ /10/ each	5	
Catalogue of Arabic Books and Manuscripts 1-2 @ 1/- each		

* The [illegible] fasciculi of these works are out of stock, and complete co[illegible]
[illegible]

एवं खलु सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् बहिर्द्धाकाये कायानुदर्शी विहरत्यातापी संप्रजानन् स्मृतिमान् विनीय लोकेऽभिध्यादौर्मनस्ये तच्चानुपलम्भयोगेन । पुनरपरं सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् यदा पश्यति शिवपथिकायामुज्झितानि मृतशरीराणि षड्रात्रमृतानि वा सप्तरात्रमृतानि वा काकैर्वा खाद्यमानानि कङ्कैर्वा कुररैर्वा गृध्रैर्वा वा श्वानैर्वा शृगालैर्वा श्वभिर्वा तदन्यैर्वा नानाविधैः प्राणकजातैः खाद्यमानानि । स इममेव कायं तत्रोपसंहरत्ययमपि काय एवं धर्मा एवं स्वभाव एतां धर्मतामनतिवृत्त । एवं खलु सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् बहिर्द्धाकाये कायानुदर्शी विहरत्यातापी संप्रजानन् स्मृतिमान् विनीय लोकेऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन ।

पुनरपरं सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् यदा पश्यति शिवपथिकायामुज्झितानि मृतशरीराणि विखादितानि अशुचीनि पूतीनि दुर्गन्धानि । स इममेव कायं तत्रोपसंहरत्ययमपि काय एवं धर्मा एवं स्वभाव एतां धर्मतामनतिवृत्त । एवं खलु सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् बहिर्द्धाकाये कायाऽनुदर्शी विहरत्यातापी संप्रजानन् स्मृतिमान् विनीय लोकेऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन । पुनरपरं सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् यदा पश्यति शिवपथिकायामस्थिशकलान् मांसरुधिरचितान् स्नायुविनिबद्धान् स इममेव कायं तत्रोपसंहरत्ययमपि काय एवं धर्मा एवं

BIBLIOTHECA INDICA:

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL

NEW SERIES, No. 1292.

शतसाहस्रिका प्रज्ञापारमिता ।

ÇATASĀHASRIKĀ-PRAJÑĀ-PĀRAMITĀ

A

THEOLOGICAL AND PHILOSOPHICAL DISCOURSE

OF

BUDDHA WITH HIS DISCIPLES

(IN A HUNDRED THOUSAND STANZAS)



EDITED BY

PRATAPACANDRA GHOSA

PART I FAS XVI

CALCUTTA

PRINTED AT THE BAPTIST MISSION PRESS

AND PUBLISHED BY THE

ASIATIC SOCIETY, 1, PARK STREET

1911

स्थीन्यस्थेन गिरः कपालान्यौनि। स इममेव कायं तत्रोपसंहर-त्ययमपि काय एव धर्मा एवं स्वभाव एतां धर्मतामनतिवृत्तः। एवं खलु सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् बहिर्द्धा काये कायानुदर्शी विहरत्यातापी संप्रजानन् स्मृतिमान् विनीयलोकेऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन। पुनरपरं सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् यदा पश्यति शिवपथिकायामस्थीन्यनेक वार्षिकानि वातपपरितापितानि श्वेतानि शङ्खनिभानि। स इममेव कायं तत्रोपसंहरत्ययमपि काय एव धर्मा एवं स्वभाव एतां धर्मतामनतिवृत्तः। एवं खलु सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् बहिर्द्धाकाये कायानुदर्शी विहरत्यातापी संप्रजानन् स्मृतिमान् विनीयलोके-ऽभिध्यादौर्मनस्ये तच्चानुपलम्भयोगेन।

पुनरपरं सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् यदा पश्यति शिवपथिकायामस्थीन्यनेक वार्षिकाणि तिरोभूतानि नीलानि कपोतवर्णानि पूतीनि चूर्णजातानि पृथिव्यां पांशुनासमसमीभूतानि। स इममेव कायं तत्रोपसंहरतित्यय-मपि काय एवं धर्मा एवं स्वभाव एतां धर्मतामनतिवृत्तः। एवं खलु सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन्न-ध्यात्मकाये कायाऽनुदर्शी विहरत्यातापी संप्रजानन् स्मृतिमान् विनीयलोके ऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन।

बहिर्द्धाकाये काया ऽनुदर्शी विहरत्यातापी संप्रजानन् स्मृतिमान् विनीयलोके ऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन।

रसोऽनित्य इति ज्ञानं स्पर्शोऽनित्य इति ज्ञानं धर्मा अनित्या इति ज्ञानं। चक्षुर्धातुरनित्य इति ज्ञानं। रूपधातुरनित्य इति ज्ञानं चक्षुर्विज्ञानधातुरनित्य इति ज्ञानं। श्रोत्र धातुरनित्य इति ज्ञानं। शब्दधातुरनित्य इति ज्ञानं। श्रोत्र विज्ञानधातुरनित्य इति ज्ञानं। घ्राणधातुरनित्य इति ज्ञानं। गन्धधातुरनित्य इति ज्ञानं। घ्राण-विज्ञानधातुरनित्य इति ज्ञानं। जिह्वाधातुरनित्य इति ज्ञानं। रसधातुरनित्य इति ज्ञानं। जिह्वाविज्ञानधातुरनित्य इति ज्ञानं। कायधातुरनित्य इति ज्ञानं। स्पर्शधातुरनित्य इति ज्ञानं। कायविज्ञानधातुरनित्य इति ज्ञानं। मनोधातुरनित्य इति ज्ञानं। धर्मधातुरनित्य इति ज्ञानं। मनोविज्ञानधातुरनित्य इति ज्ञानं। पृथिवीधातुरनित्य इति ज्ञानं। अब्धातुरनित्य इति ज्ञानं। तेजोधातुरनित्य इति ज्ञानं। वायुधातुरनित्य इति ज्ञानं। आकाशधातुरनित्य इति ज्ञानं। विज्ञानधातुरनित्य इति ज्ञानं। अविद्याऽनित्येति ज्ञानं। संस्कारा अनित्या इति ज्ञानं। विज्ञान-मनित्यमिति ज्ञानं। नामरूपमनित्यमिति ज्ञानं। षडायतनमनित्य-मिति ज्ञानं। स्पर्शोऽनित्य इति ज्ञानं। वेदनाऽनित्येति ज्ञानं। तृष्णाऽनित्येति ज्ञानं। उपादानमनित्यमिति ज्ञानं। भवोऽनित्य इति ज्ञानं। जातिरनित्येति ज्ञानं। जरामरणमनित्यमिति ज्ञानं।

तत्र [illegible] परस्परतो [illegible] ज्ञानं। तत्र [illegible] ज्ञानं। [illegible] ज्ञानं। तत्र [illegible]

[illegible]

[illegible] ऋद्धिपादाः। [illegible]
महासत्त्वः [illegible]
समन्वागत ऋद्धिपादान् भावयति। [illegible]
निरोधनिःश्रित व्यवसर्गपरिणत। [illegible]
ऋद्धिपादान् भावयति। विवे[illegible]निःश्रित वि[illegible]निःश्रित निरोध-
निःश्रित व्यवसर्गपरिणत चित्तसमाधिप्रहाणसंस्कारसमन्वागत-
मृद्धिपादान् भावयति। विवेकनिःश्रित विरागनिःश्रित। निरोध-
निःश्रित व्यवसर्गपरिणत। समाधिप्रहाणसंस्कारं समन्वागतमृद्धि-
पादान् भावयति। विवेकनिःश्रित विरागनिःश्रितं निरोधनिःश्रित
व्यवसर्गपरिणत। तच्चानुपलम्भयोगेन। इदमपि कुलपुत्र बोधि-
सत्त्वस्य महासत्त्वस्य महायान।

समापत्तिः । विज्ञानाऽनन्त्यायतनसमापत्तिराकिञ्चन्यायतनसमापत्ति नैव सञ्ज्ञानासंज्ञायतनसमापत्तिः संज्ञावेदयितनिरोधसमापत्तिरयमुच्यते अवितर्कः अविचारः समाधिः। इदमपि सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं । तच्चाऽनुपलम्भयोगेन ।

पुनरपरं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं । यदुत दशानुस्मृतयः । कतमादश, बुद्धाऽनुस्मृति धर्म्माऽनुस्मृतिः संघाऽनुस्मृतिः शीलाऽनुस्मृतिः त्यागाऽनुस्मृतिः देवताऽनुस्मृतिः । आनापाऽनुस्मृतिरुद्वेगाऽनुस्मृतिर्मरणाऽनुस्मृति कायगताऽनुस्मृतिः । रिदमपि सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं । तच्चाऽनुपलम्भयोगेन ।

पुनरपरं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं । यदुत चत्वारि ध्यानानि । चत्वार्य्यप्रमाणानि चतस्र आरूप्यसमापत्तयः । अष्टौविमोक्षाः । नवाऽनुपूर्व्वविहारसमापत्तयः । तत्र कतमानि चत्वारि ध्यानानि । इह सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् विविक्तं कामैर्व्विविक्तं पापकैरकुशलैधर्म्मैः सवितर्कं सविचारं विवेकजं प्रीतिसुखं प्रथमं ध्यानमुपसम्पद्यविहरति। सवितर्कं सविचाराणां व्युपशमादध्यात्मसम्प्रसादाच्चेतस एकोतीभावादवितर्कमविचारं समाधिजं प्रीतिसुख द्वितीयं ध्यानमुपसम्पद्यविहरति । स प्रीतेर्व्विरागादुपेक्षकोविहरति । स्मृतिमान् सम्प्रजानन् सुखञ्च कायेन प्रतिसम्वेदयति । यत्तदार्य्या आचक्षते उपेक्षकः स्मृतिमान् सुखविहारीनिष्प्रीतिकं तृतीयं ध्यानमुपसम्पद्यविहरति । सुखस्य च प्रहाणात दुःखस्य च प्रहाणात् पूर्व्वमेव

विवेकनिःश्रित विरागनिःश्रित निरोधनिःश्रित व्यवसर्गपरिणत। तच्चाऽनुपलम्भयोगेन। तत्र कतमत्प्रस्रब्धि सम्बोध्यङ्ग।

इह सुभूते बोधिसत्त्वो महासत्त्व प्रज्ञापारमितायां चरन् प्रस्रब्धिसम्बोध्यङ्ग भावयति। विवेकनिःश्रित विरागनिःश्रित निरोधनिःश्रित व्यवसर्गपरिणत। तच्चाऽनुपलम्भयोगेन। तत्र कतमत्समाधिसम्बोध्यङ्ग। इह सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् समाधि सम्बोध्यङ्ग भावयति। विवेकनिःश्रित विरागनिःश्रितं निरोधनिःश्रित व्यवसर्गपरिणत तच्चाऽनुपलम्भयोगेन। तत्र कतमदुपेक्षासम्बोध्यङ्ग। इह सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन्नुपेक्षासम्बोध्यङ्ग भावयति विवेकनिःश्रितं विरागनिःश्रितं निरोधनिःश्रित व्यवसर्गपरिणतं तच्चाऽनुपलम्भयोगेन। इदमपि सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायान।

पुनरपरं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायान यदुतार्याष्टाङ्गोमार्गः। सम्यग्दृष्टिः। सम्यक् सङ्कल्पः। सम्यक् वाक्। सम्यक् कर्मान्तः। सम्यगाजीवः। सम्यग्व्यायामः। सम्यक् स्मृतिः। सम्यक् समाधिः। तत्र कतमा सम्यग्दृष्टिः। इह सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् सम्यग्दृष्टिं भावयति। विवेकनिःश्रितं विरागनिःश्रितं निरोधनिःश्रित व्यवसर्गपरिणत तच्चाऽनुपलम्भयोगेन। तत्र कतमः सम्यक् सङ्कल्पः। इह सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् सम्यक् सङ्कल्पं भावयति। विवेकनिःश्रित विरागनिःश्रितं निरोधनिःश्रित व्यवसर्गपरिणतं। तच्चाऽनुपलम्भयोगेन। कतमा सम्यग्वाक्। इह

किञ्चिदित्याकिञ्चन्यायतनमुपसम्पद्य विहरति। सर्व्वश आकिञ्चन्यायतन समतिक्रमान्नैव संज्ञानासंज्ञायतनमुपसम्पद्य विहरति। तच्चाऽनुपलम्भयोगेन। इमास्तस्य आनुपूर्व्वसमापत्तयः। तत्र कतमेऽष्टौ विमोक्षाः। रूपरूपाणि पश्यत्ययं प्रथमो विमोक्षाः। अध्यात्मरूपसंज्ञीवहिर्द्धारूपाणि पश्यत्ययं द्वितीयो विमोक्षाः। शून्यताया अधिमुक्तोभवत्ययं तृतीयो विमोक्षाः। स सर्व्वशो-रूपसंज्ञानां समतिक्रमात् प्रतिघसंज्ञानामस्तङ्गमान्नानात्वसंज्ञानाम मनसिकारादनन्तमाकाशमित्याकाशानन्त्यायतनमुपसम्पद्य विहरति। अयं चतुर्थो विमोक्षः। स सर्व्वश आकाशानन्त्यायतन समतिक्रमादनन्तं विज्ञानमिति विज्ञानानन्त्यायतनमुपसम्पद्य विहरति। अयं पञ्चमो विमोक्षः। स सर्व्वशोविज्ञानानन्त्यायतन समतिक्रमान्नास्ति किञ्चिदित्याकिञ्चन्यायतनमुपसम्पद्य विहरति। अयं षष्ठो विमोक्षः। स सर्व्वश आकिञ्चन्यायतन समतिक्रमान्नैव संज्ञानासंज्ञायतनमुपसम्पद्य विहरति। अयं सप्तमो विमोक्षः। स सर्व्वशो नैव संज्ञानासंज्ञायतनसमतिक्रमात् सञ्ज्ञावेदयित निरोधमुपसम्पद्य विहरति। अयमष्टमोविमोक्षाः। तच्चाऽनुपलम्भयोगेन। इमेऽष्टौ विमोक्षाः।

तत्र कतमा नवानुपूर्व्वाविहारसमापत्तयः। इह सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् विविक्त कामैर्विविक्तं पापकैरकुशलैर्धर्म्मैः, स वितर्कः स विचार विवेकज प्रीतिसुखं प्रथम ध्यानमुपसम्पद्य विहरति। स वितर्कसविचाराणां व्युपशमादध्यात्मसम्प्रसादाच्चेतस एकोतीभावादवितर्कमविचारं

[illegible]

पुनरपरं सुभूते [illegible] । [illegible]
दश ज्ञानानि । कतमानि दश । दुःखज्ञान समुदयज्ञान निरोध-ज्ञान मार्गज्ञान क्षयज्ञानमनुत्पादज्ञान धर्मज्ञानमन्वयज्ञान संवृतिज्ञान परिचयज्ञान यथारुतज्ञान । तत्र कतमद् दुःखज्ञान यद् दुःखस्याऽनुत्पादज्ञान । तत्र कतमत्समुदयज्ञान यत्समुदयस्य प्रहाणज्ञान । तत्र कतमन्निरोधज्ञान यद्दुःखनिरोधज्ञान । तत्र कतमत् मार्गज्ञान यदार्याष्टाङ्गमार्गज्ञान । तत्र कतमत् क्षयज्ञान यद्रागद्वेषमोहक्षयज्ञानं । तत्र कतमदनुत्पादज्ञान यद्भवगत्यनुत्पाद-ज्ञानं । तत्र कतमद्धर्मज्ञान यत्पञ्चाना स्कन्धानामपरिचति-मपरिच्छेदज्ञान । तत्र कतमदन्वयज्ञान यच्चक्षुरनित्यमितिज्ञान श्रोत्रमनित्यमिति ज्ञानं घ्राणमनित्यमिति ज्ञान जिह्वाऽनित्येति ज्ञान कायोऽनित्य इति ज्ञान मनोऽनित्यमिति ज्ञान । रूपमनित्य-मिति ज्ञान शब्दोऽनित्य इति ज्ञान गन्धोऽनित्य इति ज्ञानं

नानाऽधिमुक्तिकानां यथाभूत प्रजानाति । परसत्वानां परपुद्गला-नामिन्द्रियपरापरज्ञतानां यथाभूतं प्रजानाति । सर्व्वच गामिनीं प्रतिपदं यथाभूतं प्रजानाति । इन्द्रियबलबोध्यङ्गध्यानाविमोच-समाधिसमापत्तिसङ्क्लेशव्यवदानख्यान यथाभूतं प्रजानाति । सोऽनेकविधं पूर्व्वनिवासमनुस्मरति । एकमपि जातिमनुस्मरति । यावज्जातिशतमपि सहस्रमपि दशसहस्रमपि जातिकोटिमपि जातिकोटिशतमपि जातिकोटिसहस्रमपि जातिकोटिशतसहस्र मपि जातिकोटिनियुतशतसहस्रमप्यनुस्मरति । एकमपि कल्पमनु-स्मरति । यावत् कल्पशतमपि कल्पसहस्रमपि कल्पशतसहस्रमपि यावदनेकान्यपि कल्पकोटिनियुतशतसहस्राण्यनुस्मरति । अचाह-मासमेवं नामैवं गोच एवंजातिः । एवमाहारः एवं चिरस्थितिका एवमायुष्मन्तः । सोऽहं ततश्च्युतःसन्नमुत्रोपपन्नो यावत्ततश्च्युतः इहो पन्न इति । यावत् साकार सोद्देशं सनिर्द्देशमनेकविधं पूर्व्वानिवास-मनुस्मरति । सदिव्येन चक्षुषा विशुद्धेनातिक्रान्त मानुषेण सत्वान् पश्यति । च्यवमानानुत्पद्यमानानुपपन्नानापि सुवर्णान् दुर्वर्णान् हीनान् प्रणीतान् सुगतान् दुर्गतान यावद्यथा कर्म्मोपगान् सत्वान् प्रजानाति । अमी भवन्तः सत्वाः कायदुश्चरितेन समन्वागताः वाक्दुश्चरितेन समन्वागताः । मनोदुश्चरितेन समन्वागताः । आर्य्याणामपवादकामिथ्यादृष्टयस्तद्धेतो स्तत्प्रत्ययकायस्य भेदाद-पायदुर्गतिविनिपात नरकेषूपपद्यन्ते । अमी पुनर्भवन्तः सत्वाः कायसुचरितेन समन्वागताः वाक्सुचरितेन समन्वागताः मन.सु-चरितेन समन्वागता । आर्य्याणामनपवादका. सम्यग्दृष्टय स्तद्धे-

Dictionary of Arabic Technical Terms, and Appendix Fasc 1 21 @ 1/8/ each ... ... [illegible]
Fara Nama ... ... [illegible]
Farhang-i-Rashidi, Fasc 1 14 @ 1/8/ each [illegible]
Fihrist i-Tusi, or Tusy's list of Shy'ah Books, Fasc 1 4 @ 1/ each [illegible]
History of Gujarat ... [illegible]
Haft Asman, History of the Persian Masnawi, Fasc 1 @ /12 each [illegible]
History of the Caliphs, (English) Fasc 1-6 @ 1/4/ each [illegible]
Iqbalnamah-i Jahangiri, Fasc 1-3 @ /10 each [illegible]
Isabah, with Supplement, 51 Fasc @ 1/- each ... 51
Ma'asir i Rahimi, Part I, Fasc. 1 [illegible]
Maasir-ul Umara, Vol I, Fasc 1 9, Vol II, Fasc. 1 9, Vol III, 1 10 Index to Vol I, Fasc 10-11, Index to Vol II, Fasc 10 12 Index to Vol III, Fasc 11-12 @ /1/ each ... [illegible]
Mariu'l Ilah'l Mu'Dila [illegible]
Muntakhabu t-Tawarikh, Fasc 1 15 @ 10/ each [illegible]
Ditto (English) Vol I, Fasc 1 7, Vol II, Fasc 1 5 and 3 Indexes; Vol III, Fasc 1 @ 1 each ... [illegible]
Muntakhabu l Lubab, Fasc 1 19 @ /10/ each [illegible]
Ditto Part 3, Fasc 1 [illegible]
Nukhbatu l Fikr, Fasc 1 @ /10/ [illegible]
Nizami's Khiradnamah i Iskandari, Fasc 1 2 @ /12 each [illegible]
Qawamin's Sayyad of Khuda Yar Khan 'Abbasi, edited in the original Persian with English notes by Lieut Col D C Phillott [illegible]
Riyazu s-Salatin Fasc 1 5 @ /10 each [illegible]
Ditto (English) Fasc 1 5 @ 1/- [illegible]
[illegible] Khushnavisan [illegible]
[illegible] (English), Fasc 1 14 @ 1 each [illegible]
Ditto Index [illegible]
[illegible] shahi of Ziya al din Barni, Fasc 1 7 @ /10/ each [illegible]
[illegible] shahi, of Shams i Siraj Afif, Fasc 1 8 @ /10/ each [illegible]
[illegible] Arabic Poems, Fasc 1 3 @ 1 each [illegible]
[illegible] A Grammar of the Turki Language in Persian [illegible]
[illegible] Khan, Khan Khanan [illegible]
[illegible]
[illegible]
[illegible] each [illegible]

[illegible]

[illegible]

नानाऽधिमुक्तिकानां यथाभूतं प्रजानाति । परसत्त्वानां परपुद्गला-नामिन्द्रियपरापरज्ञतानां यथाभूतं प्रजानाति । सर्व्वत्र गामिनीं प्रतिपदं यथाभूत प्रजानाति । इन्द्रियबलबोध्यङ्गध्यानाविमोच-समाधिसमापत्तिसंक्लेशव्यवदानस्थानं यथाभूतं प्रजानाति । सोऽनेकविधं पूर्व्वनिवासमनुस्मरति । एकमपि जातिमनुस्मरति । यावज्जातिशतमपि सहस्रमपि दशसहस्रमपि जातिकोटिमपि जातिकोटिशतमपि जातिकोटिसहस्रमपि जातिकोटिशतसहस्र मपि जातिकोटिनियुतशतसहस्रमप्यनुस्मरति । एकमपि कल्पमनु-स्मरति । यावत् कल्पशतमपि कल्पसहस्रमपि कल्पशतसहस्रमपि यावदनेकान्यपि कल्पकोटिनियुतशतसहस्राण्यनुस्मरति । अत्राह-मासमेव नामैवं गोत्र एवजातिः । एवमाहारः एवं चिरस्थितिका एवमायुष्मन्तः । सोऽहं ततश्च्युतःसन्नमुत्रोपपन्नो यावत्ततश्च्युतः इहो पन्न इति । यावत् साकारं सोद्देशं सनिर्द्देशमनेकविधं पूर्व्वानिवास-मनुस्मरति । सदिव्येन चक्षुषा विशुद्धेनातिक्रान्त मानुषेण सत्वान् पश्यति । च्यवमानानुत्पद्यमानानुपपन्नानापि सुवर्णान् दुर्वर्णान् हीनान् प्रणीतान् सुगतान् दुर्गतान यावद्यथा कर्म्मोपगान् सत्वान् प्रजानाति । अमी भवन्तः सत्वाः कायदुश्चरितेन समन्वागताः वाक्दुश्चरितेन समन्वागताः । मनोदुश्चरितेन समन्वागताः । आर्य्याणामपवादका मिथ्यादृष्टयस्तद्धेतो स्तत्प्रत्ययकायस्य भेदाद-पायदुर्गतिविनिपात नरकेषूपपद्यन्ते । अमी पुनर्भवन्तः सत्वाः कायसुचरितेन समन्वागताः वाक्सुचरितेन समन्वागता मनःसु-चरितेन समन्वागता । आर्य्याणामनपवादका सम्यग्दृष्टय स्तद्धे-

तोऽस्मात्ययं कायस्य भेदात् सुगतौ स्वर्गलोके देवेषूपपद्यन्ते। [illegible]
आस्रवाणां क्षयादनास्रवचेतोविमुक्तिं प्रज्ञाविमुक्तिं स्वयमभि[illegible]
साक्षात्कृत्वोपसम्पद्य विहरन्ति। क्षीणा मे जातिः उषितं ब्रह्मचर्यं [illegible]
करणीयं। नापरमितोऽस्मिति प्रजानाति। इदमपि सुभूते बोधि[illegible]
महासत्त्वस्य महायानं। तच्चानुपलम्भयोगेन।

पुनरपरं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं। [illegible]
चत्वारि वैशारद्यानि। कतमानि चत्वारि। सम्यक्संबुद्धस्य [illegible]
प्रतिजानतः। इमे धर्मा अनभिसंबुद्धा इति। अत्र बत मां [illegible]
ब्राह्मणो वा देवो वा मारो वा ब्रह्मा वा केनचिद्वा पुनर्[illegible]
सह धर्मेण चोदयेदिति। निमित्तं न समनुपश्याम्यत्र चाहं [illegible]
समनुपश्यन् क्षेमप्राप्तो विहराम्यभयप्राप्तो वैशारद्य[illegible]
[illegible]स्थानं प्रजानामि। परिषद्गतः सम्यक्सिंह[illegible]
नदति। ब्राह्मं चक्रं प्रवर्तयत्यप्रवर्त्यं श्रमणेन वा ब्राह्म[illegible]
देवेन वा मारेण वा ब्रह्मणा वा केनचिद्वा पुनर्लोके सह [illegible]
[illegible] मे प्रतिजानत। इमे आस्रवा अपरिक्षीणा इति।
[illegible] मां श्रमणो वा ब्राह्मणो वा देवो वा मारो वा [illegible]
[illegible] पुनर्लोके सह धर्मेण चोदयेदिति। निमित्तमेतदहं [illegible]
[illegible]

पुनरपरं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं। यदुत त्रीणीन्द्रियाणि। कतमानि त्रीणि। अज्ञातमाज्ञास्यामीतीन्द्रियमाज्ञेन्द्रियमाज्ञातावीन्द्रियं। तत्र कतमदज्ञातमाज्ञास्यामीतीन्द्रियं। यच्छैक्षाणां पुद्गलानामनभिसमिता विनामिता सम्यद्विनयं श्रद्धेन्द्रियं वीर्य्येन्द्रियं स्मृतीन्द्रियं समाधीन्द्रियं प्रज्ञेन्द्रियमिदमुच्यतेऽनाज्ञातमाज्ञास्यामीतिन्द्रियं। तत्र कतमदाज्ञेन्द्रियं। यच्छैक्षाणां पुद्गलानामाज्ञातता श्रद्धेन्द्रिय वीर्य्येन्द्रियं स्मृतीन्द्रियं समाधीन्द्रियं प्रज्ञेन्द्रियमिदमुच्यते आज्ञेन्द्रियं। तत्र कतमदाज्ञातावीन्द्रियं। यच्छैक्षाणां पुद्गलानामर्हतां प्रत्येकबुद्धानां बोधिसत्त्वानां तथागतानां श्रद्धेन्द्रियं वीर्य्येन्द्रियं स्मृतीन्द्रिय समाधीन्द्रियं प्रज्ञेन्द्रियमिदमुच्यते आज्ञातावीन्द्रिय। इदमपि सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं। तच्चाऽनुपलम्भयोगेन।

पुनरपरं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं। यदुत त्रयः समाधयः। कतमे त्रयः सवितर्कः सविचारः समाधिरवितर्कोऽविचारमात्रः समाधिरवितर्कोऽविचारः समाधिः। तत्र कतमः सवितर्कः सविचारः समाधिः। इह सुभूते बोधिसत्त्वो महासत्त्वो विविक्तं कामैर्व्विविक्तं पापकैरकुशलैर्धर्म्मैः सवितर्कं सविचार विवेकजप्रीतिसुखं प्रथमं ध्यानमुपसम्पद्यविहरति। अयमुच्यते सवितर्कः सविचारः समाधिः। तत्र कतमोऽवितर्कोऽविचारमात्र समाधिः। या प्रथमस्य ध्यानस्य द्वितीयस्य ध्यानस्यान्तरिका। अयमुच्यतेऽवितर्कोऽविचारमात्रः समाधिः। तत्र कतमोऽविचारः समाधिः। यत् द्वितीयं ध्यानं तृतीय ध्यान चतुर्थं ध्यानं आकाशानन्त्यायतन

ऽष्टादशावेणिका बुद्धधर्माः । कतमेऽष्टादश । यान् रात्रिं तथागतो ऽनुत्तरां सम्यक्संबोधिमभिसंबुद्धो यां च रात्रिं सदेवकं लोकं समारकं सब्रह्मकं सश्रमणब्राह्मणीं प्रजां सदेवमानुषासुरां दुःखक्षयाय गामिनो मार्गस्यानुशासिष्यानुपधिशेषे निर्वाणधातौ परिनिर्वास्यत्येव अत्रान्तरा नास्ति तथागतस्य स्खलितं नास्ति रवितं नास्ति मुषितस्मृतिता नास्ति नानात्वसंज्ञा नास्त्यसमाहितं चित्तं नास्ति अप्रतिसंख्यायोपेक्षा नास्ति छन्दपरिहाणिर्नास्ति वीर्यपरिहाणिर्नास्ति स्मृतिपरिहाणिर्नास्ति समाधिपरिहाणिर्नास्ति प्रज्ञापरिहाणिर्नास्ति विमुक्तिपरिहाणिर्नास्ति विमुक्तिज्ञानदर्शनपरिहाणिः । सर्वं कायकर्म ज्ञानपूर्वंगमं ज्ञानानुपरिवर्त्ति । सर्वं वाक्कर्म ज्ञानपूर्वंगमं ज्ञानानुपरिवर्त्ति । सर्वं मनःकर्म ज्ञानपूर्वंगमं ज्ञानानुपरिवर्त्ति । अतीतेऽध्वन्यप्रतिहतमसङ्गं ज्ञानदर्शनं प्रवर्त्तते । अनागतेऽध्वन्यप्रतिहतमसङ्गज्ञानदर्शनं प्रवर्त्तते । प्रत्युत्पन्नेऽध्वान्यप्रतिहतमसङ्गज्ञानदर्शनं प्रवर्त्तते । इदमपि सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं । तच्चाऽनुपलम्भयोगेन ।

पुनरपरं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं यदुत धारणीमुखानि । कतमानि धारणीमुखानि । अक्षरसमता भाष्य- ... ॥ अक्षरमुखमक्षरप्रवेशः । तत्र कतमदक्षरमुखाक्षरप्रवेशः । ... सर्वधर्माणामाद्यनुत्पन्नत्वात् । रकारो मुखं सर्वधर्माणां ... त्वात् । यकारो मुखं सर्वधर्माणां परमार्थनिर्देशत्वात् । ... सर्वधर्माणां च्यवनोपपत्त्यनुपलब्धित्वात् । सर्वधर्मा न ... नोपपद्यन्ते । नकारो मुखं सर्वधर्माणां नामापगतत्वात् ।

च सौमनस्य दौर्मनस्ययोरस्तङ्गमाददुःखासुखमुपेक्षास्मृतिपरिशुद्धं चतुर्थं ध्यानमुपसम्पद्य विहरति । अनुपलम्भयोगेन । इमानि चत्वारि ध्यानानि । तत्र कतमानि चत्वार्य्यप्रमाणानि इह सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् मैत्रीसहगतेन चित्तेन विपुलेन महद्गतेनाऽद्वयेनाऽप्रमाणेनाऽवैरेणाऽसपत्नेनाव्यावध्येन धर्मधातुपरमे लोके आकाशधातुपर्य्यवसाने दशदिशःस्फुरित्वाऽधिमुच्योपसम्पद्य विहरति । महाकरुणासहगतेन चित्तेन विपुलेन महद्गतेनाऽद्वयेनाऽप्रमाणेनाऽवैरेणाऽसपत्नेनाऽव्यावध्येन धर्मधातुपरमेलोक आकाशधातुपर्य्यवसाने दशदिशःस्फुरित्वाऽधिमुच्योपसम्पद्य विहरति । समुदितासहगतेन चित्तेन विपुलेन महद्गतेनाद्वयेनाऽप्रमाणेनाऽवैरेणाऽसपत्नेनाव्यावध्येन धर्मधातुपरमेलोक आकाशधातुपर्य्यवसाने दशदिशःस्फुरित्वाऽधिमुच्योपसम्पद्य विहरति । सउपेक्षासहगतेन चित्तेन विपुलेन महद्गतेनाऽद्वयेनाऽप्रमाणेनाऽवैरेणाऽसपत्नेनाऽव्यावध्येन धर्मधातुपरमेलोक आकाशधातुपर्य्यवसाने दशदिशःस्फुरित्वाऽधिमुच्योपसम्पद्य विहरति । अनुपलम्भयोगेन । इमानि चत्वार्य्यप्रमाणानि ।

कतमास्तत्र आरूप्यसमापत्तयः । इह सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् सर्व्वशोरूपसंज्ञानां समतिक्रमात् प्रतिघसंज्ञानामस्तङ्गमान्नानात्वसंज्ञानाम मनसिकारादनन्तमाकाशमित्याकाशानन्त्यायतनमुपसम्पद्य विहरति । सर्व्वश आकाशाऽनन्त्यायतन समतिक्रमादनन्त विज्ञानमिति विज्ञानानन्त्यायतनमुपसम्पद्य विहरति । स सर्व्वशोविज्ञानानन्त्यायतनसमतिक्रमान्नास्ति

ह्वकारो मुखं सर्वधर्माणामाह्वानानुपलब्धितः। त्सकारो मुखं सर्वधर्माणामुत्साहानुपलब्धितः। घकारो मुखं सर्वधर्माणां घनानुपलब्धितः। ठकारो मुखं सर्वधर्माणां विठपनानुपलब्धितः। णकारो मुखं सर्वधर्माणां रणविगतत्वात्। न कश्चिदागच्छति नागच्छति न तिष्ठति नाभिनिषीदति न शय्यां कल्पयति न विकल्पयति फकारो मुखं सर्वधर्माणां फलानुपलब्धित्वात्। स्ककारो मुखं सर्वधर्माणां स्कन्धानुपलब्धित्वात्। य्सकारो मुखं सर्वधर्माणां य्सकारानुपलब्धित्वात्। श्चकारो मुखं सर्वधर्माणां श्चर्यानुपलब्धित्वात्। टकारो मुखं सर्वधर्माणां टकारानुपलब्धित्वात्। ढकारो मुखं सर्वधर्माणां ढकारानुपलब्धित्वात्। पर्यन्तनिष्ठा ह्येतेऽक्षरैर्नाभिलप्यन्ते। नान्यत उक्तत्वं वाच्यव्यवहारः। तत्कस्य हेतोर्न हि कश्चित् किञ्चिदन्यदक्षरमवशिष्यते येनाभिलप्येत। येन निर्दिश्यते यस्मिन्वा दृष्टेन वाच्येत। तद्यथापि नाम सुभूते आकाशमेव सर्वधर्मा अनुगन्तव्याः। अयमुच्यते धारणीमुखमेव अकाराद्यक्षरनिर्देशतश्च। यो हि कश्चित् सुभूते बोधिसत्त्वो महासत्त्वः इदमकाराद्यक्षरकौशल्यं जानाति। स न कश्चिद्दु संदति। सर्वधर्मसमतायां संबोधयिष्यति। रुतज्ञानकौशल्यं प्रतिलप्स्यते। यो हि कश्चित् सुभूते बोधिसत्त्वो महासत्त्वः इममकाराद्यक्षरप्रवेशमुद्रामकाराद्यक्षरप्रवेशमुद्रापदानि श्रोष्यति। श्रुत्वा चोद्ग्रहीष्यति धारयिष्यति वाचयिष्यति पर्यवाप्स्यति। परेभ्यश्च देशयिष्यति न च प्रतीत्यबुद्ध्या तस्य विंशतिरनुशंसाः प्रतिकाङ्क्षितव्याः। कतमे विंशतिः। तद्यथा स्मृतिमांश्च भविष्यति।

समाधिजं प्रीतिसुखं द्वितीयं ध्यानमुपसम्पद्य विहरति। सप्रीतेर्विरागादुपेक्षको विहरति। स्मृतिमान् सम्प्रजानन् सुखं कायेन प्रतिसंवेदयति। यत्तदार्या आचक्षते उपेक्षकः स्मृतिमान् सुखविहारी निष्प्रीतिकं तृतीयं ध्यानमुपसम्पद्य विहरति। सुखस्य च प्रहाणात् दुःखस्य च प्रहाणात् पूर्व्वमेव सौमनस्य दौर्मनस्ययो-रस्तङ्गमाददुःखाऽसुखमुपेक्षा स्मृतिपरिशुद्धं चतुर्थं ध्यानमुपसम्पद्य विहरति। स सर्व्वशो रूपसंज्ञानां समतिक्रमात् प्रतिघसंज्ञानाम-स्तङ्गमान्नानात्वसंज्ञानाममनसिकारादनन्तमाकाशमनित्याकाशान-न्त्यायतनमुपसम्पद्य विहरति। स सर्व्वश आकाशानन्त्यायतन समतिक्रमादनन्तं विज्ञानमितिविज्ञानानन्त्यायतनमुपसम्पद्य विह-रति। स सर्व्वशो विज्ञानानन्त्यायतन समतिक्रमान्नाकिञ्चिदित्या किञ्चन्यायतनमुपसम्पद्य विहरति। स सर्व्वश आकिञ्च न्यायतन समतिक्रमान्नैवसंज्ञाना संज्ञायतनमुपसम्पद्य विहरति। स सर्व्वशोनैव संज्ञानासंज्ञायतन समतिक्रमात् संज्ञा वेदायतिनिरोधमुपसम्पद्य विहरति। इमान वा ऽनुपूर्व्वविहारसमापत्तयः।

पुनरपरं सुभूते वोधिसत्त्वस्य महासत्त्वस्य महायानं। यदुत दश तथा गतवलानि। कतमानि दश। इह सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् स्थानञ्च स्थानतः। अस्थानञ्चा-स्थानता यथाभूतं प्रजानाति। अतीतानागतप्रत्युत्पन्नानां धर्म्माणां कर्म्मसमादानानाञ्च स्थानशोहेतुशः कर्म्मविपाकं यथाभूतं प्रजानाति। नानाधातुर्लोकोऽनेकधातुर्लोकेऽनेकधातुलोक इति। यथाभूतं प्रजानाति। परसत्वानां परपुद्गलानामनेकाधिमुक्तिकानां

अथ दशमः परिवर्त्तः।

यदपि सुभूतिरेवमाह। कथं बोधिसत्त्वो महासत्त्वो महायान-
ास्थितो भवतीति। इह सुभूते बोधिसत्त्वो महासत्त्वः षट्सु
रमितासु चरन् भूमेर्भूमिं संक्रामति। कथञ्च सुभूते बोधि-
त्वोमहासत्त्वः षट्सु पारमितासु चरन् भूमेर्भूमिं संक्रामति
हुत संक्रान्त्यासर्व्वधर्म्माणां न हि कश्चिद्धर्म्म आगच्छति वा
च्छति वा संक्रामति वा अपसंक्रामति वा। अपि तु या सर्व्व-
र्म्माणां भूमिस्तां स न मन्यते। न चिन्तयति। न भूमिपरिकर्म्म
करोति। न च तां भूमिं समनुपश्यति। तत्र कतमद्बोधिसत्त्वस्य
ासत्त्वस्य भूमिपरिकर्म्म। प्रथमायां सुभूते भूमौ वर्त्तमानेन
धिसत्त्वेन महासत्त्वेन दशपरिकर्म्माणि करणीयानि। कतमानि
। अध्याशयादि परिकर्म्माऽनुपलम्भयोगेन हितवस्तुतापरिकर्म्म-
मित्ताऽनुपलब्धितामुपादाय। सर्व्वसत्त्वसमचित्ततापरिकर्म्मसत्त्वा-
लब्धितामुपादाय। त्यागपरिकर्म्मदानदायकपरिग्राहकाऽनुप-
ब्धितामुपादाय। कल्याणमित्रसेवनापरिकर्म्मतैरमण्यतामुपादाय।
पर्य्येष्टिपरिकर्म्मसर्व्वधर्म्माऽनुपलब्धितामुपादाय। अभीक्ष्णनैष्क्रम्य-
कर्म्मगृहानुपलब्धितामुपादाय। बुद्धकायस्पृहापरिकर्म्मलक्षणा-
व्यञ्जननिमित्ताऽनुपलब्धितामुपादाय। धर्म्मविवरणपरिकर्म्म-
ऽनुपलब्धितामुपादाय। मानस्तम्भनिर्घातनपरिकर्म्मप्रज्ञता-

समाधिजं प्रीतिसुखं द्वितीयं ध्यानमुपसम्पद्य विहरति। सप्रीतेर्व्विरागादुपेक्षको विहरति। स्मृतिमान् संप्रजानन् सुखं कायेन प्रतिसंवेदयति। यत्तदार्य्या आचक्षते उपेक्षकः स्मृतिमान् सुखविहारी निष्प्रीतिकं तृतीयं ध्यानमुपसम्पद्य विहरति। सुखस्य च प्रहाणात् दुःखस्य च प्रहाणात् पूर्व्वमेव सौमनस्य दौर्म्मनस्ययो-रस्तङ्गमाददुःखाऽसुखमुपेक्षा स्मृतिपरिशुद्धं चतुर्थं ध्यानमुपसम्पद्य विहरति। स सर्व्वशो रूपसंज्ञानां समतिक्रमात् प्रतिघसंज्ञानाम-स्तङ्गमान्नानात्व संज्ञानाममनसिकारादनन्तमाकाशमनित्याकाशान-न्त्यायतनमुपसम्पद्य विहरति। स सर्व्वश आकाशानन्त्यायतन समतिक्रमादनन्तं विज्ञानमितिविज्ञानानन्त्यायतनमुपसम्पद्य विह-रति। स सर्व्वशो विज्ञानानन्त्यायतन समतिक्रमान्नाकिञ्चिदित्या किञ्चन्यायतनमुपसम्पद्य विहरति। स सर्व्वश आकिञ्च न्यायतन समतिक्रमान्नैवसंज्ञाना संज्ञायतनमुपसम्पद्य विहरति। स सर्व्वशोनैव संज्ञानासंज्ञायतन समतिक्रमात् सञ्ज्ञा वेदायतिनिरोधमुपसम्पद्य विहरति। इमान वा ऽनुपूर्व्वविहारसमापत्तयः।

पुनरपरं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं। यदुत दश तथा गतबलानि। कतमानि दश। इह सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् स्थानञ्च स्थानतः। अस्थानञ्चा-स्थानता यथाभूतं प्रजानाति। अतीतानागतप्रत्युत्पन्नानां धर्म्माणां कर्म्मसमादानानाञ्च स्थानशोहेतुशः कर्म्मविपाकं यथाभूतं प्रजानाति। नानाधातुर्लोकोऽनेकधातुर्लोकेऽनेकधातुर्लोक इति। यथाभूतं प्रजानाति। परसत्वानां परपुद्गलानामनेकाधिमुक्तिकानां

ऽनुवर्जनता। शिक्षाया अपरित्यागिता। कामगुणजुगुप्सनता। निर्वृतेसहगतचित्तोत्पादः। सर्व्वसत्त्वपरित्यागिता। अनवलीनचित्तता। सर्व्ववस्त्वनपेक्षणता। इमे सुभूते दशधर्म्माः बोधिसत्त्वेन महासत्त्वेन चतुर्थ्यां भूमौ वर्त्तमानेन न परित्यक्तव्याः। समादाय च वर्त्तितव्यम्।

पुनरपरं सुभूते बोधिसत्त्वेन महासत्त्वेन पञ्चम्यां भूमौ वर्त्तमानेन षड्धर्म्माः परिवर्जयितव्याः। कतमे षट् यदुतगृहिसंस्तवः परिवर्जयितव्यः। भिक्षुणीसंस्तवः। कुलमात्सर्य्यं। सगणिकास्थान। आत्मोत्कर्षणतापरपंसनता। इमे षट्धर्म्माः परिवर्जयितव्याः। पुनरष्टादशधर्म्माः परिवर्जयितव्याः। यदुतदशाऽकुशलाः कर्म्मपथाः परिवर्जयितव्याः। मानस्तम्भविपर्य्यासा, विचिकित्सा, राग, द्वेष, मोहा, धिवासनता, इमे ऽष्टादशधर्म्मा बोधिसत्त्वेन महासत्त्वेन पञ्चम्यां भूमौ वर्त्तमानेन परिवर्जयितव्याः।

पुनरपरं सुभूते बोधिसत्त्वेन महासत्त्वेन षष्ठ्यां भूमौ वर्त्तमानेन षड्धर्म्माः परिपूरयितव्याः। यदुत षट्पारमिता। अपरे षड्धर्म्माः परिवर्जयितव्याः। कतमे षट्श्रावकचित्त परिवर्जयितव्यं। प्रत्येकबुद्धचित्तं परिवर्जयितव्यं। परितर्षणचित्त परिवर्जयितव्यं। याचनकं दृष्ट्वाऽनवलीनपरिवर्जयितव्यं। नाऽवलीयितव्यं। सर्व्ववस्तूनि परित्यज्यदुर्मनस्कतापरिवर्जयितव्याः। न दुर्मनस्केन भवितव्यं। याचनकं दृष्ट्वा विक्षेपचित्त परिवर्जयितव्यं। न याचनकं विक्षेपः कर्त्तव्यः। इमे सुभूते बोधिसत्त्वेन महासत्त्वेन षष्ठ्या भूमौ वर्त्तमानेन षड्धर्म्मा. परिवर्जयितव्या.।

तोस्तत्प्रत्ययं कायस्य भेदात् सुगतौ स्वर्गलोके देवेषूपपद्यन्ते इति। आस्रवाणां क्षयादनास्रवचेतोविमुक्तिं प्रज्ञाविमुक्तिं स्वयमभिज्ञाय साक्षात्कृत्वोपसम्पद्य विहरन्ति। क्षीणा मे जातिः उषितं ब्रह्मचर्य्यं कृतं करणीयं। नापरमित्थमिति प्रजानाति। इदमपि सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं। तच्चाऽनुपलम्भयोगेन।

पुनरपरं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं। यदुत चत्वारि वैशारद्यानि। कतमानि चत्वारि। सम्यक्सम्बुद्धस्य च मे प्रतिजानते। इमे धर्मा अनभिसम्बुद्धा इति। अत्र वत मे श्रमणो वा ब्राह्मणो वा देवो वा मारो वा ब्रह्मा वा केनचिद्वा पुनर्लोके सहधर्म्मेण चोदयेदिति। निमित्तं न समनुपश्याम्यत्र चाहं निमित्तमसमनुपश्यन् क्षेमप्राप्तो विहराम्यभयं प्राप्तो वैशारद्यप्राप्तः। उदारमार्षभं स्थानं प्रजानामि। परिषद्गतः सम्यक्सिंहनादं नदामि। ब्राह्मं चक्रं प्रवर्त्तयाम्यप्रवर्त्तनीयं श्रमणेन वा ब्राह्मणेन वा देवेन वा मारेण वा ब्रह्मणा वा केनचिद्वा पुनर्लोके सहधर्म्मेण क्षीणास्रवस्यत्र मे प्रतिजानतः। इमे आस्रवाः अपरिक्षीणा इति। अत्र वत मे श्रमणो वा ब्राह्मणो वा देवो वा मारो वा ब्रह्मा वा केनचिद्वा पुनर्लोके सहधर्म्मेण चोदयति। निमित्तमेतन्न समनुपश्याम्यत्र चाहं निमित्तमसमनुपश्यन् क्षेमप्राप्तोऽधिऽराम्यभयप्राप्तो वैशारद्यप्राप्तः। उदारार्षभं स्थानं प्रजानामि। परिषद्गतः सम्यक् सिंहनादं नदामि। ब्राह्मं चक्रं प्रवर्त्तयाम्यप्रवर्त्तनीयं श्रमणेन वा ब्राह्मणेन वा देवेन वा मारेण वा ब्रह्मणा वा केनचिद्वा पुनर्लोके सहधर्म्मेण। ये खलु पुनर्मयाऽन्तरायिका धर्म्मा आख्याताः। तान्

सर्वसत्त्वचित्ताऽनुप्रवेशः। अभिज्ञाविक्रीडनता। बुद्धक्षेत्रदर्शनता। तेषां बुद्धक्षेत्राणां यथा दृष्टानां परिनिष्पादनता। बुद्धपर्युपासनता। बुद्धकाय यथाभूत प्रत्यवेक्षणता। इमे सुभूते चत्वारो धर्माः परिपूरयितव्याः। पुनरपरं सुभूते बोधिसत्त्वेन महासत्त्वेनाष्टम्यां भूमौ वर्त्तमानेन चत्वारो धर्माः परिपूरयितव्याः। सत्त्वेन्द्रिय परापरज्ञानता। बुद्धक्षेत्रपरिशोधनता। मायोपमसमाधेरभीक्ष्णं समापद्यनता। यथायथा सत्त्वानां कुशलमूलानि परिनिष्पद्यन्ते। तथा तथात्मभावपरिनिष्पादनता। संचिन्त्य भवोपादानता। इमे सुभूते बोधिसत्त्वेन महासत्त्वेनाष्टम्यां भूमौ वर्त्तमानेन चत्वारो धर्माः परिपूरयितव्याः।

पुनरपरं सुभूते बोधिसत्त्वेन महासत्त्वेन नवम्यां भूमौ वर्त्तमानेन द्वादशधर्माः परिपूरयितव्याः। कतमे द्वादश। यदुत अनन्तप्रणिधानपरिग्रहः। स यथायथाप्रणिदधाति तथातथाऽस्य समृध्यति। देवनागयक्षगन्धर्व्वासुरगरुडकिन्नरमहोरगरुतज्ञानं। परिपूर्णप्रणिधाननिर्देशज्ञानं। गर्भविक्रान्तिसम्पत्। गोत्र [illegible] परिवारसम्पत्। जन्मसम्पत्। बोधिवृक्षव्यूहसम्पत्। सर्व्वगुण [illegible] पूरिसम्पत्। इमे सुभूते बोधिसत्त्वेन महासत्त्वेन नवम्यां [illegible] वर्त्तमानेन द्वादशधर्माः परिपूरयितव्याः।

दशम्यां पुनः सुभूते भूमौ वर्त्तमानो बोधिसत्त्वो महासत्त्व [illegible] स्तथागत एव वक्तव्यः। एवमुक्त आयुष्मान् सुभूतिर्भगवन्तमेतदवोचत्। कथमद्भगवन् बोधिसत्त्वस्य महासत्त्वस्याध्याशयादिपर्यन्तं [illegible] भवत्यात्र। स सुभूते बोधिसत्त्वोऽनासक्तः सर्वाकार [illegible]

[illegible] ...सम्यग्दुःखक्षयायेति नेदं स्थानं विद्यते । अत्र मम वै श्रमणो वा ब्राह्मणो वा देवो वा मारो वा ब्रह्मा वा केनचिद्वा पुनर्लोके सहधर्मेण चोदयिष्यति । निमित्तमेतद् न समनुपश्याम्यहं निमित्तमसमनुपश्यन् क्षेमप्राप्तो विहराम्यभयप्राप्तो वैशारद्यप्राप्तः । उदारमार्षभं स्थानं प्रतिजानामि । पर्षद्गतः सम्यक्सिंहनादं नदामि । ब्राह्मं चक्रं प्रवर्तयाम्यप्रवर्तनीयं श्रमणेन वा ब्राह्मणेन वा देवेन वा मारेण वा ब्रह्मणा वा केनचिद्वा पुनर्लोके सहधर्मेण । ये मया प्रतिपद आख्याताः । आर्यनैर्याणिका नैर्वेधिकास्तद् प्रतिपद्यमानो न निर्यास्यत्यसम्यग्दुःखक्षयायेति नेदं स्थानं विद्यते । अत्र मम वै श्रमणो वा ब्राह्मणो वा देवो वा मारो वा ब्रह्मा वा केनचिद्वा लोके सहधर्मेण चोदयति । निमित्तमेव न समनुपश्याम्यहं निमित्तमसमनुपश्यन् क्षेमप्राप्तो विहराम्यभयप्राप्तो वैशारद्यप्राप्तः । उदारमार्षभं स्थानं प्रजानामि । परिषद्गतः सम्यक्सिंहनादं नदामि । ब्राह्मं चक्रं प्रवर्तयाम्यप्रवर्तनीयः श्रमणेन वा ब्राह्मणेन वा देवेन वा मारेण वा ब्रह्मणा वा केनचिद्वा पुनर्लोके सहधर्मेण । इदमपि सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं यदुताऽनुपलम्भयोगेन ।

पुनरपरं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं यदुत चतस्रः प्रतिसंविदः । कतमाश्चतस्रः । अर्थप्रतिसंविद्धर्मप्रतिसंविन्निरुक्तिप्रतिसंवित्प्रतिभानप्रतिसंवित् । इदमपि सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं । यदुतानुपलम्भयोगेन ।

पुनरपरं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं । यदुता-

तत्र कतमद्बोधिसत्त्वस्य महासत्त्वस्य धर्म्म[illegible]परिकर्म्म। यद्बो-
सत्त्वो महासत्त्वः [illegible] तथागत [illegible] सत्त्वेभ्यो धर्म्मं
देशयति। [illegible] पर्य्य[illegible]
सुभाषितं [illegible] पर्य्यवदात [illegible]
यदुत सूत्रं गेयं व्याकरणं गाथोदाननिदानावदानेतिवृत्तकजातकवैपुल्या-
द्भुतधर्म्मोपदेशादिदं बोधिसत्त्वस्य महासत्त्वस्य धर्म्मविवर-
परिकर्म्म। तत्र कतमद्बोधिसत्त्वस्य महासत्त्वस्य मानस्तम्भनिर्घातन-
परिकर्म्म। येन मानस्तम्भनिर्घातेन न जातु नीचकुलेषूप-
पद्यते। इदं बोधिसत्त्वस्य महासत्त्वस्य मानस्तम्भनिर्घातनपरि-
कर्म्म। तत्र कतमद्बोधिसत्त्वस्य महासत्त्वस्य सत्यवचनपरिकर्म्म।
यदुत यथा वादिता तथा कारिता। इदं सुभूते बोधिसत्त्वस्य
महासत्त्वस्य सत्यवचनपरिकर्म्म। इमानि सुभूते बोधिसत्त्वस्य
महासत्त्वस्य प्रथमायां भूमौ वर्त्तमानस्य दशपरिकर्म्माणि। तत्र
कतमद्बोधिसत्त्वस्य महासत्त्वस्य शीलपरिशुद्धिः। यदुत श्रावक-
प्रत्येकबुद्धचित्तानाम मनसिकारः। येऽपि तदन्यदौःशील्यकरा।
बोधिपरिपन्थकराः धर्म्माः तेषामप्यमनसिकारः। इयं बोधिसत्त्वस्य
महासत्त्वस्य शीलपरिशुद्धिः। तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य
कृतज्ञता कृतकारिता। यद्बोधिसत्त्वो महासत्त्वो बोधिसत्त्वचर्य्यां
चरत्नन्यमपि कृतमीमं सारान्ननासयति। प्रागेव इयं बोधिसत्त्वस्य
महासत्त्वस्य कृतज्ञता कृतकारिता। तत्र कतमद्बोधिसत्त्वस्य महा-
सत्त्वस्य क्षान्तिबलप्रतिष्ठान। यत् सर्व्वसत्त्वानामन्तिके व्यापाद
अविहिंसाचिन्तता। इदं बोधिसत्त्वस्य महासत्त्वस्य क्षान्तिबल-

नामप्रकृत्यानलभं न नष्टं। लकारोमुखं सर्व्वधर्म्माणां लोकोत्तीर्ण-त्वात् तृष्णालताहेतुप्रत्ययसमुत्पादितत्वात्। दकारोमुखं सर्व्वधर्म्माणां दान्तदमथपरिच्छिन्नत्वात्। बकारोमुखं सर्व्वधर्म्माणां बद्ध न विगतत्वात्। उकारोमुखं सर्व्वधर्म्माणां उभयगतत्वात्। सकारोमुखं सर्व्वधर्म्माणां सङ्गाऽनुपलब्धित्वात्। न सज्यते न बध्यते। वकारोमुखं सर्व्वधर्म्माणां वाक्पथेष समुच्छिन्नत्वात्। तकारोमुखं सर्व्वधर्म्माणां तथताऽविचलितत्वात्। यकारोमुखं सर्व्वधर्म्माणां यावदनुपलब्धि-त्वात्। स्तकारोमुखं सर्व्वधर्म्माणां स्तम्भानुपलब्धित्वात्। काकारोमुखं सर्व्वधर्म्माणां कारकाऽनुपलब्धित्वात्। सकारोमुखं सर्व्वधर्म्माणां समताऽनुपलब्धित्वात्। समन्ताच्च व्यतिवर्त्तते। मकारोमुखं सर्व्वधर्म्माणां मकारानुपलब्धितामुपादाय। गकारोमुखं सर्व्वधर्म्माणां गमनाऽनुपलब्धित्वात्। मकारोमुखं सर्व्वधर्म्माणां स्थानाऽनुपलब्धि-त्वात्। जकारोमुखं सर्व्वधर्म्माणां जात्यनुपलब्धित्वात्। श्वकारोमुखं सर्व्वधर्म्माणां श्वासाऽनुपलब्धित्वात्। धकारोमुखं सर्व्वधर्म्माणां धर्म्मधात्वनुपलब्धित्वात्। शकारोमुखं सर्व्वधर्म्माणां शमथाऽनुप-लब्धित्वात्। खकारोमुखं सर्व्वधर्म्माणां खसमताऽनुपलब्धित्वात्। चकारोमुखं सर्व्वधर्म्माणां चयाऽनुपलब्धित्वात्। स्तकारोमुखं सर्व्व-धर्म्माणां स्तवाऽनुपलब्धित्वात्। ञकारोमुखं सर्व्वधर्म्माणां ज्ञाना-ऽनुपलब्धित्वात्। तकारोमुखं सर्व्वधर्म्माणां मात्राऽनुपलब्धित्वात्। हकारोमुखं सर्व्वधर्म्माणां हेत्वनुपलब्धित्वात्। भकारोमुखं सर्व्व-धर्म्माणां भङ्गानुपलब्धितः। छकारोमुखं सर्व्वधर्म्माणां छेदनाऽनुप-लब्धितः। स्मकारोमुखं सर्व्वधर्म्माणां स्मरणाऽनुपलब्धितः।

महासत्त्वो धर्म्मं देशयस्तेन धर्म्मदानेनान्तशो बोधिमपि न प्रति-
काङ्क्षति। इयं बोधिसत्त्वस्य महासत्त्वस्य निरामिषधर्म्मदानविव-
रणता। तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य बुद्धक्षेत्रपरिशोधन
कुशलमूलावरोपणता। यैः कुशलमूलैर्बुद्धक्षेत्रं परिशोधयन् नाम-
परचित्तक्षेत्रं परिशोधयति। तेषां कुशलमूलानां परिणामना।
इयं बोधिसत्त्वस्य महासत्त्वस्य बुद्धक्षेत्रपरिशोधनकुशलमूलावरो-
पणपरिणामगता। तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्यापरि-
मितसंसारापरिखेदनता। यदुत कुशलमूलोपस्तम्भनतायै कुशल-
मूलैरुपस्तब्धः सत्त्वांश्च परिपाचयति। बुद्धक्षेत्रञ्च परिशोधयति।
न च कदाचित् खेदनोपपद्यते। यावत् सर्व्वकारज्ञतां परिपूर-
यति। इयं बोधिसत्त्वस्य महासत्त्वस्यापरिमितसंसाराऽपरिखेद-
नता। तच कतमा बोधिसत्त्वस्य महासत्त्वस्य ह्यपत्राप्यस्थानं।
यदुत श्रावक प्रत्येकबुद्धचित्तजुगुप्सनता। इद बोधिसत्त्वस्य महा-
सत्त्वस्य ह्यपत्राप्यस्थान। तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्यारण्य-
वासापरित्यागिता। याश्रावकप्रत्येकबुद्धभूमेरतिक्रमणता। इयं
बोधिसत्त्वस्य महासत्त्वस्यारण्यवासापरित्यागिता। तत्र कतमा
बोधिसत्त्वस्य महासत्त्वस्याऽल्पेच्छता। यद्बोधिसत्त्वो महासत्त्वो बोधि-
मपि नेच्छतीतीयं बोधिसत्त्वस्य महासत्त्वस्याल्पेच्छता। तत्र कतमा
बोधिसत्त्वस्य महासत्त्वस्य सन्तुष्टिता। यत्सर्व्वाकारज्ञता प्रतिलम्भे-
नापि न लभ्यते। इयं बोधिसत्त्वस्य महासत्त्वस्य सन्तुष्टिता। तत्र
कतमा बोधिसत्त्वस्य महासत्त्वस्य धुतगुणसंलेखेऽनुवर्त्तनता। यदुत
गम्भीरेषु धर्म्मेषु निर्याण चान्तिरित्थं बोधिसत्त्वस्य महासत्त्वस्य

मतिमांश्च बुद्धिमांश्च धृतिमांश्च ह्रीमांश्च प्रज्ञावांश्च प्रतिभानवांश्च। इदञ्च धारणीमुखमन्यजन्मन्यपि प्रतिलप्स्यते। न कथं कथीभविष्यति। धिमतिश्चाऽस्य न भविष्यति। न च परस्यान्तिकाच्छ्रुत्वा वाचं श्रुत्वाऽनुनेष्यते। नपरुषां वाचं श्रुत्वा प्रतिहंस्यते। नोन्नतोभविष्यति नाऽवनतः। यथास्थित एव भविष्यति। इतकुशलश्च भविष्यति। स्कन्धाकुशलश्च भविष्यति। धातुकुशलश्च भविष्यति। आयतनकुशलश्च भविष्यति। सत्यकुशलः। प्रतीत्य समुत्पादकुशलः। हेतुकुशलः प्रत्ययकुशलः। धर्म्मताकुशलः। इन्द्रियपरापरज्ञानकुशलः। च्युतोपपत्तिकुशलः। दिव्यश्रोत्रज्ञानकुशलः। परचित्तज्ञानकुशलः। पूर्व्वनिवासाऽनुस्मृतिज्ञानकुशल.। ऋद्धिविधिज्ञानकुशलः। आस्रवक्षयज्ञानकुशलः। स्थानाऽस्थाननिर्देशकुशलः। अतिक्रमणकुशलः। प्रतिक्रमणकुशलः। ईर्य्यापथकुशलः। इयचाऽप्यकौशलञ्चाऽनुप्राप्स्यति। इदमपि सुभूते धारणीमुखमकाराद्यक्षरप्रवेशो बोधिसत्त्वस्य महासत्त्वस्य महायानं। तच्चाऽनुपलम्भयोगेन ॥ ० ॥

शतसाहस्र्यां प्रज्ञापारमितायां नवमः परिवर्त्तः ॥

———

बोधिसत्त्वस्य महासत्त्वस्य कुलेषु मात्सर्य्यपरिवर्जनता। इह सुभूते बोधिसत्त्वेन महासत्त्वेनैकचित्तमुत्पादयितव्यम्। तद्यथा सर्व्वसत्त्वानां सुखोपधानं कर्त्तव्यम्। तदेते सत्त्वाः स्वपुण्यैरेव सुखिता नात्र मया मात्सर्य्यचित्तमुत्पाद्यम्। एवं बोधिसत्त्वेन महासत्त्वेन कुलमात्सर्य्यं परिवर्जयितव्यम्। तत्र कथं बोधिसत्त्वेन महासत्त्वेन संगणिकास्थानं परिवर्जयितव्यम्। यत्र बोधिसत्त्वस्य महासत्त्वस्य संगणिकास्थानस्थितस्य श्रावकप्रत्येकबुद्धा भवेयुः। तत्प्रतिसंयुक्ताः कथा भवेयुः। तत्प्रतिसंयुक्तावादचित्तोत्पादा उत्पद्येरन्। तत्र बोधिसत्त्वेन महात्त्वेन न स्थातव्यम्। इयं बोधिसत्त्वस्य महासत्त्वस्य सगणिस्थानपरिवर्जनता। तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्योत्कर्षणपरिवर्जनता। तत्र कथं बोधिसत्त्वेन महासत्त्वेन व्यापाद-परिवर्जयितव्यः। यद्व्यापाद विचिकित्साचित्तानामवकाशं न ददाति। कलहचित्तस्य विग्रहचित्तस्य वाऽवकाशं न ददातीतीयं बोधिसत्त्वस्य महासत्त्वस्य व्यापादपरिवर्जनता। या आत्मिकानां धर्माणामसमनुपश्यनता। इयं बोधिसत्त्वस्य महासत्त्वस्योत्कर्षणपरिवर्जनता। तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य परपंसनापरिवर्जनता। यदुत बाह्यानां धर्माणामसमनुपश्यनता। इतीयं बोधिसत्त्वस्य महासत्त्वस्य परपंसनता परिवर्जनता। तत्र कथं बोधिसत्त्वेन महासत्त्वेन दशाकुशलाः कर्मपथाः परिवर्जयितव्याः। तथा ह्येते कुगतेरप्यन्तरायकराः प्रागेवार्य्यमार्गस्य प्रागेवानुत्तरायाः सम्बोधेः। एवं बोधिसत्त्वेन महासत्त्वेन दशाकुशलाः कर्मपथाः परिवर्जयितव्याः। तत्र कथं बोधिसत्त्वेन महासत्त्वेनाभिमान

ऽप्रमत्तितामुपादाय । सत्यवचनपरिकर्म्मवस्तुनोऽनुपलब्धितामुपा-
दाय । इमानि सुभूते बोधिसत्त्वेन महासत्त्वेन प्रथमायां भूमौ वर्त्तमानेन दशपरिकर्म्माणि करणीयानि ।

पुनरपरं सुभूते बोधिसत्त्वेन महासत्त्वेन द्वितीयायां भूमौ वर्त्तमानेनाष्टौ धर्म्मा अभीक्ष्णं मनसि कर्त्तव्या। तत्र च प्रतिपत्तव्यं। कतमेऽष्टौ । यदुत शीलपरिशुद्धिः कृतज्ञताकृतवेदिता । क्षान्तिबलप्रतिष्ठानं । प्रामोद्यं । प्रीत्यनुभवनता । सर्व्वसत्त्वपरित्यागिता । महाकरुणायाः प्रादुर्भावः । गुरुशुश्रूषा । सद्धागौरवता । पारमिता सुयोगपर्य्येष्टिः । इमे सुभूते बोधिसत्त्वेन महासत्त्वेन द्वितीयायां भूमौ वर्त्तमानेनाष्टौ धर्म्माः अभीक्ष्णं मनसि कर्त्तव्यास्तत्र च प्रतिपत्तव्यम् ।

पुनरपरं सुभूते बोधिसत्त्वेन महासत्त्वेन तृतीयायां भूमौ वर्त्तमानेन पञ्चसु धर्म्मेषु स्थातव्यं। कतमेषु पञ्चसु । यदुतबाहुश्रुत्या-तृप्ततायां। तत्र चाक्षरानभिनिवेशेन निरामिषधर्म्मविषरणतायां। तथाचाऽमन्यनतया बुद्धक्षेत्रे परिशोधनकुशलमूलावरोपणपरिणाम-नतायां । तथाचाऽमन्यनतया अपरिमितसंसारापरिखेदतायां । तथाचाऽमनन्यतयाह्रपत्राप्यस्थाननतायां । तथाचाऽमनन्यतया एषु सुभूते पञ्चसु धर्म्मेषु बोधिसत्त्वेन महासत्त्वेन तृतीयायां भूमौ वर्त्तमानेन स्थातव्यम् ।

पुनरपरं सुभूते बोधिसत्त्वेन महासत्त्वेन च चतुर्थ्यांभूमौ वर्त्तमानेन दशधर्म्मान् समादायवर्त्तितव्यं। तेन च परित्यक्तव्याः । कतमेदश । अरण्यवासं । अल्पेच्छतया सन्तुष्टिता । धुतगुणसंलेखा-

बोधये। सर्व्ववस्तुनि वरित्यव्यता। न दुर्म्मनस्केन भवितव्यम्। तत्कस्य हेतोस्तथा हि। नैषमार्गो बोधये। प्रथमचित्तोत्पादमुपादाय। नित्यं दानं दातव्यम्। न सक्तचित्ते न भवितव्यम्। तत्र कथं बोधिसत्त्वेन महासत्त्वेनात्मग्रहो न कर्त्तव्यः। तथा हि अत्यन्ततया आत्मा न संविद्यते। जीवग्रहो न कर्त्तव्यः। तथा ह्यत्यन्ततया जीवो न संविद्यते। पुद्गलग्रहो न कर्त्तव्यस्तथा ह्यत्यन्ततया पुद्गलो न विद्यते। तत्र कथं बोधिसत्त्वेन महासत्त्वेन नोच्छेदग्रहो न कर्त्तव्यः स्तथा हि न कश्चिद्धर्म्म उच्छिद्यतेऽत्यन्ताऽनुपलम्भात् सर्व्वधर्म्माणां। तत्र कथं बोधिसत्त्वेन महासत्त्वेन शाश्वतग्रहो न कर्त्तव्यः। तत्कस्यहेतोस्तथा हि धर्म्मा नोत्पद्यन्ते न शाश्वतो भवति नोच्छेदः। तत्र कथं बोधिसत्त्वेन महासत्त्वेन निमित्तसंज्ञा न कर्त्तव्या। तथा ह्यत्यन्ततया संक्लेशो न संविद्यते। तत्र कथं बोधिसत्त्वेन महासत्त्वेन हेतुदृष्टिर्न कर्त्तव्या। तथा हि तां दृष्टिं न समनुपश्यति। तत्र कथ बोधिसत्त्वेन महासत्त्वेन नामरूपाऽभिनिवेशो न कर्त्तव्यः। तथा हि सतद्वस्तुन समनुपश्यति। तत्र कथं बोधिसत्त्वेन महासत्त्वेन स्कन्धाभिनिवेशो न कर्त्तव्यः। तथा ह्यत्यन्ततया स्कन्धा न संविद्यते। एव स्कन्धाभिनिवेशो न कर्त्तव्यः। तत्र कथं बोधिसत्त्वेन महासत्त्वेन धात्वभिनिवेशो न कर्त्तव्यः। तथा ह्यत्यन्ततया धातवो न संविद्यन्ते। एवं धात्वभिनिवेशो न कर्त्तव्यः। तत्र कथं बोधिसत्त्वेन महासत्त्वेनायतनाभिनिवेशो न कर्त्तव्यः। तथा ह्यत्यन्ततया आयतनानि न संविद्यन्ते। एवमायतनाऽभिनिवेशो न कर्त्तव्यः। तत्र कथं बोधिसत्त्वेन महा-

पुनरपरं सुभूते बोधिसत्त्वेन महासत्त्वेन सप्तम्यां भूमौ वर्त्तमानेन विंशतिधर्म्मा न कर्त्तव्याः। कतमे विंशतिः। यदुत आत्मग्राहो न कर्त्तव्यः। सत्त्वग्राहो न कर्त्तव्यः। जीवग्राहो न कर्त्तव्यः। पुद्गलग्राहो न कर्त्तव्यः। उच्छेदग्राहो न कर्त्तव्यः। शाश्वतग्राहो न कर्त्तव्यः। निमित्तसंज्ञा न कर्त्तव्या। हेतुदृष्टिः स्कन्धाऽभिनिवेशो धात्वभिनिवेशः। आयतनाऽभिनिवेशः। त्रैधातुकाऽभिनिवेशः। त्रैधातुकाऽध्यवसानं। त्रैधातुकालयः। बुद्धनिश्रयदृष्ट्यभिनिवेशः। धर्म्मनिश्रयदृष्ट्यभिनिवेशः। संघनिश्रयदृष्ट्यभिनिवेशः। शीलनिश्रयदृष्ट्यभिनिवेशः। शून्याधर्म्मा इति विवादः। शून्यानिरोधाश्च। इमे सुभूते विंशतिर्धर्म्मा न कर्त्तव्याः। तेन विंशतिरेव धर्म्माः परिपूरयितव्याः। कतमे विंशतिः। यदुत शून्यताप्रतिवेधः। आनिमित्तसाक्षात्क्रिया। अप्रणिहितज्ञानं। त्रिमण्डलपरिशुद्धिः। कृपाकारुण्यतासर्व्वसत्त्वेषु। ते च सत्त्वानाऽवमन्तव्याः। सर्व्वधर्म्मसमतादर्शनं। तत्र चाऽनभिनिवेशः। भूतनयप्रतिवेधः। तेन चाऽमनता। अनुत्पादक्षान्तिः। अनुत्पादज्ञानं। एकनयनिर्द्देशः। सर्व्वधर्म्माणां कल्पनासमुद्घातः। संज्ञाविवर्त्तः। दृष्टिविवर्त्तः। क्लेशविवर्त्तः। शमथविपश्यनाभूमिः। दान्तचित्तता। अप्रतिहतज्ञानता। अनुनता। यथेष्टावबुद्धिगमनता। इमे सुभूते बोधिसत्त्वेन महासत्त्वेन सप्तम्यां भूमौ वर्त्तमानेन विंशतिधर्म्माः परिपूरयितव्याः।

पुनरपरं सुभूते बोधिसत्त्वेन महासत्त्वेनाऽष्टम्यां भूमौ वर्त्तमानेन चत्वारोधर्म्माः परिपूरयितव्याः। कतमे चत्वारः। यदुत

स्वलक्षणेन शून्याः न शून्यतया । एवं बोधिसत्त्वेन महासत्त्वेन शून्यतायां विषादो न कर्त्तव्यः । तत्र कथं बोधिसत्त्वेन महासत्त्वेनाव-रोधयितव्या । तथा हि सर्व्वधर्म्माः शून्या न शून्यताशून्यतां विरोधयति । एवं बोधिसत्त्वेन महासत्त्वेन शून्यता न विरोधयितव्या । तत्र कथं बोधिसत्त्वेन महासत्त्वेन शून्यतापरिपूरयितव्या । स्वलक्षण-शून्यतापरिपूरिर्ब्बोधिसत्त्वस्य महासत्त्वस्य शून्यतापरिपूरिः । तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्यानिमित्त साक्षात्क्रिया । यदुत सर्व्वनिमित्तानाममनसिकारः । तत्र कतमद्बोधिसत्त्वस्य महासत्त्व-स्याऽप्रणिहितज्ञानं यत् स त्रैधातुकचित्तं न प्रवर्त्तते । तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य त्रिमण्डलपरिशुद्धिः । यदुत दशकुशल-कर्म्मपथपरिपूरिः । तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य सत्त्वेषु कृपाकरुणतापरिपूरिः । यदुत महाकरुणाप्रतिलम्भः । तत्र कथं बोधिसत्त्वेन महासत्त्वेन सत्त्वानाऽवगन्तव्याः । यदुत मैत्रीपरिपूर्य्या । तत्र कतमद्बोधिसत्त्वस्य महासत्त्वस्य सर्व्वधर्म्माणां समता दर्शनम् । यदुतानुत्क्षेपा प्रचयः । सर्व्वधर्म्माणां । तत्र कतमो बोधिसत्त्वस्य महासत्त्वस्य भूतनय प्रतिवेधः । यः सर्व्वधर्म्माणामेकनय प्रतिवेधः । अप्रतिवेधः । तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्याऽनुत्पाद क्षान्तिः । या सर्व्वधर्म्माणामनुत्पादायाऽनिरोधयोऽनभिसंस्काराय क्षान्तिः । तत्र कतमद्बोधिसत्त्वस्य महासत्त्वस्याऽनुत्पाद-ज्ञानं । यन्नामरूपाऽनुत्पादज्ञानं । इदं बोधिसत्त्वस्य महासत्त्वस्या-नुत्पादज्ञान । तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्यैकनयनिर्देशः । यथा अससुदाचारता । अथ बोधिसत्त्वस्य महासत्त्वस्यैकनय-

संयुक्तैश्चित्तोत्पादैः कुशलमूलानि समुदानयति। इदं सुभूते बोधिसत्त्वस्य महासत्त्वस्याध्याशयादिपरिकर्म्म। तत्र कतमद्बोधिसत्त्वस्य महासत्त्वस्य सर्व्वसत्त्वसमचित्ततापरिकर्म्म। सर्व्वाकारज्ञताप्रतिसंयुक्तै-श्चित्तोत्पादैश्च आर्य्यप्रमाणान्यभिनिर्हरति। मैत्रीकरुणामुदितो-पेक्षमिदमुच्यते बोधिसत्त्वस्य महासत्त्वस्य सर्व्वसत्त्वसमचित्ततापरि-कर्म्म। तत्र कतमद्बोधिसत्त्वस्य महासत्त्वस्य त्यागपरिकर्म्म। यत्सर्व्व-सत्त्वेभ्योऽविकल्पतस्तद्दानं ददातीदमुच्यते बोधिसत्त्वस्य महासत्त्वस्य त्यागपरिकर्म्म। तत्र कतमद्बोधिसत्त्वस्य महासत्त्वस्य कल्याणमित्र-सेवनापरिकर्म्म। यदुत तानि बोधिसत्त्वस्य महासत्त्वस्य कल्याण-मित्राणि यान्येव सर्व्वाकारज्ञतायां समादापयन्ति। निवेशयन्ति। प्रतिष्ठापयन्ति। तेषां कल्याणमित्राणां या सेवना भजना पर्य्यु-पासना गुरुशुश्रूषणता। इयमुच्यते बोधिसत्त्वस्य महासत्त्वस्य कल्याणमित्रसेवनापरिकर्म्म। तत्र कतमद्बोधिसत्त्वस्य महासत्त्वस्य धर्म्मपर्य्येष्टिपरिकर्म्म। यत् सर्व्वाकारज्ञताप्रतिसंयुक्तैश्चित्तोत्पादैर्धर्म्मं पर्य्येषते। न श्रावकप्रत्येकबुद्धभूमौ पततीदं बोधिसत्त्वस्य महा-सत्त्वस्य धर्म्मपर्य्येष्टिपरिकर्म्म। तत्र कतमद्बोधिसत्त्वस्य महासत्त्वस्या-ऽभीक्ष्णं नैष्क्रम्यपरिकर्म्म। यत् सर्व्वसत्त्वजातावव्यवकीर्णो निष्क्रमति। तथागत शासने प्रव्रजति। न चाऽस्य कश्चिदन्तरायं करोतीदं बोधिसत्त्वस्य महासत्त्वस्याऽभीक्ष्णं नैष्क्रम्यपरिकर्म्म। तत्र कतमद्बोधि-सत्त्वस्य महासत्त्वस्य बुद्धकायस्पृहापरिकर्म्म। यद्बुद्धविग्रहं दृष्ट्वा न कदाचिद्बुद्धमनसिकारेण विरहितो भवति यावत् सर्व्वाकारज्ञता-मनुप्राप्नोतीदं बोधिसत्त्वस्य महासत्त्वस्य बुद्धकायस्पृहापरिकर्म्म।

सत्त्वो बोधिवृक्षमूलं सुवर्णमय भवति। स्कन्धो वैडूर्य्यमय। सप्त-
रत्नमय्यः शाखाः सर्व्वरत्नमयानि पत्रपुष्पाणि यस्य वृक्षस्य पुष्पो
गन्धोऽवभासाश्चानन्तालोकधातून् स्फुरति। इमं बोधिसत्त्व
महासत्त्वस्य बोधिवृक्षव्यूहसम्पत्। तत्र कतमा बोधिसत्त्वस्य महा-
सत्त्वस्य सर्व्वगुणपरिपूरिसम्पत्। या बोधिसत्त्वस्य महासत्त्वस्य सत्त्व-
परिपाकविशुद्धिश्च बुद्धक्षेत्रपरिशुद्धिश्च। इयं बोधिसत्त्वस्य महा-
सत्त्वस्य सर्व्वगुणपरिपूरिसम्पत्। तत्र कथं बोधिसत्त्वो महासत्त्वो
दशम्यां भूमौ स्थितस्तथागत एव वक्तव्यः। यस्य बोधिसत्त्वस्य
महासत्त्वस्य सर्व्वपारमिताः परिपूर्णा भवन्ति। दश तथागत-
बलानि चत्वारि वैशारद्यानि चतस्रः प्रतिसम्विदः। अष्टादशा-
वेणिका बुद्धधर्म्माः। सर्व्वाकारज्ञता ज्ञान सर्व्ववासनाऽनुसन्धि
क्लेशप्रहान। महाकरुणा। सर्व्वबुद्धधर्म्माश्च परिपूर्णा भवन्ति। एवं
खलु सुभूते बोधिसत्त्वो महासत्त्वो दशम्यां भूमौ स्थितस्तथागत
एव वक्तव्यः। तत्र कतमा सुभूते बोधिसत्त्वस्य महासत्त्वस्य दश-
भूमयः। इह सुभूते बोधिसत्त्वो महासत्त्व उपायकौशलेन दान-
पारमितायां चरन् शीलपारमितायां चरन् क्षान्तिपारमितायां
चरन् वीर्य्यपारमितायां चरन् ध्यानपारमितायां चरन् प्रज्ञापार-
मितायाश्चरन्। अध्यात्मशून्यतायां चरन् वहिर्द्धाशून्यतायां चरन्
अध्यात्मवहिर्द्धाशून्यतायां चरन् शून्यताशून्यतायां चरन् महाशून्य-
तायां चरन् परमार्थशून्यतायां चरन् संस्कृतशून्यतायां चरन्
असंस्कृतशून्यतायां चरन् अत्यन्तशून्यतायां चरन् अनवराग्रशून्य-
तायां चरन् अनवकारशून्यतायां चरन् प्रकृतिशून्यतायां चरन्

प्रतिष्ठाना । तत्र कतमद्बोधिसत्त्वस्य महासत्त्वस्यामामाद्य प्रीत्यनुभवनता । यदुत सर्व्वसत्त्वपरिपाचनता त्रिषु यानेषु । इयं बोधिसत्त्वस्य महासत्त्वस्य प्रामोद्य प्रीत्यनुभवनता । तत्र कतमद्बोधिसत्त्वस्य महासत्त्वस्य सर्व्वसत्त्वापरित्यागिता । यदुत सर्व्वसत्त्वानां परित्राणता । इदं बोधिसत्त्वस्य महासत्त्वस्य सर्व्वसत्त्वापरित्यागिता । तत्र कतमो बोधिसत्त्वस्य महासत्त्वस्य महाकरुणया आमुखीभावः । यद्बोधिसत्त्वस्य महासत्त्वस्य बोधिसत्त्वचारिकाञ्चरत एवं भवति । एकैकस्याहं सत्त्वस्यार्थाय गङ्गानदीवालुकोपमान् कल्पान्निरयेषु वसन् तत्र छेदनभेदनकुण्डनक्लेदनपचनान्यनुभवेयं यावन्नसत्त्वा बुद्धज्ञानप्रतिष्ठापिता भवेत् । एवं यावत् सर्व्वसत्त्वानां कृते यात्युत्सहनता अपरिखेदः । अयमुच्यते बोधिसत्त्वस्य महासत्त्वस्य महाकरुणाया आमुखीभावः । तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य गुरुशुश्रूषाश्रद्धागौरवता । यदुत गुरूणामन्तिके शास्तृसंज्ञा । इयमुच्यते बोधिसत्त्वस्य महासत्त्वस्य गुरुशुश्रूषाश्रद्धागौरवता । तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य पारमिता सुयोगपर्य्येष्टिः । यदुतानन्यकृतकर्म्मतया पारमितानां पर्य्येषणता सर्व्वसत्त्वपरिपाचनतायै । इयं बोधिसत्त्वस्य महासत्त्वस्य पारमितासुयोगपर्य्येष्टिः । तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य बाहुश्रुत्यातृप्तता । यत्किञ्चिद्बुद्धैर्भगवद्भिर्भाषितमिहलोकधातौ समन्ताद्दशसु दिक्षुलोकधातुषु तत्सर्व्वमाधारयिष्यामीति यातृप्तता । इयं बोधिसत्त्वस्य महासत्त्वस्य बाहुश्रुत्यातृप्तता । तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य निरामिषधर्म्मदानविवरणता । यद्बोधिसत्त्वो

वनिदर्शनावप्रतिघातैकलक्षणौ। तत् कस्य हेतोः। न हि सुभूते अलक्षणा धर्म्मा निर्यान्ति वा निर्यास्यति वा निर्याता वा धर्म्मधातोः। स सुभूते निर्याणमिच्छेद्यः अलक्षणानां धर्म्माणां निर्याणमिच्छेत्। तथतायाः स सुभूते निर्याणमिच्छेद्योऽवितथतायाः सुभूते निर्याणमिच्छेत्। भूतकोटेः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। अचिन्त्यधातोः स सुभूतेनिर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। आकाशधातोः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। रागक्षयधातोः स सुभूतेनिर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। प्रहाणधातोः स सुभूतेनिर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। विरागधातोः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। निरोधधातोः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। रूपशून्यताया स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। वेदनाशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। संज्ञाशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। संस्कार शून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। विज्ञान शून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। तत् कस्य हेतोर्न हि सुभूते रूपशून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। न वेदनाशून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। न संज्ञाशून्यता त्रैधातुकान्निर्याति। न

धुतगुणसंलेखानुवर्तनता। तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य
शिक्षाया अपरित्यागिता। यत्र सर्वशिक्षाणामप्रचारः। इयं
बोधिसत्त्वस्य महासत्त्वस्य शिक्षाया अपरित्यागिता। तत्र कतमा-
बोधिसत्त्वस्य महासत्त्वस्य कामगुणजुगुप्सनता। कामवितर्कानु-
त्पादः। इयं बोधिसत्त्वस्य महासत्त्वस्य कामगुणजुगुप्सनता। तत्र
कतमा बोधिसत्त्वस्य महासत्त्वस्य निर्वाणसहगतचित्तोत्पादः।
यदुत सर्वधर्माणामनभिसंस्कारः। अयमुच्यते बोधिसत्त्वस्य महा-
सत्त्वस्य निर्वाणसहगतचित्तोत्पादः। तत्र कतमा बोधिसत्त्वस्य
महासत्त्वस्य सर्वास्तिपरित्यागिता। याध्यात्मिकबाह्यानामपरि-
ग्रहणता। इयं बोधिसत्त्वस्य महासत्त्वस्य सर्वास्तिपरित्यागिता।
तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्यालीनचित्तता। यद्विज्ञान-
स्थितिकानां चित्तं न निरति। इयं बोधिसत्त्वस्य महासत्त्वस्या-
लीनचित्तता। तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य सर्ववस्तु-
निरपेक्षता। यः सर्ववस्तूनाममनसिकारः। इयं बोधिसत्त्वस्य
महासत्त्वस्य सर्ववस्तुनिरपेक्षता। तत्र कतमा बोधिसत्त्वस्य महा-
सत्त्वस्य [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

रूपशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्मा निर्याणमिच्छेत् । शब्दशून्यतायाः स सुभूते निर्याणमिच्छेद लक्षणानां धर्म्माणां निर्याणमिच्छेत् । गन्धशून्यतायाः स सु निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । रसशून्यता स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छे स्पर्शशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्मा निर्याणमिच्छेत् । धर्म्मशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽल णानां धर्म्माणां निर्याणमिच्छेत् । तत् कस्य हेतोर्नहि सुभ रूपशून्यता त्रैधातुकान्निर्याति । न सर्व्वाकारज्ञतायां तिष्ठति न शब्दशून्यता त्रैधातुकान्निर्याति । न सर्व्वाकारज्ञतायां तिष्ठति न गन्धशून्यता त्रैधातुकान्निर्याति । न सर्व्वाकारज्ञतायां तिष्ठति न रसशून्यता त्रैधातुकान्निर्याति । न सर्व्वाकारज्ञतायां तिष्ठति न स्पर्शशून्यता त्रैधातुकान्निर्याति । न सर्व्वाकारज्ञतायां तिष्ठति न धर्म्मशून्यता त्रैधातुकान्निर्याति । न सर्व्वाकारज्ञतायां तिष्ठति तत् कस्य हेतोस्तथाहि सुभूते रूपं रूपेण शून्यं शब्दः शब्देन शून्यं गन्धो गन्धेन शून्यं रसो रसेन शून्यं स्पर्शः स्पर्शेन शून्यः धर्म्मो धर्म्मेण शून्यः ।

चक्षुर्विज्ञानशून्यताया स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । श्रोत्रविज्ञानशून्यताया स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । घ्राणविज्ञानशून्यताया स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्मा[illegible] [illegible] स सुभूते निर्या[illegible]

परिवर्जयितव्यः । समं समनुपश्यति कुतः पुनरधिक येनाऽधिमन्येत एवमधिमानः परिवर्जयितव्यः । तत्र कथं बोधिसत्त्वेन महासत्त्वेन स्तम्भः परिवर्जयितव्यः । तथाहि स तद्वस्तुन समनुपश्यति । यत्राऽस्य स्तम्भ उत्पद्येत । एवं बोधिसत्त्वेन महासत्त्वेन स्तम्भः परिवर्जयितव्यः । तत्र कथ बोधिसत्त्वेन महासत्त्वेन विपर्य्यासाः परिवर्जयितव्याः । वस्त्वनुपलब्धितामुपादाय । एवं बोधिसत्त्वेन महासत्त्वेन विपर्य्यासाः परिवर्जयितव्याः । तत्र कथं बोधिसत्त्वेन महासत्त्वेन रागद्वेषमोहानाधिवासयितव्याः । तथा हि सरागद्वेषमोहानां वस्तुन समनुपश्यति । एव बोधिसत्त्वेन महासत्त्वेन रागद्वेषमोहानाऽधिवासयितव्याः ।

तत्र कतमे षष्ठ्यां भूमौ षट्धर्म्माः परिपूरयितव्याः । यदुत षट्पारमिताः । दानपारमिता, शीलपारमिता, क्षान्तिपारमिता, वीर्य्यपारमिता, ध्यानपारमिता, प्रज्ञापारमिता, परिपूरयितव्याः । तथा ह्यासु षट्सु पारमितासु, स्थित्वा बुद्धा भगवन्तः श्रावकप्रत्येकबुद्धाश्च पञ्चविधस्य ज्ञेयार्णवस्य पारङ्गता गच्छन्ति गमिष्यन्ति च । कतमस्य पञ्चविधस्य । यदुताऽतीतस्यानागतस्य प्रत्युत्पन्नस्यावाच्यस्याऽसंस्कृतस्य । एवं बोधिसत्त्वेन महासत्त्वेन षट्धर्म्माः परिपूरयितव्याः । तत्र कथ बोधिसत्त्वेन महासत्त्वेन श्रावकचित्तं परिवर्जयितव्यम् । तथा हि नैषमार्गो बोधये । प्रत्येकबुद्धचित्तं परिवर्जयितव्यम् । तथा हि नैषमार्गो बोधये । परितर्षणचित्तं नोत्पादयितव्यम् । तथा हि नैषमार्गो बोधये । याचनकं दृष्ट्वा नाऽवलीनचित्तमुत्पादयितव्यम् । तत्कस्य हेतोस्तथा हि नैषमार्गो

ज्ञता [illegible] स सुभूते निर्याणमिच्छेद्योऽलक्षणानां
धर्माणां निर्याणमिच्छेत्। तत् कस्य हेतोर्न हि सु-
भूते सर्वाकारज्ञता त्रैधातुकान्निर्याति। न सर्वाकारज्ञतायां तिष्ठति।
न श्रोत्रसंस्पर्शजया वेदनया त्रैधातुकान्निर्याति। न सर्वाकारज्ञतायां
तिष्ठति। न घ्राणसंस्पर्शजया वेदनया त्रैधातुकान्निर्याति। न सर्वाका-
रज्ञतायां तिष्ठति। न जिह्वासंस्पर्शजया वेदनया त्रैधातुकान्निर्याति।
न सर्वाकारज्ञतायां तिष्ठति। न कायसंस्पर्शजया वेदनया त्रैधातुका-
न्निर्याति। न सर्वाकारज्ञतायां तिष्ठति। न मनःसंस्पर्शजया
त्रैधातुकान्निर्याति। न सर्वाकारज्ञतायां तिष्ठति। तत्
कस्य हेतोस्तथा हि सुभूते चक्षुः संस्पर्शश्चक्षुःसंस्पर्शेन शून्यः।
श्रोत्रसंस्पर्शः श्रोत्रसंस्पर्शेन शून्यः। घ्राणसंस्पर्शो घ्राणसंस्पर्शेन शून्यः।
जिह्वासंस्पर्शो जिह्वासंस्पर्शेन शून्यः। कायसंस्पर्शः कायसंस्पर्शेन शून्यः।
मनःसंस्पर्शो मनःसंस्पर्शेन शून्यः।

चक्षुःसंस्पर्शप्रत्ययवेदनायाः स सुभूते निर्याणमिच्छेद्यो-
ऽलक्षणानां धर्माणां निर्याणमिच्छेत्। श्रोत्रसंस्पर्शप्रत्ययवेदनायाः
स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्माणां निर्याणमिच्छेत्।
घ्राणसंस्पर्शप्रत्ययवेदनायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां
धर्माणां निर्याणमिच्छेत्। जिह्वासंस्पर्शप्रत्ययवेदनायाः स सुभूते
निर्याणमिच्छेद्योऽलक्षणानां धर्माणां निर्याणमिच्छेत्। कायसंस्पर्श-
प्रत्ययवेदनायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्माणां
निर्याणमिच्छेत्। मनःसंस्पर्शप्रत्ययवेदनायाः स सुभूते निर्याण-
मिच्छेत् योऽलक्षणानां धर्माणां निर्याणमिच्छेत्। तत् कस्य हेतोर्न हि

[illegible] नैवात्माभिनिवेशो न [illegible]। तथा [illegible] स्कन्धेन
[illegible]। एवं बोधिसत्त्वेन महासत्त्वेन नैवात्माभिनिवेशो न
कर्त्तव्यः। तत्र कथं बोधिसत्त्वेन महासत्त्वेन नैवात्मनाभिनिवेशः [illegible]
न कर्त्तव्यः। तथा हि [illegible] न [illegible] नोपलभ्यते। एवं
बोधिसत्त्वेन महासत्त्वेन नैवात्म[illegible] न कर्त्तव्यम्। तत्र कथं
बोधिसत्त्वेन महासत्त्वेन नैवात्म[illegible] न कर्त्तव्यः। तथा हि तत्र
[illegible] एव नैवात्मानुपलम्भो न कर्त्तव्यः। तत्र कथं
बोधिसत्त्वेन महासत्त्वेन नैवात्मनिश्रयो न कर्त्तव्यः। तथा हि तत्र
[illegible] विद्यते। एवं बोधिसत्त्वेन महासत्त्वेन नैवात्मनिश्रयो
न कर्त्तव्यः। तत्र कथं बोधिसत्त्वेन महासत्त्वेन बुद्धनिश्रयदृष्ट्यभि-
निवेशो न कर्त्तव्यः। तथा हि न बुद्धदृष्टिनिश्रयो बुद्धदर्शनम्।
एवं बोधिसत्त्वेन महासत्त्वेन बुद्धनिश्रयदृष्ट्यभिनिवेशो न कर्त्तव्यः।
तत्र कथं बोधिसत्त्वेन महासत्त्वेन धर्म्मनिश्रयदृष्ट्यभिनिवेशो न
कर्त्तव्यः। तथा हि न धर्म्मदृष्टिनिश्रयाद्धर्म्मदर्शनम्। एवं बोधि-
सत्त्वेन महासत्त्वेन धर्म्मनिश्रयदृष्ट्यभिनिवेशो न कर्त्तव्यः। तत्र कथं
बोधिसत्त्वेन महासत्त्वेन सङ्घनिश्रयदृष्ट्यभिनिवेशो न कर्त्तव्यः। तथा
हि न सङ्घदृष्टिनिश्रयात् सङ्घदर्शनम्। एवं बोधिसत्त्वेन महासत्त्वेन
सङ्घनिश्रयदृष्ट्यभिनिवेशो न कर्त्तव्यः। तत्र कथं बोधिसत्त्वेन महा-
सत्त्वेन शीलनिश्रयदृष्ट्यभिनिवेशो न कर्त्तव्यः। तथा हि न शील-
दृष्टिनिश्रयाच्छीलपरिशुद्धिरेवं बोधिसत्त्वेन महासत्त्वेन शील-
निश्रयदृष्ट्यभिनिवेशो न कर्त्तव्यः। तत्र कथं बोधिसत्त्वेन महा-
सत्त्वेन शून्याधर्मा इति विषादो न कर्त्तव्यः। तथा हि सर्व्वधर्माः

ति । तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य कल्पनासमुद्घातः ।
या सर्व्वधर्माणां नाम निर्विकल्पनता । तत्र कतमो बोधिसत्त्वस्य महा-
सत्त्वस्य दृष्टिविवर्त्तः । या श्रावकभूमेः प्रत्येकबुद्धभूमेश्च दृष्टिविवर्त्त-
नता । तत्र कतमो बोधिसत्त्वस्य महासत्त्वस्य क्लेशविवर्त्तः । यः
सर्व्वक्लेशानामसमुदाचारसमयः । तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य
शमथविपश्यनाभूमिः । यदुत सर्व्वाकारज्ञताज्ञानं । तत्र कतमा
बोधिसत्त्वस्य महासत्त्वस्य दान्तचित्तता । यत् त्रैधातुके नाभि-
नन्दति । तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य शान्तचित्तता ।
षडिन्द्रियाणां प्रतिसंहरणता । तत्र कतमद्बोधिसत्त्वस्य महा-
सत्त्वस्याऽप्रतिहतज्ञानं । यदुत बुद्धचक्षुः प्रतिलम्भः । तत्र कतमा
बोधिसत्त्वस्य महासत्त्वस्याननुनया च सर्व्वज्ञतया षडायतनापेक्षा ।
तत्र कतमद्बोधिसत्त्वस्य महासत्त्वस्य यथेष्टदेशगमनं । यच्च तत्र
पर्षन्मध्ये आत्मभावदर्शनं । तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य
सर्व्वसत्त्वचित्ताऽनुप्रवेशः । यदेकचित्तेन सर्व्वसत्त्वानां चित्तचेतसि-
कानि प्रतिजानाति । तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्याऽभिज्ञा
विक्रीडनता । याभिराभिज्ञाभिर्व्विक्रीडन् बुद्धक्षेत्राद्बुद्धक्षेत्रं संक्रा-
मति । बुद्धदर्शनाय न चाऽस्य बुद्धसंज्ञा भवति । तत्र कतमद्बोधि-
सत्त्वस्य महासत्त्वस्य बुद्धक्षेत्रदर्शनं । यदेकस्मिन्नेव बुद्धक्षेत्रे स्थित्वा-
ऽपरिमाणानि बुद्धक्षेत्राणि पश्यति । न चाऽस्य बुद्धक्षेत्रसंज्ञा
भवति । तत्र कतमा बोधिसत्त्वस्य महासत्त्वस्य यथादृष्टि बुद्ध-
क्षेत्रपरिनिष्पादनता । यत्त्रिसाहस्रमहासाहस्रलोकधातौ ईश्वरचक्र-
वर्त्तिभूमौ स्थित्वा त्रिसाहस्रमहासाहस्रलोकधातोः परित्यजनं तेन

शून्यतायां चरन् स्वलक्षणशून्यतायां चरन् अनूपलम्भ-
यां चरन् अभावशून्यतायां चरन् स्वभावशून्यतायां चरन्
स्वभाव शून्यतायां चरन् स्मृत्युपस्थानेषु चरन् सम्यक्प्रहाणेषु
ऋद्धिपादेषु चरन् इन्द्रियेषु चरन् बलेषु चरन् बोध्यङ्गेषु
आर्य्याष्टाङ्गमार्गे चरन् आर्य्यसत्येषु चरन् ध्यानेषु चरन्
णेषु चरन् आरुप्यसमापत्तिषु चरन् विमोक्षेषु चरन्
पूर्व्व विहार समापत्तिषु चरन् शून्यतानिमित्ताप्रणिहित-
मोक्षेषु चरन् अभिज्ञासु चरन् धारनीमुखेषु चरन् समाधिषु
रन् तथागतबलेषु चरन् चतुर्षु वैशारद्येषु चरन् चतुःप्रतिसम्वित्सु
रन् महामैत्र्यां चरन् महाकरुणायां चरन् अष्टादशस्वावेणि-
द्धधर्म्मेषु चरन् शुक्लविपश्यनाभूमिमतिक्रामति । गोत्रभूमिं
समतिक्रामति । अष्टमकभूमिं समतिक्रामति । दर्शनभूमिं समति-
क्रामति । तनुभूमिं समतिक्रामति । वीतरागभूमिं समतिक्रामति ।
कृताविभूमिं समतिक्रामति । प्रत्येक बुद्धभूमिं समतिक्रामति ।
बोधिसत्वभूमिं समतिक्रामति । इह सुभूते बोधिसत्वोमहासत्वो
नवभूमिरतिक्रामति । बुद्धभूमौ तिष्ठति । इह सुभूते बोधिसत्वस्य
महासत्वस्य दशभूमयः । एवं खलु सुभूते बोधिसत्वो महासत्वो
महायानं संप्रस्थितो वेदितव्यः ।

यत् पुनः सुभूतिरेव माह । कुतस्तद्यानं निर्यास्यतीति । तत्
त्रैधातुकान्निर्य्यास्यति । येन सर्व्वाकारज्ञता तेन स्थास्यति । तत्
पुनरद्वययोगेन । तत् कस्य हेतो स्तथाहि सुभूते यश्च महायानं
या च सर्व्वाकारज्ञता उभावेतौ धर्म्मौ न विसंयुक्तौ संयुक्तावरूपिणा-

स्वलक्षणशून्यता स्वलक्षणशून्यतया शून्या। अनुपलम्भशून्यता अनुपलम्भशून्यतया शून्या। अभावशून्यता अभावशून्यतया शून्या। स्वभावशून्यता स्वभावशून्यतया शून्या। अभावस्वभावशून्यता अभावस्वभावशून्यतया शून्या।

स्मृत्युपस्थानानां सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्माणां निर्याणमिच्छेत्। सम्यक्प्रहाणानां स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्माणां निर्याणमिच्छेत्। ऋद्धिपादानां स सुभूते निर्याणमिच्छेद्योऽलक्षणानां निर्याणमिच्छेत्। इन्द्रियाणां स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्माणां निर्याणमिच्छेत्। बलानां स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्माणां निर्याणमिच्छेत्। बोध्यङ्गाना स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्माणां निर्याणमिच्छेत्। आर्य्याष्टाङ्गमार्गस्य स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्माणा निर्याणमिच्छेत्। तत् कस्य हेतोस्तथाहि सुभूते यः स्मृत्युपस्थानानां स्वभावो न स त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। यः सम्यक्प्रहाणानां स्वभावो न स त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायाः तिष्ठति। य ऋद्धिपादानां स्वभावो न स त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। य इन्द्रियाणां स्वभावो न स त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। यो बलाणां स्वभावो न स त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। यो बोध्यङ्गाणां स्वभावो न स त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। यो मार्गस्य स्वभावो न स त्रैधातुकान्निर्याति। न

सर्व्वाकारज्ञतायां तिष्ठति। न संस्कारशून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। न विज्ञानशून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। तत् कस्य हेतोर्यथाहि। स सुभूते रूपं रूपेण शून्यं। वेदना वेदनया शून्या। संज्ञा संज्ञया-शून्या। संस्काराः संस्कारैः शून्याः। विज्ञानं विज्ञानेन शून्यं। चक्षुः शून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। श्रोत्र शून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। घ्राण शून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। जिह्वा शून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। काय शून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। मनः शून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। तत् कस्य हेतोर्नहि सुभूते चक्षुः शून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। न श्रोत्रशून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। न घ्राणशून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। न जिह्वाशून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। न कायशून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। न मनःशून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। तत् कस्य हेतोर्यथाहि सुभूते चक्षुश्चक्षुषा शून्यं। श्रोत्रं श्रोत्रेण शून्यं। घ्राणं घ्राणेन शून्यं। जिह्वा जिह्वया शून्या। कायः कायेन शून्यः। मनो मनसा शून्यं

समापत्तीनां स्वभावो न स त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। योऽष्टानां विमोक्षाणां स्वभावो न स त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। यो नवाऽनुपूर्व्वविहार समापत्तीनां स्वभावो न स त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। यः शून्यतायाः स्वभावो न स त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। यो ऽप्रमाणहितस्य स्वभावो न स त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। तत् कस्य हेतोस्तथाहि सुभूते आर्य्यसत्यस्य स्वभाव आर्य्यसत्यस्वभावेन शून्यः। ध्यानस्वभावो ध्यानस्वभावेन शून्यः। अप्रमाणस्वभावो ऽप्रमाणस्वभावेन शून्यः। आरूप्यसमापत्ति स्वभाव आरूप्यसमापत्तिस्वभावेन शून्यः। विमोक्षस्वभावो विमोक्षस्वभावेन शून्यः। नवाऽनुपूर्व्वविहार स्वभावो नवाऽनुपूर्व्वविहारस्वभावेन शून्यः। शून्यतास्वभावः शून्यता स्वभावेन शून्यः। आनिमित्त स्वभाव आनिमित्त स्वभावेन शून्यः। अप्रणिहितस्वभावो ऽप्रणिहितस्वभावेन शून्यः।

अभिज्ञानां स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। समाधीनां स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। धारणीमुखानां स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। तत् कस्य हेतोस्तथाहि सुभूते यो ऽभिज्ञानां स्वभावो न स त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। यः समाधीनां स्वभावो न स त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। यो धारणी-

च्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । काय विज्ञानशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्यानमिच्छेत् । मनो विज्ञानशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्यानमिच्छेत् । तत् कस्य हेतोर्नहि सुभूते चक्षुर्व्विज्ञानशून्यता त्रैधातुकान्निर्याति । न सर्व्वाकारज्ञतायां तिष्ठति । न श्रोत्रविज्ञानशून्यता त्रैधातुकान्निर्याति । न सर्व्वाकारज्ञतायां तिष्ठति । न घ्राणविज्ञानशून्यता त्रैधातुकान्निर्याति । न सर्व्वाकारज्ञतायां तिष्ठति । न जिह्वा विज्ञानशून्यता त्रैधातुकान्निर्याति । सर्व्वाकारज्ञतायां तिष्ठति । न कायविज्ञानशून्यता त्रैधातुकान्निर्याति । न सर्व्वाकारज्ञतायां तिष्ठति । न मनोविज्ञानशून्यता त्रैधातुकान्निर्याति । न सर्व्वाकारज्ञतायां तिष्ठति । तत् कस्य हेतोस्तथाहि सुभूते चक्षुर्व्विज्ञानं चक्षुर्व्विज्ञानेन शून्य । श्रोत्रविज्ञानं श्रोत्रविज्ञानेन शून्य । घ्राणविज्ञानं घ्राणविज्ञानेन शून्य । जिह्वाविज्ञानं जिह्वाविज्ञानेन शून्य। कायविज्ञान कायविज्ञानेन शून्यं । मनोविज्ञानं मनोविज्ञानेन शून्य ।

चक्षुः संस्पर्शशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणा निर्याणमिच्छेत् । श्रोत्रसंस्पर्शशून्यताया स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । घ्राणसंस्पर्शशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । जिह्वा संस्पर्शशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । कायसंस्पर्शशून्यताया स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् ।

निर्याणमिच्छेत्। प्रत्येकबुद्धस्य स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्माणां निर्याणमिच्छेत्। बोधिसत्त्वस्य महासत्त्वस्य स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्माणां निर्याणमिच्छेत्। तथागतस्यार्हतः सम्यक्सम्बुद्धस्य स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्माणां निर्याणमिच्छेत्। तत्कस्य हेतोस्तथाहि सुभूते योऽर्हतः सम्यक् सम्बुद्धस्य स्वभावो न स त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। यः प्रत्येकबुद्धस्य स्वभावो न स त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। यो बोधिसत्त्वस्य महासत्त्वस्य स्वभावो न स त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। यस्तथागतस्यार्हतः सम्यक्सम्बुद्धस्य स्वभावो न स त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। तत्कस्य हेतोस्तथा हि सुभूते अर्हत् स्वभावोऽर्हत् स्वभावेन शून्यः। प्रत्येकबुद्धस्वभावः प्रत्येकबुद्धस्वभावेन शून्यः। बोधिसत्त्वस्वभावो बोधिसत्त्वस्वभावेन शून्यः। तथागतस्वभावस्तथागतस्वभावेन शून्यः।

स्रोत आपत्तिफलस्य स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्माणां निर्याणमिच्छेत्। सकृदागामिफलस्य स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्माणां निर्याणमिच्छेत्। अनागामिफलस्य स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्माणां निर्याणमिच्छेत्। अर्हत्त्वस्य स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्माणां निर्याणमिच्छेत्। प्रत्येकबोधेः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्माणां निर्याणमिच्छेत्। मार्गाकारज्ञतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्माणां निर्याणमिच्छेत्। सर्व्वाकारज्ञतायाः

[illegible]

[illegible] सुभूते निर्याणमिच्छेद् [illegible] निर्याणमिच्छेत्। अनिरोधेन सुभूते निर्याणमिच्छेदनिरोधानां धर्माणां निर्याणमिच्छेत्। संक्लेशेन सुभूते निर्याणमिच्छेत् संक्लेशानां धर्माणां निर्याणमिच्छेत्। व्यवदानेन सुभूते निर्याणमिच्छेद्व्यवदानानां धर्माणां निर्याणमिच्छेत्। अनभिसंस्कारेण सुभूते निर्याणमिच्छेदनभिसंस्काराणां धर्माणां निर्याणमिच्छेत्। तत्कस्य हेतोस्तथा हि योऽनुत्पादस्य स्वभावो न स त्रैधातुकान्निर्याति। न सर्वाकारज्ञतायां तिष्ठति। योऽनिरोधस्वभावो न स त्रैधातुन्निर्याति। न सर्वाकारज्ञतायां तिष्ठति। यः संक्लेशस्वभावो न स त्रैधातुकान्निर्याति। न सर्वाकारज्ञतायां तिष्ठति। यो व्यवदानस्य स्वभावो न स त्रैधातुकान्निर्याति। न सर्वाकारज्ञतायां तिष्ठति। योऽनभिसंस्कारस्य स्वभावो न स त्रैधातुकान्निर्याति। न सर्वाकारज्ञतायां तिष्ठति। तत्कस्य हेतोस्तथा हि। अनुत्पादस्वभावोऽनुत्पादस्वभावेन शून्यः। निरोधस्वभावो निरोधस्वभावेन शून्यः। संक्लेशस्वभावः संक्लेशस्वभावेन शून्यः। व्यवदानस्वभावो व्यवदानस्वभावेन शून्यः। अनभिसंस्कारस्वभावोऽनभिसंस्कारस्वभावेन शून्य।

तुकान्निर्याति । न सर्व्वाकारज्ञतायां तिष्ठति । यो वीर्य्यपारमितायाः स्वभावो न स त्रैधातुकान्निर्याति । न सर्व्वाकारज्ञतायां तिष्ठति । यो ध्यानपारमितायाः स्वभावो न स त्रैधातुकान्निर्याति । न सर्व्वाकारज्ञतायां तिष्ठति । यः प्रज्ञापारमितायाः स्वभावो न स त्रैधातुकान्निर्याति । न सर्व्वाकारज्ञतायां तिष्ठति । तत्कस्य हेतोस्तथाहि सुभूते दानपारमितायाः स्वभावो दानपारमितास्वभावेन शून्यः । शीलपारमितायाः स्वभावः शीलपारमितास्वभावेन शून्यः । क्षान्तिपारमितायाः स्वभावः क्षान्तिपारमितास्वभावेन शून्यः । वीर्य्यपारमितायाः स्वभावो वीर्य्यपारमितास्वभावेन शून्यः । ध्यानपारमितायाः स्वभावो ध्यानपारमितास्वभावेन शून्यः । प्रज्ञापारमितास्वभावः प्रज्ञापारमितास्वभावेन शून्यः ।

अध्यात्मशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । वहिर्द्धाशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । अध्यात्मवहिर्द्धाशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । शून्यताशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । महाशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । परमार्थशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । संस्कृतशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । असंस्कृतशून्यतायाः स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत् । अत्यन्तशून्यतायाः स सुभूते

सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। तत्कस्य हेतोस्तथा हि नामशून्यता नामशून्यतास्वभावेन शून्या। निमित्तशून्यता निमित्तशून्यतास्वभावेन शून्या। सङ्केतशून्यतास्वभावेन शून्या। व्यवदानशून्यता व्यवदानशून्यतास्वभावेन शून्या। प्रज्ञप्तिशून्यता प्रज्ञप्तिशून्यतास्वभावेन शून्या।

अनुत्पादस्य सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। अनिरोधस्य सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। संक्लेशस्य सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। व्यवदानस्य सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। अनभिसंस्कारस्य सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्म्माणां निर्याणमिच्छेत्। तत्कस्य हेतोस्तथाहि योऽनुत्पादस्य स्वभावो न स संधातुकान्निर्याति। न सर्वाकारज्ञतायां तिष्ठति। योऽनिरोधस्वभावो न स संधातुकान्निर्याति। न सर्वाकारज्ञतायां तिष्ठति। यः संक्लेशस्वभावो न स संधातुकान्निर्याति। न सर्वाकारज्ञतायां तिष्ठति। यो व्यवदानस्य स्वभावो न स संधातुकान्निर्याति। न सर्वाकारज्ञतायां तिष्ठति। योऽनभिसंस्कारस्य स्वभावो न स संधातुकान्निर्याति। न स सर्वाकारज्ञतायां तिष्ठति। तत्कस्य हेतोस्तथा हि [illegible] स्वभावेन शून्या। निरोधस्वभावो [illegible]

र्याति। न सर्व्वाकारज्ञतायां तिष्ठति। नात्यन्तशून्यता त्रैधातु-काम्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। नाऽनवराग्रशून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। नाऽनवकार-शून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। न प्रकृतिशून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। न सर्व्वधर्म्मशून्यता त्रैधातुकान्निर्याति। न सर्व्वाकार-ज्ञतायां तिष्ठति। न स्वलक्षणशून्यता त्रैधातुकान्निर्याति न सर्व्वाऽकारज्ञतायां तिष्ठति। नाऽ नुपलम्भशून्यता त्रैधातुका-न्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। नाऽ भावशून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। न स्वभाव-शून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति। नाऽ भावस्वभावशून्यता त्रैधातुकान्निर्याति। न सर्व्वाकारज्ञतायां तिष्ठति।

तत् कस्य हेतोस्तथाहि सुभूते ऽध्यात्मशून्यता ऽध्यात्मशून्यतया शून्या। बहिर्द्धाशून्यता बहिर्द्धाशून्यतयाशून्या। अध्यात्म बहिर्द्धाशून्यता ऽध्यात्मबहिर्द्धाशून्यतया शून्या। शून्यताशून्यता शून्यतया शून्या। महाशून्यता महाशून्यतया शून्या। परमार्थ-शून्यता परमार्थशून्यतया शून्या। संस्कृतशून्यता संस्कृतशून्यतया शून्या। असंस्कृतशून्यता ऽसंस्कृतशून्यतया शून्या। अत्यन्तशून्यता अत्यन्तशून्यतया शून्या। अनवराग्रशून्यता अनवराग्रशून्यतया शून्या। अनवकारशून्यता अनवकारशून्यतया शून्या। प्रकृतिशून्यता प्रकृतिशून्यतया शून्या। सर्व्वधर्म्मशून्यता सर्व्वधर्म्मशून्यतया शून्या।

[illegible]

[illegible]

[illegible] तिष्ठति । [illegible]

[illegible] तिष्ठति । यो [illegible]

[illegible] तिष्ठति । यो [illegible]

[illegible] तिष्ठति । य [illegible]

स्वभावः स्वभावो न स पंचधातुकान्निर्याति । न सर्वाकारज्ञतायां तिष्ठति । तद् कस्य हेतोर्लक्षणाहि सुभूते अभिज्ञास्वभावो ऽभिज्ञास्वभावेन शून्यः । समाधिस्वभावः समाधिस्वभावेन शून्यः । धारणीमुखस्वभावो धारणीमुखस्वभावेन शून्यः ।

दशानां तथागतबलानां च सुभूते निर्याणनिष्यन्दोऽलक्षणानां धर्माणां निर्याणनिष्यन्देन । चतुर्णां वैशारद्यानां च सुभूते निर्याणनिष्यन्दोऽलक्षणानां धर्माणां निर्याणनिष्यन्देन । चतसृणां प्रतिसंविदां च सुभूते निर्याणनिष्यन्दोऽलक्षणानां धर्माणां निर्याणनिष्यन्देन । अष्टादशानामावेणिक बुद्धधर्माणां च सुभूते निर्याणनिष्यन्दोऽलक्षणानां धर्माणां निर्याणनिष्यन्देन । तत् कस्य हेतोर्लक्षणाहि सुभूते यो दशानां तथागतबलानां स्वभावो न स पंचधातुकान्निर्याति । न सर्वाकारज्ञतायां तिष्ठति । यश्चतुर्णां वैशारद्यानां स्वभावो न स पंचधातुकान्निर्याति । न सर्वाकारज्ञतायां तिष्ठति । य चतसृणां प्रतिसंविदां स्वभावो न स पंचधातुकान्निर्याति । न सर्वाकारज्ञतायां तिष्ठति । यो ऽष्टादशानामावेणिकबुद्धधर्माणां स्वभावो न स पंचधातुकान्निर्याति । न सर्वाकारज्ञतायां तिष्ठति । तत् कस्य हेतोर्लक्षणाहि । सुभूते तथागतबलस्वभावस्तथागतबल स्वभावेन शून्यः । वैशारद्यस्वभावो वैशारद्यस्वभावेन शून्यः । प्रतिसम्वित्स्वभावः प्रतिसम्वित्स्वभावेन शून्यः । आवेणिक बुद्धधर्मस्वभाव आवेणिक बुद्धधर्मा स्वभावेन शून्यः ।

अर्हतः सुभूते क्षीणास्रवस्योपपत्तिनिष्यन्दोऽलक्षणानां धर्माणां



[illegible] निर्याणमिच्छेद्योऽलक्षणानां धर्माणां निर्याणमिच्छेत्। तत्कस्य हेतोस्तथा हि सुभूते यः स्रोत आपत्तिफलस्य स्वभावो न स त्रैधातुकान्निर्याति। न सर्वाकारज्ञतायां तिष्ठति। यः सकृदागामिफलस्य स्वभावो न स त्रैधातुकान्निर्याति। न सर्वाकारज्ञतायां तिष्ठति। योऽनागामिफलस्य स्वभावो न स त्रैधातुकान्निर्याति। न सर्वाकारज्ञतायां तिष्ठति। योऽर्हत्वस्य स्वभावो न स त्रैधातुकान्निर्याति। न सर्वाकारज्ञतायां तिष्ठति। यः प्रत्येकबोधेः स्वभावो न स त्रैधातुकान्निर्याति। न सर्वाकारज्ञतायां तिष्ठति। यो मार्गाकारज्ञतायाः स्वभावो न स त्रैधातुकान्निर्याति। न सर्वाकारज्ञतायां तिष्ठति। यः सर्वाकारज्ञतायाः स्वभावो न स त्रैधातुकान्निर्याति। न सर्वाकारज्ञतायां तिष्ठति। तत्कस्य हेतोस्तथा हि सुभूते स्रोत आपत्तिफलस्वभावः स्रोत आपत्तिफलस्वभावेन शून्यः। सकृदागामिफलस्वभावः सकृदागामिफलस्वभावेन शून्यः। अनागामिफलस्वभावोऽनागामिफलस्वभावेन शून्यः। अर्हत्वस्वभावोऽर्हत्वस्वभावेन शून्यः। प्रत्येकबोधिस्वभावः प्रत्येकबोधिस्वभावेन शून्यः। मार्गाकारज्ञतास्वभावो मार्गाकारज्ञतास्वभावेन शून्यः। सर्वाकारज्ञतास्वभावः सर्वाकारज्ञतास्वभावेन शून्यः।

शब्दस्य स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्माणां निर्याणमिच्छेत्। निमित्तस्य स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्माणां निर्याणमिच्छेत्। संस्कृतस्य स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्माणां निर्याणमिच्छेत्। व्यवहारस्य स सुभूते निर्याणमिच्छेद्योऽलक्षणानां धर्माणां निर्याणमिच्छेत्। प्रज्ञप्तेः स

तद्नेनापि ते सुभूते पर्य्यायेणैवं वेदितव्यम् । महायानं त्रैधातुकान्निर्याति । येन सर्व्वाकारज्ञता तेन यास्यत्ययास्यतत् स्थान । यत्पुनः सुभूतिरेवमाह । क तद्यानं स्थास्यतीति । न कचित्तद्यानं स्थास्यति । तत्कस्य हेतोस्तथा ह्यस्थिताः सर्व्वधर्म्माः प्रतिष्ठाऽनुपलब्धितः । अपि तु खलु पुनः सुभूते अस्थानस्थान-योगेन तद्यान स्थास्यति । तद्यथापि नामसुभूते धर्म्मधातुर्न स्थितो नाऽस्थितः । एवमेव सुभूते तद्यान न स्थितं नाऽस्थितं । तद्यथापि नाम सुभूते तथता न स्थिता नाऽस्थिता । एवमेव सुभूते तद्यानं न स्थित नाऽस्थितं । तद्यथापि नाम सुभूते भूतकोटिर्न स्थिता नाऽस्थिता । एवमेव तद्यानं न स्थित नाऽस्थितं । तद्यथापि नाम सुभूतेऽचिन्त्यधातुर्न स्थितो नाऽस्थित. । एवमेव तद्यानं न स्थितं नाऽस्थितं । तत्कस्य हेतोर्न हि सुभूते धर्म्मधातुस्वभावः स्थितो वाऽस्थितो वा । न तथतायाः स्वभावः स्थितो वाऽस्थितो वा । न भूतकोटेः स्वभावः स्थितो वाऽस्थितो वा । नाऽचिन्त्यधातुस्वभावः स्थितो वाऽस्थितो वा । तत्कस्य हेतोस्तथा हि सुभूते । धर्म्मधातु-स्वभावो धर्म्मधातुस्वभावेन शून्यः । तथता स्वभावस्तथता स्वभावेन शून्यः । भूतकोटिः स्वभावो भूतकोटिस्वभावेन शून्यः । अचिन्त्यधातु-स्वभावोऽचिन्त्यधातुस्वभावेन शून्यः । तद्यथापि नाम सुभूते आकाशधातुर्न स्थितो नाऽस्थितः । एवमेव सुभूते तद्यान न स्थित नाऽस्थित । तद्यथापि नाम सुभूते रागद्वयधातुर्न स्थितो नाऽ-स्थितः । एवमेव सुभूते तद्यानं न स्थितं नाऽस्थितं । तद्यथापि नाम सुभूते मद्दाणधातुर्न स्थितो नाऽस्थितः । एवमेव सुभूते

तदनेनापि ते सुभूते पर्य्यायेणैवं वेदितव्यम्। महायानं त्रैधातुकान्निर्यास्यति। येन सर्व्वाकारज्ञता तेन यास्यत्यपास्यतत् स्थानं। यत्पुनः सुभूतिरेवमाह। क्व तद्यानं स्थास्यतीति। न क्वचित्तद्यानं स्थास्यति। तत्कस्य हेतोस्तथा ह्यस्थिताः सर्व्वधर्म्माः प्रतिष्ठाऽनुपलब्धितः। अपि तु खलु पुनः सुभूते अस्थानस्थान-योगेन तद्यानं स्थास्यति। तद्यथापि नाम सुभूते धर्म्मधातुर्न स्थितो नाऽस्थितः। एवमेव सुभूते तद्यानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते तथता न स्थिता नाऽस्थिता। एवमेव सुभूते तद्यानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते भूतकोटिर्न स्थिता नाऽस्थिता। एवमेव तद्यानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूतेऽचिन्त्यधातुर्न स्थितो नाऽस्थित.। एवमेव तद्यानं न स्थितं नाऽस्थितं। तत्कस्य हेतोर्न हि सुभूते धर्म्मधातुस्वभावः स्थितो वाऽस्थितो वा। न तथतायाः स्वभावः स्थितो वाऽस्थितो वा। न भूतकोटेः स्वभावः स्थितो वाऽस्थितो वा। नाऽचिन्त्यधातुस्वभावः स्थितो वाऽस्थितो वा। तत्कस्य हेतोस्तथा हि सुभूते। धर्म्मधातु-स्वभावो धर्म्मधातुस्वभावेन शून्यः। तथता स्वभावस्तथता स्वभावेन शून्यः। भूतकोटेः स्वभावो भूतकोटिस्वभावेन शून्यः। अचिन्त्यधातु-स्वभावोऽचिन्त्यधातुस्वभावेन शून्यः। तद्यथापि नाम सुभूते आकाशधातुर्न स्थितो नाऽस्थितः। एवमेव सुभूते तद्यानं न स्थितं नाऽस्थित। तद्यथापि नाम सुभूते रागक्षयधातुर्न स्थितो नाऽ-स्थितः। एवमेव सुभूते तद्यानं न स्थित नाऽस्थितं। तद्यथापि नाम सुभूते प्रहाणधातुर्न स्थितो नाऽस्थितः। एवमेव सुभूते

वाऽस्थितो वा। न संज्ञास्वभावः स्थितो वाऽस्थितो वा। न संस्कार-स्वभावः स्थितो वाऽस्थितो वा। न विज्ञानस्वभावः स्थितो वाऽस्थितो वा। तत्कस्य हेतोः? तथा हि। रूपं रूपेण शून्यं वेदना वेदनया शून्या। संज्ञा संज्ञया शून्या। संस्काराः संस्कारैः शून्याः। विज्ञानं विज्ञानेन शून्यम्।

तथापि नाम सुभूते चक्षुः शून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्नामधेयं न स्थितं नाऽस्थितं। तथापि नाम सुभूते श्रोत्रशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्नामधेयं न स्थितं नाऽस्थितं। तथापि नाम सुभूते घ्राणशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्नामधेयं न स्थितं नाऽस्थितं। तथापि नाम सुभूते जिह्वाशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्नामधेयं न स्थितं नाऽस्थितं। तथापि नाम सुभूते कायशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्नामधेयं न स्थितं नाऽस्थितं। तथापि नाम सुभूते मनः शून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्नामधेयं न स्थितं नाऽस्थितं। तत्कस्य हेतोर्न हि सुभूते चक्षुःस्वभावः स्थितो वाऽस्थितो वा। न श्रोत्रस्वभावः स्थितो वाऽस्थितो वा। न घ्राणस्वभावः स्थितो वाऽस्थितो वा। न जिह्वास्वभावः स्थितो वाऽस्थितो वा। कायस्वभावः स्थितो वाऽस्थितो वा। मनःस्वभावः स्थितो वाऽस्थितो वा। तत्कस्य हेतोस्तथा हि चक्षुश्चक्षुषा शून्यं श्रोत्रं श्रोत्रेण शून्यं। घ्राणं घ्राणेन शून्यं। जिह्वा जिह्वया शून्या कायः कायेन शून्यः। मनो मनसा शून्यं।

न्नामधेयं न स्थितं नाऽस्थितं। तथापि नाम सुभूते जिह्वा-विज्ञानशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्नामधेयं न स्थितं नाऽस्थितं। तथापि नाम सुभूते कायविज्ञानशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्नामधेयं न स्थितं नाऽस्थितं। तथापि नाम सुभूते मनोविज्ञानशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्नामधेयं न स्थितं नाऽस्थितं। तत्कस्य हेतोर्न हि सुभूते चक्षुर्विज्ञानस्वभावः स्थितो वाऽस्थितो वा। न श्रोत्रविज्ञानस्वभावः स्थितो वाऽस्थितो वा। न घ्राणविज्ञानस्वभावः स्थितो वाऽस्थितो वा। न जिह्वाविज्ञानस्वभावः स्थितो वाऽस्थितो वा। न कायविज्ञानस्वभावः स्थितो वाऽस्थितो वा। मनोविज्ञानस्वभावः स्थितो वाऽस्थितो वा। तत्कस्य हेतोस्तथा हि चक्षुर्विज्ञानं चक्षुर्विज्ञानेन शून्यं। श्रोत्रविज्ञानं श्रोत्रविज्ञानेन शून्यं। घ्राणविज्ञानं घ्राणविज्ञानेन शून्यं। जिह्वाविज्ञानं जिह्वाविज्ञानेन शून्यं। कायविज्ञानं कायविज्ञानेन शून्यं। मनोविज्ञानं मनोविज्ञानेन शून्यम्।

तथापि नाम सुभूते चक्षुःसंस्पर्शशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्नामधेयं न स्थितं नाऽस्थितं। तथापि नाम सुभूते श्रोत्रसंस्पर्शशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्नामधेयं न स्थितं नाऽस्थितं। तथापि नाम सुभूते घ्राणसंस्पर्शशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्नामधेयं न स्थितं नाऽस्थितं। तथापि नाम सुभूते जिह्वासंस्पर्शशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्नामधेयं न स्थितं

मार्गस्वभावः स्थितो वाऽस्थितो वा । नारूप्यसमापत्तिस्वभावः स्थितो वाऽस्थितो वा । नाष्टविमोक्षस्वभावः स्थितो वाऽस्थितो वा । नानुपूर्वविहारसमापत्तिस्वभावः स्थितो वाऽस्थितो वा । न शून्यतानिमित्ताप्रणिहितविमोक्षस्वभावः स्थितो वाऽस्थितो वा । नाभिज्ञास्वभावः स्थितो वाऽस्थितो वा । न समाधिस्वभावः स्थितो वाऽस्थितो वा । न धारणीमुखस्वभावः स्थितो वाऽस्थितो वा । तत्कस्य हेतोस्तथा ह्यार्यसत्यान्यार्यसत्यैः शून्यानि । ध्यानानि ध्यानैः शून्यानि । अप्रमाणान्यप्रमाणैः शून्यानि । आरूप्यसमापत्तय आरूप्यसमापत्तिभिः शून्याः । विमोक्षा विमोक्षैः शून्याः । अनुपूर्वविहारसमापत्तयोऽनुपूर्वविहारसमापत्तिभिः शून्याः । शून्यतानिमित्ताप्रणिहितविमोक्षमुखानि शून्यतानिमित्ताप्रणिहितविमोक्षमुखैः शून्यानि । अभिज्ञा अभिज्ञाभिः शून्याः । समाधयः समाधिभिः शून्याः । धारणीमुखानि धारणीमुखैः शून्यानि ।

[illegible]

तद्यथापि नाम सुभूते मनःसंस्पर्शप्रत्ययवेदितशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तत्कस्य हेतोर्न हि सुभूते चक्षुःसंस्पर्शप्रत्ययवेदितस्वभावः स्थितो वाऽस्थितो वा। न श्रोत्रसंस्पर्शप्रत्ययवेदितस्वभावः स्थितो वाऽस्थितो वा। न घ्राणसंस्पर्शप्रत्ययवेदितस्वभावः स्थितो वाऽस्थितो वा। न जिह्वासंस्पर्शप्रत्ययवेदितस्वभावः स्थितो वाऽस्थितो वा। न कायसंस्पर्शप्रत्ययवेदितस्वभावः स्थितो वाऽस्थितो वा। न मनःसंस्पर्शप्रत्ययवेदितस्वभावः स्थितो वाऽस्थितो वा। तत्कस्य हेतोस्तथा हि चक्षुःसंस्पर्शप्रत्ययवेदितं चक्षुःसंस्पर्शप्रत्ययवेदितेन शून्यं। श्रोत्रसंस्पर्शप्रत्ययवेदितं श्रोत्रसंस्पर्शप्रत्ययवेदितेन शून्यं। घ्राणसंस्पर्शप्रत्ययवेदितं घ्राणसंस्पर्शप्रत्ययवेदितेन शून्यं। जिह्वासंस्पर्शप्रत्ययवेदितं जिह्वासंस्पर्शप्रत्ययवेदितेन शून्यं। कायसंस्पर्शप्रत्ययवेदितं कायसंस्पर्शप्रत्ययवेदितेन शून्यं। मनःसंस्पर्शप्रत्ययवेदितं मनःसंस्पर्शप्रत्ययवेदितेन शून्यम्।

तद्यथापि नाम सुभूते स्वप्नो न स्थितो नाऽस्थितः। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते माया न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते मरीचिर्न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते प्रतिश्रुत्का न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते प्रतिभासो न स्थितो नाऽस्थितः। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं।

तद्यथापि नाम सुभूते स्रोत आपत्तिफलं न स्थितं नाऽस्थितं। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते सकृदागामिफलं न स्थितं नाऽस्थितं। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते अनागामिफलं न स्थितं नाऽस्थितं। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूतेऽर्हत्त्वं न स्थितं नाऽस्थितं। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते प्रत्येकबोधिर्न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तत्कस्य हेतोर्न सुभूते स्रोत आपत्तिफलस्वभावः स्थितो वाऽस्थितो वा। न सकृदागामिफलस्वभावः स्थितो वाऽस्थितो वा। नाऽनागामिफलस्वभावः स्थितो वाऽस्थितो वा। नार्हत्त्वस्वभावः स्थितो वाऽस्थितो वा। न प्रत्येकबोधिस्वभावः स्थितो वाऽस्थितो वा। तत्कस्य हेतोस्तथा हि स्रोत आपत्तिफलस्वभावः स्रोत आपत्तिफलस्वभावेन शून्यः। सकृदागामिफलस्वभावः सकृदागामिफलस्वभावेन शून्यः। अनागामिफलस्वभावोऽनागामिफलस्वभावेन शून्यः। अर्हत्त्वस्वभावोऽर्हत्त्वस्वभावेन शून्यः। प्रत्येकबोधिस्वभावः प्रत्येकबोधिस्वभावेन शून्यः।

तद्यथापि नाम सुभूते मार्गाकारज्ञता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते सर्वाकारज्ञता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तत्कस्य हेतोर्न सुभूते मार्गाकारज्ञतास्वभावः स्थितो वाऽस्थितो वा। न सर्वाकारज्ञतास्वभावः

शीलपारमितास्वभावः स्थितो वाऽस्थितो वा। न क्षान्तिपारमितास्वभावः स्थितो वाऽस्थितो वा। न वीर्य्यपारमितास्वभावः स्थितो वाऽस्थितो वा। न ध्यानपारमितास्वभावः स्थितो वाऽस्थितो वा। न प्रज्ञापारमितास्वभावः स्थितो वाऽस्थितो। तत्कस्य हेतोस्तथाहि दानपारमिता दानपारमितायां शून्या। शीलपारमिता शीलपारमितायां शून्या। क्षान्तिपारमिता क्षान्तिपारमितायां शून्या। वीर्य्यपारमिता वीर्य्यपारमितायां शून्या। ध्यानपारमिता ध्यानपारमितायां शून्या। प्रज्ञापारमिता प्रज्ञापारमितायां शून्या।

तद्यथापि नाम सुभूते अध्यात्मशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं। तद्यथापि नाम सुभूते बहिर्द्धाशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते अध्यात्मबहिर्द्धाशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते शून्यताशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते महाशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते परमार्थशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते संस्कृतशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूतेऽसंस्कृतशून्यता न स्थिता नाऽस्थिता। एवमेव सुभूते

शीलपारमितास्वभावः स्थितो वाऽस्थितो वा । न क्षान्तिपारमिता-स्वभावः स्थितो वाऽस्थितो वा । न वीर्य्यपारमितास्वभावः स्थितो वाऽस्थितो वा । न ध्यानपारमितास्वभावः स्थितो वाऽस्थितो वा । न प्रज्ञापारमितास्वभावः स्थितो वाऽस्थितो । तत्कस्य हेतोस्तथाहि दानपारमिता दानपारमिताया शून्या । शीलपार-मिता शीलपारमिताया शून्या । क्षान्तिपारमिता क्षान्तिपार-मिताया शून्या । वीर्य्यपारमिता वीर्य्यपारमिताया शून्या । ध्यान-पारमिता ध्यानपारमिताया शून्या । प्रज्ञापारमिता प्रज्ञापार-मिताया शून्या ।

तद्यथापि नाम सुभूते अध्यात्मशून्यता न स्थिता नाऽस्थिता । एवमेव सुभूते तन्महायानं न स्थित । तद्यथापि नाम सुभूते बहिर्द्धाशून्यता न स्थिता नाऽस्थिता । एवमेव सुभूते तन्महायानं न स्थित नाऽस्थितं । तद्यथापि नाम सुभूते अध्यात्मबहिर्द्धाशून्यता न स्थिता नाऽस्थिता । एवमेव सुभूते तन्महायानं न स्थित नाऽ-स्थित । तद्यथापि नाम सुभूते शून्यताशून्यता न स्थिता नाऽ-स्थिता । एवमेव सुभूते तन्महायानं न स्थित नाऽस्थितं । तद्यथापि नाम सुभूते महाशून्यता न स्थिता नाऽस्थिता । एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं । तद्यथापि नाम सुभूते परमार्थ-शून्यता न स्थिता नाऽस्थिता । एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थित । तद्यथापि नाम सुभूते संस्कृतशून्यता न स्थिता नाऽ-स्थिता । एवमेव सुभूते तन्महायान न स्थितं नाऽस्थितं । तद्यथापि नाम सुभूतेऽसंस्कृतशून्यता न स्थिता नाऽस्थिता । एवमेव सुभूते

न स्थितं नाऽस्थितं। तद्यथापि ना सुभूतेऽसंक्लेशो न स्थितो नाऽस्थितः। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूतेऽव्यवदानं न स्थितं नाऽस्थितं। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तत्कस्य हेतोर्न हि सुभूतेऽनुत्पादस्वभावः स्थितो वाऽस्थितो वा। न निरोधस्वभावः स्थितो वाऽस्थितो वा। नाऽसंक्लेशस्वभावः स्थितो वाऽस्थितो वा। नाऽव्यवदानस्वभावः स्थितो वाऽस्थितो वा। तत्कस्य हेतोस्तथा हि अनुत्पादस्वभावोऽनुत्पादस्वभावेन शून्यः। अनिरोधस्वभावोऽनिरोधस्वभावेन शून्यः। असंक्लेशस्वभावोऽसंक्लेशस्वभावेन शून्यः। अव्यवदानस्वभावोऽव्यवदानस्वभावेन शून्यः।

तद्यथापि नाम सुभूतेऽनभिसंस्कारो न स्थितो नाऽस्थितः। एवमेव सुभूते तन्महायानं न स्थित नाऽस्थितं। तत्कस्य हेतोर्न हि सुभूतेऽनभिसस्कारस्वभावः स्थितो वाऽस्थितो वा। तत्कस्य हेतोस्तथा हि अनभिसंस्कारस्वभावोऽनभिसंस्कारस्वभावेन शून्य। अनेन पर्य्यायेण तद्यानं न क्वचित् स्थास्यत्यस्थितस्थानयोगेन।

यत् पुनः सुभूतिरेवमाह कस्तेन यानेन निर्यास्यतीति। न कश्चित्तेन यानेन निर्यास्यतीति। न कश्चित्तेन यानेन निर्यांति। तत्कस्य हेतोस्तथा हि सुभूते यच्च तद्यानं यश्च निर्यायाद्येन च निर्यायाद्यतश्च निर्यायात्। सर्व्वेत्र ते धर्म्मा न संविद्यन्ते नोपलभ्यन्ते। एवमसत्स्वविद्यमानेष्वनुपलभ्यमानेषु सर्व्वधर्म्मेषु कतमो धर्म्मः कतमेन धर्म्मेण निर्यास्यति। तत्कस्य हेतोस्तथा हि सुभूतेऽत्यन्ततयात्मा नोपलभ्यते। सत्त्वो नोपलभ्यते। जीवो नोपलभ्यते। जन्तुर्नोपलभ्यते।

शून्यतास्वभावः स्थितो वाऽस्थितो वा। न महाशून्यतास्वभावः स्थितो वाऽस्थितो वा। न परमार्थशून्यतास्वभावः स्थितो वाऽस्थितो वा। न सस्कृतशून्यतास्वभावः स्थितो वाऽस्थितो वा। नाऽसस्कृतशून्यतास्वभावः स्थितो वाऽस्थितो वा। नात्यन्तशून्यतास्वभावः स्थितो वाऽस्थितो वा। नाऽनवराग्रशून्यतास्वभावः स्थितो वाऽस्थितो वा। नाऽनवकारशून्यतास्वभावः स्थितो वाऽस्थितो वा। न प्रकृतिशून्यतास्वभावः स्थितो वाऽस्थितो वा। न सर्व्वधर्म्मशून्यतास्वभावः स्थितो वाऽस्थितो वा। न स्वलक्षणशून्यतास्वभावः स्थितो वाऽस्थितो वा। नाऽनुपलम्भशून्यतास्वभावः स्थितो वाऽस्थितो वा। नाऽभावशून्यतास्वभावः स्थितो वाऽस्थितो वा। न स्वभावशून्यतास्वभावः स्थितो वाऽस्थितो वा। नाऽभावस्वभावशून्यतास्वभावः स्थितो वाऽस्थितो वा।

तत्कस्य हेतोस्तथा ह्यध्यात्मशून्यताऽध्यात्मशून्यतया शून्या। बहिर्द्धाशून्यता बहिर्द्धाशून्यतया शून्या। अध्यात्मबहिर्द्धाशून्यताऽध्यात्मबहिर्द्धाशून्यतया शून्या। शून्यताशून्यता शून्यताशून्यतया शून्या। महाशून्यता महाशून्यतया शून्या। परमार्थशून्यता परमार्थशून्यतया शून्या। सस्कृतशून्यता संस्कृतशून्यतया शून्या। असस्कृतशून्यता असस्कृतशून्यतया शून्या। अत्यन्तशून्यता अत्यन्तशून्यतया शून्या। अनवराग्रशून्यता अनवराग्रशून्यतया शून्या। अनवकारशून्यताऽनवकारशून्यतया शून्या। प्रकृतिशून्यता प्रकृतिशून्यतया शून्या। सर्व्वधर्म्मशून्यता सर्व्वधर्म्मशून्यतया शून्या। स्वलक्षणशून्यता स्वलक्षणशून्यतया शून्या। अनुपलम्भशून्यताऽनुप..

अध्यात्मशून्यता नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। वहिर्द्धाशून्यता नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। अध्यात्मवहिर्द्धाशून्यता नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। शून्यताशून्यता नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। महाशून्यतानोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। परमार्थशून्यता नोपलभ्यतेऽत्यन्त विशुद्धितामुपादाय। संस्कृतशून्यता नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। असंस्कृतशून्यता नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। अत्यन्तशून्यता नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। अनवराग्रशून्यता नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। अनवकारशून्यता नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। प्रकृतिशून्यता नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। सर्व्वधर्म्मशून्यता नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। स्वलक्षणशून्यता नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। अनुपलम्भशून्यता नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। अभावशून्यता नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। स्वभावशून्यता नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। अभावस्वभावशून्यता नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय।

स्मृत्युपस्थानानि नोपलभ्यन्तेऽत्यन्तविशुद्धितामुपादाय। सम्यक्प्रहाणानि नोपलभ्यन्तेऽत्यन्तविशुद्धितामुपादाया। ऋद्धिपादा नोपलभ्यन्तेऽत्यन्तविशुद्धितामुपादाय। इन्द्रियाणि नोपलभ्यन्तेऽत्यन्तविशुद्धितामुपादाय। वलानि नोपलभ्यन्तेऽत्यन्तविशुद्धितामुपादाय। वोध्यङ्गानि नोपलभ्यन्तेऽत्यन्तविशुद्धितामुपादाय। आर्य्याष्टाङ्गमार्गो नोपलभ्यन्तेऽत्यन्तविशुद्धितामुपादाय। आर्य्य-

ऋद्धिपादैः शून्याः । इन्द्रियाणीन्द्रियैः शून्यानि । बलानि बलैः शून्यानि । बोध्यङ्गानि बोध्यङ्गैः शून्यानि । मार्गो मार्गेण शून्यः ।

तद्यथापि नाम सुभूते आर्य्यसत्यानि न स्थितानि नाऽस्थितानि । एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं । तद्यथापि नाम सुभूते ध्यानानि न स्थितानि नाऽस्थितानि । एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं । तद्यथापि नाम सुभूते अप्रमाणानि न स्थितानि नाऽस्थितानि । एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं । तद्यथापि नाम सुभूते आरूप्यसमापत्तयो न स्थिता नाऽस्थिताः । एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं । तद्यथापि नाम सुभूतेऽष्टौ विमोक्षाः न स्थिता नाऽस्थिताः । एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं । तद्यथापि नाम सुभूते अनुपूर्व्वविहारसमापत्तयो न स्थिताः नाऽस्थिताः । एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं । तद्यथापि नाम सुभूते शून्यतानिमित्ताप्रणिहितविमोक्षमुखानि न स्थितानि नाऽस्थितानि । एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं । तद्यथापि नाम सुभूते अभिज्ञा न स्थिता नाऽस्थिता । एवमेवसुभूते तन्महायानं न स्थितं नाऽस्थितं । तद्यथापि नाम सुभूते समाधयो न स्थिता नाऽस्थिताः । एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं । तद्यथापि नाम सुभूते धरणीमुखानि न स्थितानि नाऽस्थितानि । एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं । तत्कस्य हेतोर्न हि सुभूते आर्य्यसत्यस्वभावः स्थितो वाऽस्थितो वा । न ध्यानस्वभावः स्थितो वाऽस्थितो वा । नाऽप्र-

मुपादाय। प्रत्येकबोधिर्नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। मार्गाकारज्ञता नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। सर्वाकारज्ञता नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। अनुत्पादो नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। अनिरोधो नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। असंक्लेशो नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। अव्यवदानं नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। अनभिसंस्कारो नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। पूर्वान्तो नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। अपरान्तो नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। प्रत्युत्पन्नं नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। आगामि नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। गतिर्नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। स्थितिर्नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। च्युतिर्नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। उपपत्तिर्नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। हानिर्नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। वृद्धि[illegible]ऽत्यन्तविशुद्धितामुपादाय। [illegible] नोपलभ्य-

[illegible]

तत्कस्य हेतोर्न हि सुभूते दशतथागतबलास्वभावः स्थितो वाऽस्थितो वा। न वैशारद्यस्वभावः स्थितो वाऽस्थितो वा। न प्रतिसम्वित् स्वभावः स्थितो वाऽस्थितो वा। न महाकरुणास्वभावः स्थितो वाऽस्थितो वा। नावेणिकबुद्धधर्म्मस्वभावः स्थितो वाऽस्थितो वा। तत्कस्य हेतोस्तथा हि दशतथागतबलानिबलैः शून्यानि। चत्वारि वैशारद्यानि वैशारद्यैः शून्यानि। चतस्रः प्रतिसम्विदः प्रतिसम्वित् स्वभावैः शून्याः। महाकरुणामहाकरुणयाशून्या। अष्टादशावेणिक-बुद्धधर्म्माः आवेणिकबुद्धधर्म्मैः शून्याः।

तद्यथापि नाम सुभूतेऽर्हत् क्षीणास्रया न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायान न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते प्रत्येकबुद्धो न स्थितो नास्थितः। एवमेव सुभूते तन्महा-यानं न स्थित नाऽस्थितं। तत्कस्य हेतोर्न हि सुभूतेऽर्हत् क्षीणा-स्रवस्वभावः स्थितो वाऽस्थितो वा। न प्रत्येकबुद्धस्वभावः स्थितो वाऽस्थितो वा। तत्कस्य हेतोस्तथा हि अर्हत् स्वभावोऽर्हत् स्वभावेन शून्यः। प्रत्येकबुद्धस्वभावः प्रत्येकबुद्धस्वभावेन शून्यः।

तद्यथापि नाम सुभूते बोधिसत्त्वो न स्थितो नाऽस्थितः। एवमेव सुभूते तन्महायानं न स्थित नाऽस्थितं। तद्यथापि नाम सुभूते तथागतोऽर्हत् सम्यक्सम्बुद्धो न स्थितो नाऽस्थितः। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तत्कस्य हेतोर्न हि सुभूते बोधिसत्त्वस्वभावः स्थितो वाऽस्थितो वा। न तथागतस्वभावः स्थितो वाऽस्थितो। तत्कस्य हेतोस्तथा हि बोधिसत्त्व स्वभावो बोधिसत्त्व स्वभावेन शून्यः। तथागत स्वभावस्तथागत स्वभावेन शून्यः।

मुपादाय। प्रत्येकबोधिर्नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। मार्गाकारज्ञता नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। सर्व्वाकारज्ञतानोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। अनुत्पादो नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। अनिरोधो नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। असंक्लेशो नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। अव्यवदान नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। अनभिसंस्कारो नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। पूर्व्वान्तो नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। अपरान्तो नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। प्रत्युत्पन्नं नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। आगामि नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। गतिर्नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। स्थितिर्नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। च्युतिर्नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। उपपत्तिर्नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। हानिर्नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। वृद्धिर्नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। कस्याऽनुपलब्ध्यापर्व्वं नोपलभ्यते।

धर्म्मधात्वनुपलब्ध्या नोपलभ्यते धर्म्मधातुस्तत्कस्य हेतोर्न हि सुभूते धर्म्मधात्वनुपलब्धिरुपलभ्यते नोपलभ्यते। तथताऽनुपलब्ध्या नोपलभ्यते। तत्कस्य हेतोर्न हि सुभूते तथताऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। भूतकोट्यनुपलब्ध्या नोपलभ्यते भूतकोटिस्तत्कस्य हेतोर्न हि सुभूते भूतकोट्यनुपलब्धिरुपलभ्यते नोपलभ्यते। अचिन्त्यधात्वनुपलब्ध्या नोपलभ्यते। अचिन्त्यधातुस्तत्कस्य हेतोर्न हि सुभूतेऽचिन्त्यधात्वनुपलब्धिरुपलभ्यते न नोपलभ्यते। सर्व्वधर्म्मा [illegible] नोपलभ्यते सर्व्वधर्म्मा [illegible]। तत्कस्य हेतोर्न हि

स्थितो नाऽस्थितो वा। तत्कस्य हेतोस्तथा हि मार्गाकारज्ञता-स्वभावो मार्गाकारज्ञतास्वभावेन शून्यः। सर्वाकारज्ञतास्वभावः सर्वाकारज्ञतास्वभावेन शून्यः।

तद्यथापि नाम सुभूते नाम स्वभावं न स्थितं नाऽस्थितं। एवमेव सुभूते तन्महायानं न स्थित नाऽस्थितं। तद्यथापि नाम सुभूते निमित्तं न स्थितं नाऽस्थितं। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते सङ्केतो न स्थितो नाऽस्थितः। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते व्यवहारो न स्थितो नाऽस्थितः। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थित। तद्यथापि नाम सुभूते प्रज्ञप्तिर्न स्थिता नाऽस्थिता। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तत्कस्य हेतोर्न हि सुभूते नाम स्वभावः स्थितो वाऽस्थितो वा। न नाम निमित्तस्वभावः स्थितो वाऽस्थितो वा। न सङ्केतस्वभावः स्थितो वाऽस्थितो वा। न व्यवहारस्वभावः स्थितो वाऽस्थितो वा। न प्रज्ञप्तिस्वभावः स्थितो वाऽस्थितो वा। तत्कस्य हेतोस्तथा हि नाम स्वभावो नाम स्वभावेन शून्यः। निमित्तस्वभावो निमित्तस्वभावेन शून्यः। सङ्केतस्वभावः सङ्केत-स्वभावेन शून्यः। व्यवहारस्वभावो व्यवहारस्वभावेन शून्यः। प्रज्ञप्तिस्वभावः प्रज्ञप्तिस्वभावेन शून्य।

तद्यथापि नाम सुभूतेऽनुत्पादो न स्थितो नाऽस्थितः। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते-ऽनिरोधो न स्थितो नाऽस्थितः। एवमेव सुभूते तन्महायानं

मुपादाय। प्रत्येकबोधिर्नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। मार्गा-
कारज्ञता नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। सर्व्वाकारज्ञता-
नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। अनुत्पादो नोपलभ्यतेऽत्यन्त-
विशुद्धितामुपादाय। अनिरोधो नोपलभ्यतेऽत्यन्तविशुद्धितामुपा-
दाय। असंक्लेशो नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। अव्यवदानं
नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। अनभिसंस्कारो नोपलभ्यते-
ऽत्यन्तविशुद्धितामुपादाय। पूर्व्वान्तो नोपलभ्यतेऽत्यन्तविशुद्धिता-
मुपादाय। अपरान्तो नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय।
प्रत्युत्पन्नं नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। आगामि नोपलभ्य-
तेऽत्यन्तविशुद्धितामुपादाय। गतिर्नोपलभ्यतेऽत्यन्तविशुद्धितामुपा-
दाय। स्थितिर्नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। च्युतिर्नोपलभ्यते-
ऽत्यन्तविशुद्धितामुपादाय। उपपत्तिर्नोपलभ्यतेऽत्यन्तविशुद्धिता-
मुपादाय। हानिर्नोपलभ्यतेऽत्यन्तविशुद्धितामुपादाय। वृद्धिर्नोप-
लभ्यतेऽत्यन्तविशुद्धितामुपादाय। कस्याऽनुपलब्ध्या सर्व्वं नोपलभ्यते।

धर्म्मधात्वनुपलब्ध्या नोपलभ्यते धर्म्मधातुस्तत्कस्य हेतोर्न हि
सुभूते धर्म्मधात्वनुपलब्धिरुपलभ्यते नोपलभ्यते। तथताऽनुपलब्ध्या
नोपलभ्यते। तत्कस्य हेतोर्न हि सुभूते तथताऽनुपलब्धिरुपलभ्यते
न नोपलभ्यते। भूतकोट्यनुपलब्ध्या नोपलभ्यते भूतकोटिस्तत्कस्य
हेतोर्न हि सुभूते भूतकोट्यनुपलब्धिरुपलभ्यते नोपलभ्यते।
अचिन्त्यधात्वनुपलब्ध्या नोपलभ्यते। अचिन्त्यधातुस्तत्कस्य हेतोर्न हि
सुभूतेऽचिन्त्यधात्वनुपलब्धिरुपलभ्यते न नोपलभ्यते। स्कन्धधात्वाय-
तनानुपलब्ध्या नोपलभ्यते स्कन्धधात्वायतनानि। तत्कस्य हेतोर्न हि

स्थितो वाऽस्थितो वा। तत्कस्य हेतोस्तथा हि मार्गाकारज्ञता-स्वभावो मार्गाकारज्ञतास्वभावेन शून्यः। सर्व्वाकारज्ञतास्वभावः सर्व्वाकारज्ञतास्वभावेन शून्यः।

तद्यथापि नाम सुभूते नाम स्वभावं न स्थितं नाऽस्थितं। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते निमित्तं न स्थितं नाऽस्थितं। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते सङ्केतो न स्थितो नाऽस्थितः। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते व्यवहारो न स्थितो नाऽस्थितः। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते प्रज्ञप्तिर्नस्थिता नाऽस्थिता। एवमेव सुभूते तन्महायान न स्थितं नाऽस्थितं। तत्कस्य हेतोर्न हि सुभूते नाम स्वभावः स्थितो वाऽस्थितो वा। न नाम निमित्तस्वभावः स्थितो वाऽस्थितो वा। न सङ्केतस्वभावः स्थितो वाऽस्थितो वा। न व्यवहारस्वभावः स्थितो वाऽस्थितो वा। न प्रज्ञप्तिस्वभावः स्थितो वाऽस्थितो वा। तत्कस्य हेतोस्तथा हि नाम स्वभावो नाम स्वभावेन शून्यः। निमित्तस्वभावो निमित्तस्वभावेन शून्यः। सङ्केतस्वभावः सङ्केत-स्वभावेन शून्यः। व्यवहारस्वभावो व्यवहारस्वभावेन शून्यः। प्रज्ञप्तिस्वभावः प्रज्ञप्तिस्वभावेन शून्यः।

तद्यथापि नाम सुभूतेऽनुत्पादो न स्थितो नाऽस्थितः। एवमेव सुभूते तन्महायानं न स्थितं नाऽस्थितं। तद्यथापि नाम सुभूते-ऽनिरोधो न स्थितो नाऽस्थितः। एवमेव सुभूते तन्महायानं

ऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। शून्यताशून्यताऽनुपलब्ध्या नोपलभ्यते शून्यताशून्यता। तत्कस्य हेतोर्न हि सुभूते शून्यताशून्यताऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। महाशून्यताऽनुपलब्ध्या नोपलभ्यते महाशून्यता। तत्कस्य हेतोर्न हि सुभूते महाशून्यताऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। परमार्थशून्यताऽनुपलब्ध्या नोपलभ्यते परमार्थशून्यता। तत्कस्य हेतोर्न हि सुभूते परमार्थशून्यताऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। संस्कृतशून्यताऽनुपलब्ध्या नोपलभ्यते संस्कृतशून्यता। तत्कस्य हेतोर्न हि सुभूते संस्कृतशून्यताऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। असंस्कृतशून्यताऽनुपलब्ध्या नोपलभ्यतेऽसंस्कृतशून्यता। तत्कस्य हेतोर्न हि सुभूतेऽसंस्कृतशून्यताऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। अत्यन्तशून्यताऽनुपलब्ध्या नोपलभ्यतेऽत्यन्तशून्यता। तत्कस्य हेतोर्न हि सुभूतेऽत्यन्तशून्यताऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। अनवराग्रशून्यताऽनुपलब्ध्या नोपलभ्यतेऽनवराग्रशून्यता। तत्कस्य हेतोर्न हि सुभूते अनवराग्रशून्यताऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। अनवकारशून्यताऽनुपलब्ध्या नोपलभ्यतेऽनवकारशून्यता। तत्कस्य हेतोर्न हि सुभूतेऽनवकारशून्यताऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। प्रकृतिशून्यताऽनुपलब्ध्या नोपलभ्यते प्रकृतिशून्यता। तत्कस्य हेतोर्न हि सुभूते प्रकृतिशून्यताऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। सर्वधर्मशून्यताऽनुपलब्ध्या नोपलभ्यते सर्वधर्मशून्यता। तत्कस्य हेतोर्न हि सुभूते सर्वधर्मशून्यताऽनुपलब्धिरुपलभ्यते न नोपलभ्यते। स्वलक्षणशून्यताऽनुपलब्ध्या नोपलभ्यते स्वलक्षणशून्यता। तत्कस्य

